**DHARMASASTRA**

**ACHARYA 2nd YEAR**
**Course/Paper-6**

# याज्ञवल्क्यस्मृते: प्रायश्चित्ताध्यायस्य (मिताक्षरासहितस्य)

*(*आदित: अध्यात्मप्रकरणम्, प्रायश्चित्तप्रकरणात् ग्रन्थसमाप्तिं यावत् ।*)*

**Yājñavalkyasmṛtē: prāyaścittādhyāyasya (mitākṣarāsahitasya)**

***(ādita: adhyātmaprakaraṇam, prāyaścittaprakaraṇāt granthasamāptiṃ yāvat  |)***


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# प्रथमखण्डः - आदितः अध्यात्मप्रकरणान्तम्

## ( Unit - I to Unit - V)

## प्रथमभागः ( Unit - I)

### १.१. आमुखम् -

### १.१.१. पाठ्यक्रमे स्वीकृतग्रन्थस्य ग्रन्थकर्तुश्च परिचयात्मकं विवरणम्-

धर्मशास्त्रसाहित्यं मुख्यतयाऽस्माकं भारतीयधर्मशास्त्रकारैः भागत्रयेण संविभक्तम् । तच्च भागत्रयं स्मृति-सूत्र-निबन्धत्वेन प्रतिपादितम् । यद्यप्यत्र कैश्चिदर्वाचीनपण्डितैः भाष्यसाहित्यमित्यपरं परिगण्यते, तथापि तस्य निबन्धसाहित्येष्वन्तर्भावाद् भिन्नतया न गण्यते । तत्र विभागत्रये स्मृतिसाहित्ये मनु-याज्ञवल्क्य-पराशरादीनां स्मृतयः प्राप्यन्ते । सूत्रसाहित्ये गौतमापस्तम्बादीनां धर्मसूत्रापि, निबन्धसाहित्ये विश्वरूपविज्ञानेश्वरादीनां निबन्धकाराणां मेधातिथिकुल्लूकादीनां भाष्यकाराणाञ्च भाष्यनिबन्धादय उत्कृष्टतमं स्थानमलंकुर्वन्ति । एतेष्वेव पूर्वोल्लिखितेषु स्मृति-सूत्र-निबन्धेषु स्मृतीनां प्राथम्यमित्येके, सूत्राणामित्यपरे, निबन्धग्रन्थानामर्वाक्कालिकत्वमिति सर्वजनसम्मतम्।

स्मृतिषु मनुस्मृतेः प्रथम्यं प्राधान्यञ्चेति प्रायशः सर्वैः धर्मशास्त्रकारैः तेषां स्वकीयधर्मशास्त्रेषु निर्विवादतया मनोर्नामोट्टङ्कनपूर्वकं स्मृतिसाहित्यस्य प्राचीनतमत्वं प्रतिपादितम् । मनुस्मृतेरनन्तरं याज्ञवल्क्यस्मृतेः महत्त्वं वैशिष्ट्यञ्च दृश्यते । यद्यपि केषुचिदेव स्थलविशेषेषु उभयोरपि साम्यं केषुचिच्च वैषम्यं परिलक्ष्यते, तथापि विषयव्यवस्थादृष्ट्या याज्ञवल्क्यस्मृतेः महत्वं समधिकमस्ति । यतो धर्मशास्त्रस्य सर्वेऽपि विषया याज्ञवल्क्येन भागत्रयेण आचार-व्यवहार-प्रायश्चित्ताख्येन विभक्ताः । तत्रापि त्रिष्वध्यायेषु प्रायश्चित्ताध्यायः दूरस्थपाठ्यक्रमस्य षष्ठपत्रत्वेन स्वीकृतोऽस्ति ।

धर्मशास्त्रे धर्मशब्दः षड्विधस्मार्तधर्मभावेन मुख्यतया प्रतिपादितः । तद्यथा - वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्चेति । तेषु निमित्तधर्मः विहिताकरणप्रतिषिद्धसेवननिमित्तं प्रायश्चित्तादिकं यदनुष्ठीयते तत्पापं निमित्तीकृत्य योऽयं प्रायश्चित्तधर्मो विहितः स एव निमित्तधर्म इति । यथा याज्ञवल्क्येनोक्तम् -

विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।

अनिग्रहश्चेन्द्रियाणां नरः पतनमृच्छति ।। ३.२१९
तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये ।
एवमस्यान्तरात्मा च लोकश्चैव प्रसीदति ।। ३.२२०

मनोर्मतानुसारम् -

इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः ।
अतिप्रसक्तिं चैतेषां मनसा संनिवर्तयेत् ।। ४.१६

अतः प्रायश्चित्तस्यावश्यकता अस्तीति धीया निमित्तधर्मः विचारितः ।

## १.१.२. याज्ञवल्क्यस्य तत्स्मृतेश्च परिचयः -

स्मृतिसाहित्ये मनुस्मृतेरनन्तरम् अपरा महत्त्वपूर्णा स्मृतिः याज्ञवल्क्यस्मृतिः । कतिदृष्ट्या याज्ञवल्क्यस्मृतेः मनुस्मृत्यपेक्षया समधिकं व्यावहारिकमहत्त्वमस्ति । यद्यपि याज्ञवल्क्यस्मृतिः मनुस्मृतेरर्वाचीना तथापि विशेषतथ्यहेतोः लोकादृता भवति । गणेशस्य ग्रहाणाञ्च पूजा अस्याः स्मृतेःवैशिष्ट्यम् । अस्यां स्मृतौ बौद्धमतं खण्डितम् । द्वयोः मनुयाज्ञवल्क्ययोः ये विषयाः प्राप्यन्ते तत्र याज्ञवल्क्यस्मृतौ अधिकतया सूक्ष्मता स्पष्टता चास्ति । दार्शनिक-विवेचनया मनुयाज्ञवल्क्ययोः साम्यमवलोक्यते, परन्तु भ्रूणविज्ञानविषये याज्ञवल्क्यस्मृतौ नूतनता प्राप्यते ।

याज्ञवल्क्यस्मृतौ प्रायशः सहस्रपरिमिताः श्लोकाःसन्ति । शैलीदृष्ट्या याज्ञवल्क्यस्मृतिः संक्षिप्ता विद्यते । याज्ञवल्क्य एको मौलिकविचारको धर्मशास्त्रकारश्चास्ति । अनेन याज्ञवल्क्येन केषुचित्स्थलेषु मनुना सह ऐक्यमतं न प्रकटितम् । भाषादृष्ट्या स्मृतिरियं पाणिनेः नियमान् पालयति । कादाचित्कत्वेनापवादोऽपि मिलति ।

याज्ञवल्क्यस्मृतौ वेद-वेदाङ्गारण्यकोपनिषत्पुराणेतिहासैः सह बृहदारण्यक-योगशास्त्रयोः समुल्लेखः प्राप्यते । आन्विक्षिक्याः, दर्शनशास्त्रस्य नीतिशास्त्रस्य चोल्लेखः तेन कृतः । अनेन स्मृतिकारेण सूत्र-स्मृतिप्रभृतीनां नामोल्लेखो न विहितः, किन्तु सामान्यतः एषां चर्चा स्मृतौ कृता । अस्यां स्मृतौ शुक्लयजुर्वेदस्य वाजसनेयीसंहितायाः अनेके मन्त्रा उल्लिखिताः । विवेचनविषयदृष्ट्या पारस्करगृह्यसूत्रेण साकमस्या अपि सम्बन्धो विद्यते । इत्थं याज्ञवल्क्यस्मृतेः सम्बन्धः याज्ञवल्क्यनाम्ना प्रख्यातरचनाभिः सह तथा शुक्लयजुर्वेदस्य परम्परया सहावलोक्यते । गरुडपुराणे अग्निपुराणे च याज्ञवल्क्यस्मृतेरनेकाः समानाः कथाः समुपलभ्यन्ते । शङ्खलिखतस्मृतावपि याज्ञवल्क्यस्योल्लेखः प्राप्यते । विदुषां विचारः याज्ञवल्क्यस्य मुख्यस्मृतिभागः ७०० ईशवीयतः निरवच्छिन्नतया प्रचलतीति ।

## १.१.३. याज्ञवल्क्यस्मृतेः कालः -

याज्ञवल्क्यस्मृतेः समयविषये वेवरमहोदयस्य मतं यत् 'अस्याः रचनायाः कृते प्राचीनतमा सीमा द्वितीयशताब्दीनिकटवर्त्तिनी स्यादिति' । यतो हि तस्या मुद्रार्थे नाणकशब्दस्य प्रयोगः विद्यते । अन्यमतानुसारमस्याः स्मृतेः कालः षष्ठ उत सप्तमशताब्दी भवेदिति अनुमीयते । याकोवीमतानुसारं याज्ञवल्क्यस्मृतेः समयः द्वादशग्रहाणां संख्याऽऽधारानुसारं चतुर्थशताब्द्यनन्तरं स्यादिति । प्रफेसरकाणेमतानुसारं अस्याः स्मृतेः समयो नवमशताब्द्यनन्तरं भवितुं नार्हति, यतः टीकाकारो विश्वरूपः नवमशताब्द्याः परं भवितुं नार्हति ।

## १.१.४. योगीश्वरयाज्ञवल्क्यस्य देशः -

अयं याज्ञवल्क्यः मिथिलावास्तव्य आसीत् । स च तस्मिन् देशे निवसति स्म यत्र कृष्णसारमृगःस्वेच्छया विचरति स्म । यत उक्तमस्ति - 'यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत', इति ।

## १.१.५. याज्ञवल्क्यस्मृतेष्टीकाकाराः -

याज्ञवल्क्यस्मृतेः पञ्चटीकाकाराः सन्ति । यथा - विश्वरूप - विज्ञानेश्वर - शूलपाणि - अपरार्क- मित्रमिश्राश्चेति। तेषां टीकाकाराणां टीकाः क्रमशः बालक्रीडा - मिताक्षरा - दीपकटिका - अपरार्कनिबन्ध- वीरमित्रोदयाश्चेति । विज्ञानेश्वरस्य मिताक्षराया उपरि पुनस्टीकात्रयं विद्यते - यथा नन्दपण्डितस्य प्रमिताक्षरा, बालंभट्टस्य बालंभट्टी विश्वेश्वरभट्टस्य सुबोधिनी चेति ।

## १.१.६. टीकाकारेषु विज्ञानेश्वरस्य परिचयः -

विज्ञानेश्वरः पद्मनाभभट्टस्य पुत्रः, भरद्वाजगोत्रियः, उत्तमस्य शिष्यः परमहंसोपाधिकश्चासीत् । मिताक्षरालेखनावसरे कल्याणनगरे विक्रमादित्यनामधेयः कश्चन राजा रराजेति स्वरचितमिताक्षरातो ज्ञायते । अयं विक्रमादित्योऽपि तस्य विज्ञानेश्वरस्य कृतसमयानुसारम् आश्रयं प्रदत्तवानिति कृत्वा तेन विज्ञानेश्वेण तस्य राज्ञः बहुप्रशंसा कृतेति स्पष्टतया ज्ञायते । विज्ञानेश्वरेण तस्य जीवनकालस्याधिकांशसमयं परिव्राजकरूपेणातिबाहयन् अन्तिमसमये सुप्रसिद्धं भाष्यमिदं याज्ञवल्क्यस्मृतेरुपरि लिखितं यच्च ऋजुमिताक्षरा नाम्ना ज्ञायते ।

विज्ञानेश्वरेण स्वटीकाया अन्तिमभागे विज्ञानयोगी तथा तत्त्वविज्ञाननाथ इत्यनयोः शब्दमाध्यमेन आत्मनः परिप्रकाशः कृतः ।

विज्ञानेश्वरकालनिर्णयोऽतीव कठिनः । यतो ह्यनेन विश्वरूप-मेधातिथि - धारेश्वरादीनां नामान्युट्टङ्कितानि, तस्मादस्य कालः १०५० ख्रीष्टाब्दानन्तरमेव प्रतीयते । यद् भवतु विज्ञानेश्वरस्य कालः १०५० ख्रीष्टाब्दात्पूर्वं भवितुं नार्हति, यतः चालुक्यवंशीयः विक्रमादित्यः विज्ञानेश्वरस्य समसामयिक इति पि.भि.काणेमहोदयस्याभिमतम् ।

याज्ञवल्क्यस्मृतेरुपरि यद्यपि विश्वरूप - शूलपाणिप्रभृतिभिष्टीकाः कृतास्तथापि

विज्ञानेश्वरकृता मिताक्षरा विशिष्टं स्थानं लभते । धर्मशास्त्रनिबन्धमालायां विज्ञानेश्वरमतं सर्वोत्कृष्टप्रमाणत्वेन विद्वद्भिः स्वीक्रियते । किञ्च धर्मशास्त्रे तस्यैतादृशप्रभावात् तत्परवर्तिभिः सर्वैरपि भाष्यकारैः तस्य नामोट्टङ्कितम्।

इयं मिताक्षरा न केवलं प्रसिद्धयाज्ञवल्क्यस्मृतेरुपरि टीकाभूताऽपि तु स्मृतिशास्त्राणामनेकेषां सारसंग्रहात्मको महान् कश्चन निबन्धविशेष इत्यत्र नास्त्यतिशयोक्तिः, तत्रापि तदीया विषयव्यवस्था मीमांसाशास्त्रपरिशीलनप्रपञ्चिता, परमतखण्डनस्वमतस्थापनपूर्विका तात्त्विकविवेचनपूर्णा बहुधर्मशास्त्रनिबन्धसमर्थिता प्रमाणिकी चास्ति । मिताक्षरां विहाय विज्ञानेश्वरेण 'अशौचदशकं' नाम दशश्लोकात्मकः ग्रन्थः शार्दुलविक्रीडितच्छन्दसा लिखितः । तस्य टीका हरिहरेण कृतेति मिताक्षरायाः ज्ञायते। अपि चानेन त्रिंशत्श्लोकविशिष्टस्य ग्रन्थस्य भाष्यं कृतमिति तत्कृतपुष्पिकातो ज्ञायते । असौ दाक्षिणात्य इति धर्मशास्त्रेतिहासधर्मद्रुमयोः प्राप्यते ।

मिताक्षराकारो विज्ञानेश्वरः पूर्वमीमांसायां महान् पण्डित आसीत्। यतो हि सम्पूर्णमिताक्षरायां बहुत्र पूर्वमीमांसान्यायप्रयोगो दृश्यते ।

मिताक्षरेति नाम्ना ज्ञायते यदेतत् संक्षिप्तविवरणात्मकं भाष्यमेकमिति । सर्वत्र श्लोकानां व्याख्यानावसरे विज्ञानेश्वरेणात्मनः वैदुष्यं प्रकटितम् । अनेन ग्रन्थस्य वृथाविस्तारः न कुत्रापि कृतः । स्वल्पैरेव शब्दैः महतोऽभिप्रायस्य प्रकाशनमेव तस्य रचनायाः वैशिष्ट्यम् । अस्मादस्य महत्त्वं प्राधान्यञ्चापि अनुमेयम् ।

## बोधप्रश्नाः -

१. याज्ञवल्क्यस्मृतेः रचयितुः नाम किम् ?

उत्तरं..............................................................

२. याज्ञवल्क्यस्मृतौ अध्यायसंख्या कति ?

उत्तरं..............................................................

३. याज्ञवल्क्यः कुत्रत्यः ?

उत्तरं..............................................................

४. याज्ञवल्क्यस्य कालः कः ?

उत्तरं..............................................................

५. याज्ञवल्क्यस्मृतेरुपरि कतिटीकाः सन्ति ?

उत्तरं..............................................................

६. मिताक्षरायाः टीकाकारस्य नाम किम् ?

उत्तरं..............................................................

७. बालंभट्टस्य टीकायाः नाम किम् ?

उत्तरं...........................................................

८.	विज्ञानेश्वरस्य भाष्यस्य नाम किम् ?

उत्तरं...........................................................

९.	विज्ञानेश्वरस्यान्यस्य ग्रन्थस्य नाम किम् ?

उत्तरं...........................................................

१०.	मिताक्षराया उपरि कतिटीकाः सन्ति ?

उत्तरं...........................................................

## १.२. प्रस्तावना -

प्रथमखण्डस्य प्रथमभागे आमुखम्, तत्रामुखे धर्मशास्त्रस्य परिचयप्रदानम्, श्रेणीविभागः, स्मृत्यादीनां पूर्वापरविचारः, धर्मशास्त्रबिषयविवेचनम्, याज्ञवल्क्यस्मृतेः स्मृतिकारस्य याज्ञवल्क्यस्य च परिचयप्रदानम्, याज्ञवल्क्यस्मृतेः कालः, याज्ञवल्क्यस्य देशः, याज्ञवल्क्यस्मृतेः टीकाकाराः, विज्ञानेश्वरस्य परिचयः, अशौचशब्दार्थः, अशौचिनां सपिण्डानां कर्तव्यम्, उदकदाने गुणविधिविचारः, संप्रदानविशेषेण प्रतिषेधविचारः, शोकनिरसनसमर्थेतिहासस्वरूपम्, अशौचिनां नियमविशेषः, आशौचनिमित्तं कालनियमविचारः, जननाशौचम्, अशौचमध्ये पुनः जनने मरणे वा जातेऽशौचविचारः, अप्राप्तकालगर्भनिःसरणनिमित्तमाशौचम्, अशौचस्य अपवादविचारः, अनुगमनाशौचम्, सपिण्डाशौचेऽपवादः, प्रतिपुरुषव्यापिनी शुद्धिः, शुद्धिहेतवश्चैते विषया विवेचिताः।

## १.३. उद्देश्यम् -

प्रियपाठकाः ! अस्मिन् खण्डे प्रथमभागे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- धर्मशास्त्रस्य परिचयं प्राप्स्यन्ति ।
- याज्ञवल्क्यस्मृतेः स्मृतिकारस्य च परिचयं प्राप्स्यन्ति ।
- विज्ञानेश्वरस्य परिचयविषयेऽऽलोचयिष्यन्ति ।
- अशौचशब्दार्थं विज्ञानेश्वरदिशा निर्णेतुं प्रभवन्ति ।
- अशौचिनां सपिण्डानां कर्त्तव्यं प्रतिपादयिष्यन्ति ।
- उदकदाने गुणविधिविचारं निर्णेष्यन्ति ।
- संप्रदानविशेषेण प्रतिषेधविचारमालोचयिष्यन्ति ।
- शोकनिरसनसमर्थेतिहासस्वरूपं निरूपयितुं शक्नुवन्ति ।
- अशौचिनां नियमविशेषं प्रतिपादयिष्यन्ति ।
- अशौचनिमित्तकालनियमविचारं विधास्यन्ति ।
- जननाशौचं निरूपयितुमर्हन्ति ।

- b अशौचमध्ये पुन: जनने मरणे वा जातेऽशौचविचारं निर्णेतुं शक्नुवन्ति ।
- b सपण्डाशौचेऽपवादविचारं निरूपयिष्यन्ति ।
- b शुद्धिहेतून् निरूपयिष्यन्ति ।

**१.४. विज्ञानेश्वरदिशा अशौचशब्दार्थ: -** (अशौचलक्षणम्) 'अशौच'शब्देन च कालस्नानाद्यपनोद्य: पिण्डोदकदानादिविधे: अध्ययनादिपर्युदासस्य च निमित्तभूत: पुरुषगत: कश्चनातिशय: कथ्यते, न पुन: कर्मानधिकारमात्रम् ।

## १.५. अशौचिनां सपिण्डानां कर्त्तव्यम् -

यथोक्तं याज्ञवल्क्येन -

ऊनद्विवर्षं निखनेन्न कुर्यादुदकं तत: ।
आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्वृत: ।। ३.१
यमसूक्तं तथा गाथा जपद्भिर्लौकिकाग्निना ।
स दग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवत् ।। ३.२

ऊने अपरिपूर्णे द्वे वर्षे यस्यासावूनद्विवर्षस्तं प्रेतं निखनेत् न पुन: दहेत्, नापि विहितमुदकदानाद्यौर्ध्वदेहिकं कर्म कुर्यात् । अयं च गन्धमाल्यानुपलेपनादिभिरलंकृत्य शुचौ भूमौ श्मशानादन्यत्र अस्थिनिचयरहितायां बहिर्ग्रामान्निखननीय: । यथोक्तं मनुना - ऊनद्विवर्षं प्रेतं निदध्युर्बान्धवा बर्हि: । अलंकृत्य शुचौ भूमावस्थिसंचयनादृते ।। नास्य कार्योऽग्निसंस्कारा नापि कार्योदकक्रिया । अरण्ये काष्ठवत्त्यक्त्वा क्षिपेयुस्त्र्यहमेव तु ।। बान्धवा: प्रेतकर्म समाप्य उदासीना भवेयु: । तत: तस्मादूनद्विवार्षिकादितरपूर्णद्विवर्षो यो मृत: असौ श्मशानपर्यन्तं ज्ञातिभि: सपिण्डै: समानोदकैश्च ज्यष्ठ: पुर:सरैरनुव्रज्य: । अनुव्रज्य च यमसूक्तं जपद्भिर्लौकिकाग्निना दग्धव्य: । नामकरणादूर्ध्वं अकृतचूडे प्रेताभ्युदयकामनया द्वयं अग्न्युदकदानात्मकं तूष्णीं कार्यं न नियमेन । चूडाकरणानन्तरमयं उदकदानादिनियम: परिपालनीय: । उपनीतश्चेत् आहिताग्नेर्दाहप्रक्रियया स्वगृह्यादिप्रसिद्ध्या लौकिकाग्निना एव दग्धव्य: । अत्रायं विशेष: - उपनीतस्य लौकिकाग्निना दाह: कार्य: अनाहिताग्ने: गृह्याग्निना दाहो यथासंभवं पात्रयोजनं च कार्यम् ।

## बोधप्रश्ना: -

१. ऊनद्विवर्षं प्रेतं किं कुर्यात् ?

उत्तरं............................................................

२. अनुपनीतं केन अग्निना दहेत् ?

उत्तरं............................................................

३. उपनीतः केन अग्निना दग्धव्यः ?

उत्तरं..........................................................

## १.५.१. संस्कारानन्तरकर्म -

यथोक्तं याज्ञवल्क्येन -

सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युपयन्त्यपः ।

अप नः शोशुचदघमनेन पितृदिङ्मुखाः ।। ३.३

सप्तमादिदवसादर्वाग्दशमादिदिवशाद्वा ज्ञातयः समानगोत्राः सपिण्डाः समानोदकाश्च 'अप नः शोशुचदघनम्' इत्यनेन मन्त्रेण दक्षिणामुखा अपः अभ्युपपयन्ति । एतच्च अयुग्मासु तिथिषु कार्यम् । प्रथमतृतीयपञ्चमसप्तमनवमेषूदकक्रिया इति गौतमस्मरणात् । एतच्चापि स्नानानन्तरं कार्यम् । यावदशौचं तावत्प्रेतस्योदकं पिण्डं च दद्युरिति विष्णुः ।

## बोधप्रश्नौ -

१. केषु दिवसेषु उदकदानं पण्डं च दद्यात् ?

उत्तरं..........................................................

२. के अपः अभ्युपयन्ति ?

उत्तरं..........................................................

## १.५.२. मातामहादिषु उदकदानेऽतिदेशविचारः -

यथा सगोत्रसपिण्डानां प्रेतानामुदकं दीयते तथा मातामहानामाचार्याणां च प्रेतानां नित्यमुदकक्रिया कार्या। सखा मित्रं, प्रत्ताः परिणिता दुहितृभगिन्यः, स्वस्रीयो भागिनेयः, श्वशुरः प्रसिद्धः; ऋत्विजो याजकाः, एतेषां सख्यादीनां प्रेतानां कामोदकं कार्यम् । प्रेताभ्युदायकामनायां सत्यामुदकं देयम् । असत्यां न देयमिति अकरणे प्रत्यवायो नास्ति ।

## बोधप्रश्नाः -

१. केषां प्रेतानां नित्यमुदकक्रिया ?

उत्तरं..........................................................

२. केषां प्रेतानां कामोदकं कार्यम् ?

उत्तरं..........................................................

३. केषामुदकदानाकरणे प्रत्यवायो नास्ति ?

उत्तरं..........................................................

## १.६. उदकदाने गुणविधिविचारः -

तच्चोदकदानमित्थं कर्तव्यम् - सपिण्डाः समानोदकाश्च मौनिनः भूत्वा प्रेतस्य नामगोत्रे

उच्चार्य 'अमुकनामा प्रेतोऽमुकगोत्रस्तृप्यतु' इति सकृदेवोदकं प्रसिञ्चेयुः त्रिर्वा; नदीकूलं गत्वा यथावत् शौचं कृत्वा, वस्त्रं संशोध्य स्नानमाचरेत् । स्नानानन्तरं पाषाणमाधाय विप्रे दशाञ्जलीन्,क्षत्रिये द्वादश, वैश्ये पञ्चदश शूद्राय त्रिंशत् दत्वा पुनः स्नानं कृत्वा गृहशौचं कारयेत् ।

किञ्च ज्ञातित्वे सत्यपि ब्रह्मचारिणः समावर्तनपर्यन्तं, पतिताश्च प्रच्युतद्विजातिकर्माधिकारा उदकदानं न कुर्युः ।

## बोधप्रश्नौ -

१. केषामुदकदानं कुर्यात् ?

उत्तरं..............................................................

२. केषामुदकदानं न कुर्यात् ?

उत्तरं..............................................................

## १.७. संप्रदानविशेषेण प्रतिषेधविचारः -

यथोक्तं याज्ञवल्क्येन -

पाखण्ड्यनाश्रिताः स्तेना भर्तृघ्न्यः कामगादिकाः ।
सुराप्य आत्मत्यागिन्यो नाशौचोदकभाजनाः ।। ३.६

नरशिरः कपालादिश्रुतिबाह्यलिङ्गधारणं पाखण्डम्, तद्विद्यते येषां ते पाखण्डिनः, अनाश्रिताः अधिकारे सत्यपि अकृताश्रमविशेषपरिग्रहाः, स्तेनाः सुवर्णाद्युत्तमद्रव्यहारिणः, भर्तृघ्न्यः पतिपातिन्यः, कामगाः कुलटाः, आदिग्रहणात् स्वगर्भब्राह्मणद्यातिन्यः गृह्यन्ते । सुराप्यो यासां या सुरा प्रतिषिद्धा तत्पानरताः, आत्मत्यागिन्यः विषाग्न्युदकोदबन्धनाद्यैरात्मानं यास्त्यजन्ति । एते पाखण्ड्यादयः 'त्रिरात्रं दशरात्रं वा' वक्ष्यमाणस्याशौचस्योदकदानाद्यौर्ध्वदेहिकस्य च भाजना न भवन्ति ।

### १.७.१. नारायणबलिः -

एवं येन येनोपाधिना आत्महननं शास्त्रतोऽभ्यनुज्ञायते तत्तद्व्यतिरिक्तमार्गेणात्महनने श्राद्धाद्यौर्ध्वदेहिकेषु निषिद्धेषु किं पुनस्तेषां कार्यमित्यपेक्षायां वृद्धयाज्ञवल्क्यछागलेयाभ्यामुक्तम् - नारायणबलिः कार्यः लोकगर्हाभयान्तरैः । तथा तेषामेव शौचं भवेदिति यम अब्रवीत् । नारायणबलिश्चेत्थं कार्यः - कस्यांचिच्छुक्लैकादश्यां विष्णुं वैवस्वतं यमं च यथावदभ्यर्च्य तत्समीपे मधुघृतप्लुतांस्तिलमिश्रान् दश पिण्डान् विष्णुरूपिणं प्रेतमनुस्मरन् प्रेतनामगोत्रे उच्चार्य दक्षिणाग्रेषु दर्भेषु दक्षिणाभिमुखः दत्त्वा गन्धादिभिरभ्यर्च्य पिण्डप्रवाहणान्तं कृत्वा नद्यां क्षिपेत्, न पत्न्यादिभ्यो दद्यात् । ततः तस्यामेव रात्र्यामयुग्मान्ब्राह्मणान् आमन्त्र्योपषितः श्वोभूते मध्याह्ने

विष्णवाराधनं कृत्वा एकोद्दिष्टविधिना ब्राह्मणपादप्रक्षालनादिकं कृत्वा पिण्डपितृयज्ञावृतोल्लेखनाद्यवनेजनान्तं कृत्वा विष्णवे ब्रह्मणे शिवाय यमाय च परिवारसहिताय चतुरः पिण्डान् दत्त्वा नामगोत्रसहितं तं प्रेतं संस्मृत्य विष्णोर्नाम संकीर्त्य पञ्चमं पिण्डं दद्यात् । ततो विप्रान् दक्षिणाभिः तोषयित्वा पवित्रपाणिभिर्विप्रैः प्रेताय तिलादिसहितमुदकं दापयित्वा स्वजनैः सार्धं भुञ्जीत ।

सर्पहस्तेत्वयं विशेषः - संवत्सरं यावत्पुराणोक्त - विधिना पञ्चम्यां नागपूजां विधाय पूर्णे संवत्सरे नारायणबलिं कृत्वा सौवर्णं नागं दद्यात्, गां च प्रत्यक्षाम् । ततः सर्वमौर्ध्वदेहिकं कर्म कुर्यात् ।

## बोधप्रश्नाः -

१. के उदकभाजना न भवन्ति ?

उत्तरं..........................................................

२. नारायणबलिः किमर्थं कार्यः ?

उत्तरं..........................................................

३. नारयणबलिः केन विधिना अनुष्ठेयः ?

उत्तरं..........................................................

## १.७.२. उदकदानानन्तरकर्म -

कृतोदकदानान् स्नातान् सम्यगुदकादुत्तीर्णान् मृदुशाद्वलेन वोद्गततृणप्रचयावृते भूभागे सम्यग्स्थितान् पुत्रादीन् कुलवृद्धाः पुरातनैः इतिहासैःवक्ष्यमाणैः अपवदेयुः शोकनिरसनसमर्थैर्वचोभिः बोधयेयुः । यथोक्तं याज्ञवल्क्येन -

कृतोदकान्समुत्तीर्णान्मृदुशाद्वलसंस्थितान् ।
स्नातानपवदेयुस्तानितिहासैः पुरातनैः ।। ३.७

## बोधप्रश्नः -

१. के कान् पुरातनैः इतिहासैरपवदेयुः ?

उत्तरं..........................................................

# १.८. शोकनिरसनसमर्थेतिहासस्वरूपम् -

'मनुष्य'-शब्देन जरायुजाण्डजादिचतुर्विधभूतजातं लक्ष्यते । तत्र संसरणधर्मित्वेन कदलीस्तम्भवदन्तःसाररहिते जलवुद्वुदचिरविनश्वरे संसारे सारस्य स्थिरस्य मार्गणमन्वेषणं यः करोति स समूढः।

किञ्च - पञ्चधा पृथिव्यादिपञ्चभूतात्मकतया निर्मितः कायः निष्प्रयोजनत्वान्नानुशोचनं

कर्तव्यम्। अपि च नेदं आश्चर्यं मरणं नाम; यत: पृथिव्यादीनि महान्त्यपि भूतानि नाशं गच्छन्ति । समुद्राऽपि जरामरणविरहिण:,अमरा अपि प्रलयसमये अवसानं गच्छन्ति, कथमिवास्थिरतया फेनसंनिभो मरणधर्मा भूतसंघो मरणं न यास्यति ? अत: शोकसमावेश: निष्प्रयोजनम् । तस्मान्न रोदितव्यम्, किन्तु प्रेतहितेप्सुभि: स्वशक्त्यनुसारेण श्राद्धादिक्रिया: कार्या:।

एवं कुलवृद्धवचांसि आकर्ण्य त्यक्तशोका: सन्त: बालानग्रत: कृत्वा गृहं गच्छेयु: । गत्वा च वेश्मन: द्वारि स्थित्वा निमपत्राणि दन्तै: खण्डयित्वा आचमनं च कृत्वाऽग्न्युदकगोमयगौरसर्षपानालभ्य अश्मनि च पदं निधाय शनै: गृहे प्रविशेयु: ।

## १.८.१. अतिदेशविचार: -

यथोक्तं याज्ञवल्क्येन -

प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि ।
इच्छतां तत्क्षणाच्छुद्धि: परेषां स्नानसंयमान् ।। ३.१४

यदेतत्पूर्वोक्तं गृहप्रवेशान्तं कर्म तन्न केवलं ज्ञातीनामपि तु परेषां धर्मार्थं प्रेतालंकारनिर्हरणादिकं कुर्वतां भवति । यदि तत्कालशुद्धिमिच्छन्ति तर्हि स्नानप्राणायमादिभि: शुद्धि: संभवति ।

किञ्च आचार्यम्, पितरौ, उपाध्यायं च निहत्यापि व्रती ब्रह्मचारी व्रत्येव, न पुनरस्य व्रतभ्रंश: । स च ब्रह्मचारी सकटान्नं न अश्नीयात्; न अशौचिभि: सह संभाषेत् । यत उक्तमस्ति -

आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती ।
सकटान्नं च नाश्नीयान्न च तै: सह संवसेत् ।। ३.१५

## बोधप्रश्ना: -

१. संसारे क: संमूढ: ?

उत्तरं.........................................................

२. बान्धवै: कथं न रोदितव्यम् ?

उत्तरं.........................................................

३. बान्धवा: कथं गृहं प्रविशेयु: ?

उत्तरं.........................................................

४. केषां तत्क्षणाच्छुद्धि: ?

उत्तरं.........................................................

## १.९. अशौचिनां नियमवशेष: -

क्रीतलब्धाशना: सपिण्डा: भूमावेव पृथक्तया शयीरन् तथा पिण्डपितृयज्ञप्रक्रियया प्राचीनावीतित्वादिरूपया प्रेताय दिनत्रयं पिण्डरूपमन्नं किञ्च जलं क्षीरञ्च मृण्मये पात्रद्वये पृथक् पृथगाकाशे शिक्यादावेकाहं स्थापनीयम् । तत्र विशेषानुपादात्प्रथमेऽहनि कार्यम् । तथा पारस्करवचनात् - पेतात्र स्नाहि इत्युदकं स्थाप्यं 'पिव चेदम्' इति क्षीरम् । तथा अस्थिसंचयनं च प्रथमेऽहिन, तृतीये, सप्तमे तथा नवमे दिने गोत्रजै: सह कार्यम् । तत: वैतानोपासना: वैदिक्य: क्रिया: श्रुतिचोदनात् अनुष्ठेया: । यथोक्तं याज्ञवल्क्येन -

जलमेकाहमाकाशे स्थाप्यं क्षीरञ्च मृण्मये ।
वैतानोपासना: कार्या: क्रियाश्च श्रुतिचोदनात् ।। ३.१७

### बोधप्रश्ना: -

१. के भूमौ कदा प्रथक्तया शयीरन् ?

उत्तरं.........................................................

२. प्रेताय कतिदिनमन्नं देयम् ?

उत्तरं.........................................................

३. आकाशे मृण्मये पात्रद्वये किं किं स्थाप्यम् ?

उत्तरं.........................................................

## १.१०. आशौचनिमित्तकालनियम: -

उक्तञ्च याज्ञवल्क्येन -

त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते ।
ऊनद्विवर्ष उभयो: सूतकं मातुरेवहि ।। ३.१८

शवनिमित्तं शावम् । 'सूतक' शब्देन च जननवाचिना तन्निमित्तमाशौचं लक्ष्यते । एवं च वदता जननमरणयोराशौचमुक्तं भवति । तच्च जननमरणमुत्पन्नज्ञातमेव निमित्तम् । तच्चोभयनिमित्तमप्याशौचं त्रिरात्रं दशरात्रं चेष्यते मन्वादिभि: । यत उक्तं - 'दशाहं शावमाशौचं सपिण्डेषु विधीयते' । 'जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते' । ऊनद्विर्षे संस्थिते उभयोरेव मातापित्रो: अस्पृश्यत्वलक्षणमाशौचं न सपिण्डानाम् ।

### बोधप्रश्ना: -

१. शावमाशौचं कतिरात्रमिष्यते ?

उत्तरं.........................................................

२. कदा उभयोरशौचं पित्रोरशौचम् ?

उत्तरं..............................................................

३. किं तावदशौचं मातुरेव ?

उत्तरं..............................................................

## १.११. जननाशौचम् -

यथोक्तं याज्ञवल्क्येन -

पित्रोस्तु सूतकं मातुस्तदसृग्दर्शनाद् ध्रुवम् ।
तदहर्न प्रदुष्येत पूर्वेषां जन्मकारणात् ।। ३.१९

सूतकं जनननिमित्तमस्पृश्यत्वलक्षणाशौचं पित्रोर्मातापित्रोरेव, न सर्वेषां सपिण्डानाम् । यच्चास्पृश्यत्वं मातुर्ध्रुवं दशाहपर्यन्तं स्थिरमित्यर्थः । कुतः ? तदसृग्दर्शनात् तस्याः संबन्धित्वेनासृग्दर्शनात्, एत एव वशिष्ठः-नाशौचं विद्यते पुंसः संसर्गं चेन्न गच्छति । रजस्तत्र अशुचि ज्ञेयं तच्च पुंसि न विद्यते। यस्मिन्दिवसे कुमारजननं तदहर्न प्रदुष्यते । यस्मात्तस्मिन्नहनि पूर्वेषां पित्रादीनां पुत्ररूपेण जन्म उत्पत्तिस्तस्मात्तदहर्न प्रदुष्यते।

## बोधप्रश्नः -

१. सूतकं कयोः स्यात् ?

उत्तरं..............................................................

## १.१२. अशौचमध्ये पुनः जनने मरणे वा जातेऽऽशौचविचारः -

यथा याज्ञवल्क्यः -

अन्तरा जन्ममरणे शेषाहोभिर्विशुद्ध्यति ।
गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम् ।। ३.२०

वर्णापेक्षया वयोवस्थापेक्षया वा यस्य यावनाशौचकालस्तदन्तरा तत्समस्य ततः न्यूनस्य वाऽऽशौचस्य निमित्तभूते जनने मरणे वा जाते पूर्वाशौचावशिष्टैरेवाहोभिर्विशुद्ध्यति । न पुनः पश्चादुत्पन्नजननादिनिमित्तं पृथक् पृथगाशौचं कार्यम् । यदा पुनः अल्पाद्वर्तमानाशौचाद्दीर्घकालमाशौचमन्तरा पतति तदा न पूर्वशेषेण शुद्धिः । यथाह अङ्गिराः - सूतके मृतकें चेत्स्यान्मृतके त्वथ सूतकम् । तत्राधिकृत्य मृतकं शौचं कुर्यान्न सूतकम् ।। तस्मान्न सूतकान्तःपातिनः शावाशौचस्य पूर्वशेषेण शुद्धिः, किन्तु शावान्तःपातिन एव सूतकस्य । स्मृत्यन्तरे दर्शितः यथा - 'मातर्यग्रे प्रमितायामशुद्धौ म्रियते पिता । पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीम् ।। रात्रिमात्रावशिष्टे पूर्वाशौचे यद्यशौचान्तरं सन्निपतेत्तर्हि पूर्वाशौचं समाप्यानन्तरं द्वाभ्यां रात्रिभ्यां शुद्धिः । प्रभाते पुनः तस्याः रात्रेः पश्चिमे यामे जननाद्यशौचान्तरा

संनिपात्ते अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् । कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुद्ध्यति ।। गर्भस्रावे यावन्तो गर्भग्रहणमासाः तत्समसंख्यकाः निशाः शुद्धेः कारणम् ।

## बोधप्रश्नः -

१. गर्भस्रावे कतिनिशाः शुद्धेः कारणम् ?

उत्तरं.........................................................

## १.१२.१. मृत्युविशेषेणापवादविचारः -

नृपगोविप्रैः निहतानां आत्मघातिनाञ्च संबन्धिनां सद्यः शौचम् । प्रोषिते देशान्तरस्थे यत्रस्थेन प्रथमदिवस एव सपिण्डजननादिकं न ज्ञायते तस्मिन्सपिण्डे कालस्य दशाहाद्यवच्छिन्नस्य यः शेषः कालः स एव शुद्धिहेतुर्भवति। पूर्णे पुनरशौचकाले दशाहादिके प्रेतायोदकं दत्वा शुद्धिर्भवति ।

किञ्च - क्षत्रियवैश्यशूद्राणां सपिण्डजनने तदुपरमे यथाक्रमेण द्वादशपञ्चदशत्रिंशद्दिनान्यशौचं भवति । न्यायवर्तिनः पुनः शूद्रस्य पाकयज्ञद्विजशुश्रूषादिरतस्य तदर्धं मासस्यार्धं पञ्चदशरात्रमशौचम् ।

## १.१२.२. वयोवस्थाभेदेनाशौचम् -

यत उक्तं याज्ञवल्क्येन -

आ दन्तजन्मनः सद्यः चूडान्नैशिकी स्मृता ।
त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् ।। ३.२३

दन्तानामुत्पत्तिकाले अतीतस्य बालस्य संबन्धिनां सद्यः शौचम्, चूडाकरणादर्वाङ्मृतस्य अहोरात्रव्यापिनी शुद्धिः । उपनयनात्पूर्वं चूडायाः परं अतीतस्य त्र्यहमशुद्धिः । अतः परं मृतस्य दशरात्रमशौचं बान्धवानाम् ।

## १.१२.३. स्त्रीषु वयोवस्थाविशेषेणाशौचम् -

'अहस्त्वदत्तकन्यासु बालेषु च विशोधनम्' अपरिणीताकन्यासु कृतचूडासु वाग्दानात्प्रागहोरात्रं शुद्धिकारणं सपिण्डानाम् । सापिण्ड्यं कन्यानां त्रिपुरुषपर्यन्तमेव । बालेषु चानुत्पन्नदन्तेषु अग्निसंस्कारे सत्येकाहो विशोधनम्। अकृतचूडायां तु कन्यायां सद्यः शौचम् । गुरोः, अन्तेवासिनः, अनूचानस्य, मातुलस्य श्रोत्रियस्य च मरणे अहोरात्रमशौचम् । 'गुर्वन्तेवास्यनूचानमातुलश्रोत्रियेषु च' इति याज्ञवल्क्यवचनात् ।

किञ्च अनौरसेषु अन्यगतासु भार्यासु समुत्पन्नेषु पुत्रेषु तथा स्वदेशराजनि प्रेते तदहः शुद्धिकारणम्।

## १.१२.४. अनुगमनाशौचम् -

ब्राह्मणेन असपिण्डेन द्विजो विप्रादिः शूद्रो वा प्रेतो नानुगन्तव्यः । यदि स्नेहादिनानुगच्छति तदा जले स्नात्वा अग्निं स्पृष्ट्वा घृतं प्राश्य शुद्धिः भवति ।

**बोधप्रश्नाः -**

१. केषां सद्यः शौचं विधीयते ?

उत्तरं.........................................................................

२. कदा शुद्धिः नैशिकी स्मृता ?

उत्तरं.........................................................................

३. केन द्विजः शूद्रो वा प्रेतः नानुगन्तव्यः ?

उत्तरं.........................................................................

## १.१३. सपिण्डाशौचापवादविचारः -

उक्तं च याज्ञवल्क्येन -

महीपतीनां नाशौचं हतानां विद्युता तथा ।
गोब्राह्मणार्थं संग्रामे यस्य चेच्छति भूमिपः ।। ३.२७

महीपतीनामुपरमे नाशौचम् । विद्युद्धतानां गोब्राह्मणरक्षणार्थं विपन्नानां च संबन्धिनः ये सपण्डाः तैरशौचं न कार्यम् । यस्य च मन्त्रिपुरोहितादेः भूमिपः अनन्यसाध्यमन्त्राभिचारादिकर्मसिद्ध्यर्थं अशौचाभावमिच्छति तेनापि न कार्यम् ।

किञ्च ऋत्विजाम्, दीक्षितानां यज्ञियं कर्मकुर्वतां तथा सत्रि-व्रति-ब्रह्मचारि-दातृ-ब्रह्मविदां दाने, विवाहे, यज्ञे, संग्रामे, देशविप्लवे, कष्टायां ह्यापद्यपि सद्यः शौचं विधीयते ।

यत उक्तमस्ति याज्ञवल्क्येन -

ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वताम् ।
सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ।। ३.२७
दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि हि कष्टायां सद्यः शौचं विधीयते ।। ३.२८

**बोधप्रश्नाः -**

१. केषां न अशौचम् ?

उत्तरं.........................................................................

२. केषां सद्यः शौचं विधीयते ?

उत्तरं..............................................................

३.  कदा सद्य: शौचं विधीयते ?

उत्तरं..............................................................

## १.१३.१. पुरुषव्यापिनी शुद्धि: -

उदक्याशुभि:स्नायात्संस्पृष्टस्तैरुपस्पृशेत् ।

अब्लिङ्गानि जपेच्चैव गायत्रीं मनसा सकृत् ।। ३.३०

उदक्या रजस्वला, अशुचय: शवचण्डालपतितसूतिकाद्या: शावाशौचिनश्च एतै: संस्पृष्ट: स्नायात्। तै: पुनरुदक्याशुचिसंस्पृष्टादिभि: संस्पृष्ट उपस्पृशेत् (आचमेत्) । आचम्य अब्लिङ्गानि 'आपोहिष्ठा' इत्येवम् आदिनि त्रीणि मन्त्रवाक्यानि जपेत् । तथा गायत्रीं च सकृद् मनसा जपेत् । तथा यम: - अजीर्णेऽभ्युदिते वान्ते तथाप्यस्तमिते रवौ, दु:स्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते । स्मृत्यन्तरे - अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुनम् । कृत्वा सचैलं स्नात्वा च वारुणीभिश्च मार्जयेत् ।

## बोधप्रश्न: -

१.  कै: संस्पृष्ट: स्नायात् ?

उत्तरं..............................................................

## १.१४. शुद्धिहेतव: -

यथोक्तं याज्ञवल्क्येन -

कालोऽग्नि: कर्म मृद्वायुर्मनो ज्ञानं तपो जलम् ।

पश्चात्तापो निराहार: सर्वेऽमी शुद्धिहेतव: ।। ३.३१

यथा अग्न्यादयोऽमी सर्वे स्वविषये शुद्धिहेतवस्तथा कालोऽपि दशरात्रादिक: । अग्निस्तावच्छुद्धिहेतु: पाकादिना । कर्म च शुद्धिनिमित्तं यथा - 'अश्वमेधावभृथस्नानम्' इति । तथा मृदपि शुद्धिकारणं, यथा कथितम् - सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये इति । वायुरपि शुद्धिहेतु:, यथोदिरीतम् - 'मारुतेनैव शुद्ध्यन्ति' इति। मनोऽपि वाच: शुद्धिसाधनम्, यथाम्नायि 'मनसा वा इषिता वाग्वदति' इत्यादि । ज्ञानं चाध्यात्मिकं वुद्धिशुद्धौ निदानम्, यथाभिधास्यति क्षत्रज्ञस्य ईश्वरज्ञानम् इति । तपश्च कृच्छ्रादि, यथा वदिष्यति प्राजापत्यं चरेत्कृच्छ्र 'समो वा गुरुतल्पग:' इत्यादि । तथा जलमपि शरीरादे: । पश्चात्तापोऽपि शुद्धिजनक: यथा गदितं 'ख्यापनेनानुतापेन' इति । निराहारोऽपि शुद्ध्युपादानं यथा त्रिरात्रोपोषितो जप्त्वा' इत्यादि ।

पुनश्च अकार्यकारिणां दानमेव शुद्धिकारणम् । नद्या: प्रवाह: शुद्धिहेतु: । शोधनीयस्य

द्रव्यस्य मृत्तोयञ्च शुद्धिकृत् । संन्यासः द्विजन्मनां मानसापचारे शुद्धिकृत् । तपः वेदाभ्यासः वेदविदां शुद्धिकृत्। क्षान्तिः विदुषाम्, वर्ष्मणः (शरीरस्य) जलम्, प्रच्छन्नपापानां अघमर्षणादिसूक्तजपः शुद्धिसाधनम् । मनसः सत्यं साधुसंकल्पः शोधकम्, भूतात्मनः तपोविद्ये शुद्धिनिमित्ते । बुद्धेः प्रमाणरूपं ज्ञानं विशोधनम्। क्षेत्रज्ञस्य ईश्वरज्ञानात् परमा विशुद्धिर्मुक्तिः ।

## बोधप्रश्नाः -

१. शुद्धिहेतवः के ?

उत्तरं.............................................................

२. अकार्यकारिणां शुद्धिकारणं किम् ?

उत्तरं.............................................................

३. तपः केषां शुद्धिकृत् ?

उत्तरं.............................................................

## १.१५. सारांशः -

प्रियपाठकाः ! अस्मिन् खण्डे प्रथमभागे आमुखे धर्मशास्त्रस्य परिचयात्मकं विवरणं प्रदत्तम् । याज्ञवल्क्यस्य तत्स्मृतेश्च परिचयः प्रदत्तः । याज्ञवल्क्यस्मृतेः कालः निर्धारितः । याज्ञवल्क्यस्मृतेः टीकाकाराः प्रतिपादिताः । विज्ञानेश्वरदिशा अशौचशब्दार्थः उल्लिखितः । अशौचिनां सपिण्डानां कर्त्तव्यमालोचितम् । संस्कारानन्तरं कर्म प्रतिपादितम् । मातामहादिषु उदकदाने अतिदेशो विचारितः । उदकदाने गुणविधिरालोचितः । संप्रदानविशेषे प्रतिषेधः निरूपितः । नारायणबलिरालोचितः । उदकदानानन्तरं कर्म निरूपितम् । शोकनिरसनसमर्थेतिहासस्वरूपं विवृतम् । अशौचिनां नियमविशेषः प्रतिपादितः । अशौचनिमित्तं कालनियमः प्रदर्शितः, अशौचमध्ये पुनः जनने मरणे वा अशौचं विवेचितम्। वयोवस्थाभेदेनाौचं निरूपितम् । अनुगमनाशौचं प्रतिपादितम् । सपिण्डाशौचविचारः कृतः । पुरुषव्यापिनी शुद्धिरालोचिता । शुद्धिहेतवः निर्णिताश्च ।

## १.१६. पारिभाषिकशब्दाः -

| | | |
|---|---|---|
| उपेतः | - | उपनीतः |
| ज्ञातयः | - | समानोदकाः, सपिण्डाः समानगोत्राश्च |
| स्वस्रीयः | - | भागिनेयः |
| पाखण्डम् | - | नरशिरःकपालादिश्रुतिबाह्यलिङ्गधारणम् |
| अनाश्रिताः | - | अधिकारे सत्यपि अकृताश्रमविशेषपरिग्रहाः |

| | | |
|---|---|---|
| कामगा: | - | कुलटा: |
| पञ्चत्वं | - | पृथिव्यादिरूपम् |
| गन्त्री | - | पृथिवी |
| कटम् | - | अशौचम् |
| वैताना: | - | त्रेताग्निसाध्या अग्निहोत्रदर्शपूर्णमासाद्या: क्रिया: |
| स्रुव: | - | अध:पतनम् |
| अन्वक्षम् | - | सद्य: |
| व्रतादेश: | - | उपनयनम् |
| अनूचान: | - | अङ्गानां प्रवक्ता |
| गुरु: | - | उपाध्याय: |
| श्रोत्रिय: | - | एकाशाखाध्यायी |
| सत्रि: | - | अन्नसत्रप्रवृत्ता |
| उदक्या | - | रजस्वला |
| तप: | - | वेदाभ्यास: |
| वर्ष्म | - | शरीरम् |
| क्षान्ति: | - | उपसम: |

## १.१७. आदर्शप्रश्ना: -

**निबन्धात्मकप्रश्ना: - (प्रत्येकं २०/१५ अङ्का:)**

१. याज्ञवल्क्यस्य तत्स्मृते: च परिचयं प्रतिपादयत ।

२. याज्ञवल्क्यस्मृते: टीकाकारेषु विज्ञानेश्वरस्य देश-काल-वैदुष्यं प्रतिपादयत ।

३. विज्ञानेश्वरदिशा अशौचशब्दार्थमुल्लिख्य सपिण्डानां कर्तव्यमालोचयत ।

**विश्लेषणात्मकप्रश्ना: - (प्रत्येकं १२/१० अङ्का:)**

१. अशौचे संस्कारानन्तरं कर्म ग्रन्थोक्तदिशा प्रतिपादयत ।

२. विज्ञानेश्वरदिशा नारयणबलिं विशदयत ।

३. उदकदानानन्तरं कर्म याज्ञवल्क्यमतानुसारं विवेचयत ।

४. शोकनिरसनसमर्थेतिहासस्वरूपमालोचयत ।

५. शुद्धिहेतव: के ?

**लघुप्रश्ना: - (प्रत्येकं ५ अङ्का:)**

१.	कै: सह न अश्नीयात् न च संवसेत् ?

२.	के भूमौ पृथक् पृथक्तया स्वपेयु: ?

३.	पिण्डयज्ञावृतप्रेताय कतिदिनानि अन्नं देयम् ?

४.	अशौचनिमित्तं काला: के ?

५.	अन्तरा जन्ममरणे कै: दिवसै: विशुद्ध्यति ?

६.	केषां सद्य: शौचं विधीयते ?

७.	केषां नाशौचम् ?

**एकाङ्कप्रश्ना: - (प्रत्येकं १ अङ्क:)**

१.	केन द्विज: शूद्रो वा प्रेत: नानुगन्तव्य: ?

२.	कति रात्रं शावमाशौचमिष्यते ?

३.	सूतकं कस्या एव ?

४.	गर्भस्रावे कति निशा: शुद्धे: कारणम् ?

५.	क्षत्रस्य कतिदिनानि अशौचम् ?

## १.१८. एकाङ्कप्रश्नानामुत्तराणि -

१.	ब्राह्मणेन, २. त्रिरात्रं दशरात्रं वा, ३. मातु:, ४. मासतुल्या:, ५. द्वादश ।

## १.१९. सहायकग्रन्था: -


१.	प्रायश्चित्तविवेक: शूलपाणिकृत:
पण्डितकुलमणिमिश्रसंपादित:, श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठम्, पुरी

२.	प्रायश्चित्तमयूख: नीलकण्ठभट्टकृत:
भगवन्तभास्करसिरिज्, चौखम्बासंस्कृतप्रतिष्ठानम्, वाराणसी

३.	प्रायश्चित्तप्रकाश: मित्रमिश्रकृत:
चौखम्बासंस्कृतसिरिज् आफिस्, वाराणसी - १

४.	शुद्धिसार: गदाधरकृत:, डॉ जयकृष्णमिश्रसंपादित:
श्रीजगन्नाथसंस्कृतविश्वविद्यालय:, पुरी

५.	प्रायश्चित्तविलोचन:, डॉ सन्तोषकुमारपण्डासंपादित:
राष्ट्रियसंस्कृतसंस्थानम्, दिल्ली

६.	स्मृतिमुक्ताफलस्य प्रायश्चित्तखण्ड:, चौ.सं.सी.आ, वाराणसी ।

# षष्ठपत्रम्

## प्रथमखण्ड:, द्वितीयभाग: ( Unit - II)

### २.१. प्रस्तावना -

प्रथमखण्डस्य द्वितीयभागे मुख्यवृत्त्यन्तरम्, वैश्यवृत्यापि जीवतो ब्राह्मणस्य अपणनीयम्, पूर्वोक्तनिषिद्धातिक्रमे दोष:, जीवनहेतूनामसंभवे जीवनधारणम्, आपदिराज्ञ: कर्म चैते विषया विवेचिता: ।

### २.२. उद्देश्यम् -

प्रियपाठका: ! अस्मिन् खण्डे द्वितीयभागे भवन्त: आपद्धर्मप्रकरणं पठिष्यन्ति । अत्रापि अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- b वर्णानां मुख्यवृत्त्यसंभवे वृत्त्यन्तरं निरूपयिष्यन्ति ।
- b वैश्यवृत्त्यापि जीवतो ब्राह्मणस्य यदपणनीयं तत् प्रतिप्रादयितुं प्रभवन्ति ।
- b फलोपलादीनां विक्रयनिषिद्धातिक्रमे दोषं निरूपयिष्यन्ति ।
- b जीवनहेतूनामसम्भवे जीवनधारणं विचारयिष्यन्ति ।
- b आपदि राज्ञ: कर्त्तव्यं विधास्यन्ति ।

### २.३. आपद्धर्मे वर्णानां मुख्यवृत्त्यसंभवे वृत्त्यन्तरनिरूपणम् -

'आपद्यपि च काष्टायां सद्य: शौचं विधीयते' इत्यापदि मुख्याशौचकल्पानुष्ठानासंभवेन सद्य: शौचाद्यनुकल्पमुक्त्वा इदानीं तत्प्रसङ्गादापदि 'प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा' इत्याद्युक्तयाजनादिमुख्यवृत्त्यसंभवे वृत्त्यन्तरमुच्यते याज्ञवल्क्येन -

क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विज: ।
निस्तीर्य तामथात्मानं पावयित्वा न्यसेत्पथि ।। ३.३५

द्विज: (विप्र:) बहुकुटुम्बतया स्ववृत्त्या जीवितुमसमर्थ: क्षत्रसंबन्धिना कर्मणा शस्त्रग्रहणादिना आपदि जीवेत् । तेनापि जीवितुमशक्नुवन् वैश्यसम्बन्धिना कर्मणा जीवेत्, न तु शूद्रकर्मणा । तथा च मनु: - 'उभाभ्यामप्याजीवंस्तु कथं स्यादिति चेद्भवेत् । कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम् ।। इति ।

तथा आपद्यपि न हीनवर्णेन ब्राह्मी वृत्तिराश्रयणीया । किन्तु ब्राह्मणेन क्षात्री, क्षत्रियेण वैश्यसंबन्धिनी, वैश्येन च शौद्री, इत्येवं स्वानन्तरहीनवर्णवृत्तिरेव । 'अजीवन्त: स्वधर्मेण अनन्तरां पापीयसीं वृत्तिमातिष्ठेरन् न तु कदाचिज्ज्यायसीम्' इति वसिष्ठस्मरणात् । ज्यायसी

च ब्राह्मी वृत्तिः । तथा च स्मृत्यन्तरम् - ‘ उत्कृष्टं वापकृष्टं वा तयोः कर्म न विद्यते । मध्यमे कर्मणी हित्वा सर्वसाधारणे हि ते’ ।। इति । शूद्रस्य उत्कृष्टं ब्राह्मकर्म न विद्यते । यथा ब्राह्मणस्यापकृष्टं शौद्रं कर्म । मध्यमे क्षत्रवैश्यकर्मणी पुनरापद्गतसर्ववर्णसाधारणे इति । शिल्पैर्वा विविधैर्जीवेत् द्विजातिहितमाचरन् ।। मनुना चात्र विशेषो दर्शितः -‘यैः कर्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः । तानि कारुककर्माणि शिल्पानि विविधानि च ।।’ इति । अनेनैव न्यायेनानुलेमोत्पन्नानामपि स्वानन्तरा वृत्तिरूहनीया । एवं स्वानन्तरहीनवर्णवृत्त्या आपदं निस्तीर्य प्रायश्चिताचरणेनात्मानं पावयित्वा पथि न्यसेत् । तथा च मनुः - जपहोमैरपैत्येनो याजनाध्यापनैः कृतम् । प्रतिग्रहनिमित्तं तु त्यागेन तपसैव तु ।।

## बोधप्रश्नाः -

१. ब्राह्मणः स्ववृत्त्या जीवितुमसमर्थश्चेत् कस्य वृत्त्या जीवेत् ?

उत्तरं.............................................................

२. क्षत्रियः स्ववृत्त्या जीवितुमसमर्थश्चेत् कस्य वृत्त्या जीवेत् ?

उत्तरं.............................................................

३. वैश्यः आपद्धर्मे केन कर्मणा जीवेत् ?

उत्तरं.............................................................

४. ब्राह्मणः केन कर्मणा न जीवेत् ?

उत्तरं.............................................................

५. आपद्यपि हीनवर्णेन का वृत्तिः न आश्रयणीया ?

उत्तरं.............................................................

६. ज्यायसी वृत्तिः का ?

उत्तरं.............................................................

## २.४. वैश्यवृत्त्यापि जीवतो ब्राह्मणस्यापणनीयम् -

यथोक्तं याज्ञवल्क्येन -

फलोपलक्षौमसोममनुष्यापूपवीरुधः ।
तिलौदनरसक्षारान्दधि क्षीरं घृतंजलम् ।। ३.३६
शस्त्रासवमधूच्छिष्टं मधु लाक्षा च बर्हिषः ।
मृच्चर्मपुष्पकुतपकेशतक्रविषक्षितिः ।। ३.३७
कौशेयनीललवणमांसैकशफसीसकान् ।

शाकाद्रौषधिपिण्याकपशुगन्धांस्तथैव च ।। ३.३८

वैश्यवृत्त्यापि जीवन्नो विक्रीणीत कदाचन ।

'नो विक्रीणीत' इति प्रत्येकमभिसंबद्ध्यते । फलानि कदलीफलादीनि, यथाह नारदः - स्वयं शीर्णानि पर्णानि फलानां बदरेङ्गुदे । रज्जुः कार्पासिकं सूत्रं तच्चेदमविकृतं भवेत् ।। इति । उपलं मणिमाणिकाद्यश्ममात्रम् । क्षौममतसीसूत्रमयं वस्त्रम्, 'क्षौम'ग्रहणं तान्तवादेः उपलक्षणम् । सोमः लताविशेषः, 'मनुष्य'पदेन अविशेषणात् स्त्रीपुंनपुंसकानां ग्रहणम्, अपूपं मण्डकादि भक्ष्यमात्रम्, विरुधो वेत्रामृतादिलताः, तिलाः प्रसिद्धाः,ओदनग्रहणं भोज्यमात्रोपलक्षणम्, रसा गुडेक्षुरसशर्करादयः; क्षारा यवक्षारादयः । 'दधिक्षीरयो'र्गहणं पिण्डकिलाटकूर्चिकानां तद्विकाराणामुपलक्षणम् । क्षीरं सविकारम्, 'घृत'ग्रहणं तैलादिस्नेहमात्रोपलक्षणम्, जलं प्रसिद्धम्, शस्त्रं खड्गादि 'आसव'ग्रहणं मद्यमात्रोपलक्षणम्, मधूच्छिष्टं सिक्थकम्, मधु क्षौद्रम्, लाक्षा जतु, बर्हिषः कुशाः, मृत् प्रसिद्धा, चर्माजिनम्, पुष्पं प्रसिद्धम्, अजलोमकृतः कम्बलः कुतपः, केशाश्चमर्यादि संबद्धाः, तक्रमुदश्वित् विषं शृङ्ग्यादि, क्षितिर्भूमिः, कौशेयं कोशप्रभवं वस्त्रम्, नीलं नीलीरसम्, 'लवण'ग्रहणेन बिडसौवर्चलसैन्धवसामुद्रसोमककृत्रिमाणि अविशेषेण गृह्यन्ते । मांसं प्रसिद्धम्, एकशफा हयादयः, 'सीस' ग्रहणं लोहमात्रोपलक्षणम्, शाकं सवम्; ओषधयः फलपाकान्ताः, पिण्याकः प्रसिद्धः पशवः आरण्याः, गन्धाश्चन्दनागुरुप्रभृतयः, सर्वानेतान्वैश्यवृत्त्या जीवन् ब्राह्मणः कदाचिदपि न विक्रीणीत, क्षत्रियादेस्तु न दोषः ।

यद्यावश्यकाः पाकयज्ञादिधर्माः स्वसाधनव्रीह्यादिधान्याभावेन न निष्पद्यन्ते तर्हि धान्येन तिला विक्रेयं नेयाः । तत्समाः द्रोणपरिमिताः द्रोणपरिमितेनेत्येवं तेन धान्येन समाः । तथा च मनुः - काममुत्पाद्य कृष्यात्तु स्वयमेव कृषीबलः । विक्रीणीत तिलाञ्शुद्धान्धर्मार्थमचिरस्थितान् ।। इति । 'धर्म' ग्रहणमावश्यकभेषजाद्युपलक्षणम् । अत एव नारदः - अशक्तौ भेषजस्यार्थे यज्ञहेतोस्तथैव च । यद्यवश्यं तु विक्रेयास्तिला धान्येन तत्समाः ।।' यदि अन्यथा विक्रीणीते तर्हि दोषः । भोजनाभ्यञ्जनाद्दानाद्यदन्यत्कुरुते तिलैः । कृमिभूत्वा स्वविष्ठायां पितृभिः सह मज्जति ।। इति मनुस्मरणात् । सजातीयैः पुनः नियमः भवत्येव । 'रसा रसैर्निमातव्या नत्वेव लवणं रसैः । कृतान्नं च कृतान्नेन तिला धान्येन तत्समाः ।।' इति मनुः । कृतान्नं सिद्धान्नं तच्च कृतान्नेन परिवर्तनीयम् । 'कृतान्नं' चाकृतान्नेन इति पाठे तु सिद्धमन्नमकृतान्नेन तण्डुलादिना परिवर्तनीयम् ।

## बोधप्रश्नाः -

१. उपलशब्देन कोऽर्थः गृह्यते ?

उत्तरं.............................................................

२.	मनुष्यपदेन केषां ग्रहणम् ?

उत्तरं.........................................................

३.	आसवपदेन किमवबोध्यते ?

उत्तरं.........................................................

४.	कुतपशब्देन कः अर्थः गृह्यते ?

उत्तरं.........................................................

५.	निषिद्धद्रव्यविक्रये केषां न दोषः ?

उत्तरं.........................................................

६.	के धर्मार्थं विकेयं नेयाः ?

उत्तरं.........................................................

## २.५. फलोपलादीनां विक्रयनिषिद्धातिक्रमे दोषविचारः -

यथोक्तं याज्ञवल्क्येन -

लाक्षालवणमांसानि पतनीयानि विक्रये ।
पयो दधि च मद्यं च हीनवर्णकराणि तु ।। ३.४०

लाक्षालवणमांसानि विक्रीयमाणानि सद्यः पतनीयानि द्विजातिकर्महानिकराणि । पयःप्रभृतीनि तु हीनवर्णकरणीयानि शूद्रतुल्यत्वापादकानि । एतद्व्यतिरिक्तापण्यविक्रये वैश्यतुल्यता । यथाह मनुः -

सद्यः पतति मांसेन लाक्षया लवणेन च ।
त्र्यहैण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् ।। १०.१२
इतरेषामपण्यानां विक्रयादिह कामतः ।
ब्राह्मणः सप्तरात्रेण वैश्यभावं च गच्छति ।। १०.१३

किञ्च, यः त्वधनोऽवसन्नकुटुम्बतया आपद्गतोऽपि क्षत्रवृत्तिं वैश्यवृत्तिं वा न प्रविविक्षति स यतस्ततो हीनहीनतरहीनतमेभ्यः प्रतिगृहणस्तदन्नं भुञ्जानः अपि एनसा न लिप्यते । यतः तस्यां आपदवस्थायाम् असत्प्रतिग्रहादौ अधिकारित्वेन ज्वलनार्कसमः, यथा ज्वलनोऽर्कश्च हीनसंकरेऽपि न दुष्यति तथा अयमापद्गतोऽपि न दुष्यति । एवं च वदता आपद्गतस्य परधर्माश्रयणाद् द्विगुणमपि स्वधर्मानुष्ठानमेव मुख्यमिति दर्शितम् । तथा च मनुः -

वरं स्वधर्मे विगुणो न पारक्यः स्वनुष्ठितः ।
परधर्माश्रयाद्विपः सद्यः पतति जातितः ।। १०.९७

याज्ञवल्क्येनाप्युक्तं विषयेऽस्मिन् यथा -

आपद्गतः संप्रगृहणन्भुञ्जानो वा यतस्ततः ।

न लिप्येतैनसा विप्रो ज्वलनार्कसमो हि सः ।। ३.४१

किञ्च, 'आपत्तौ जीवनानि' इति विशेषणात्कृष्यादीनां मध्ये अनापदवस्थायां यस्य या वृत्तिः प्रतिषिद्धा तस्य सा वृत्तिरनेनाभ्यनुज्ञायते । तथा आपदि वैश्यवृत्तिः स्वयं कृता कृषिर्विप्रवैश्ययोः अभ्यनुज्ञायते एवं शिल्पादीनि अपि अस्याभ्यनुज्ञायन्ते । शिल्प सूपकारादि, भृत्तिः प्रेष्यत्वम्, विद्या भृतकाध्यापकत्वाद्या, कुसीदं वृद्ध्यर्थं द्रव्यप्रयोगः, तत्स्वयंकृतमभ्यनुज्ञायते, शकटं भाटकेन धान्यादिवहनद्वारेण जीवनहतुः, गिरिस्तद्गततृणेन्धनद्वारेण जीवनम्, सेवा परिचितानुवर्तनम्, अनूपं प्रचुरतृणवृक्षजलप्रायः प्रदेशः, तथा नृपो नृपयाचनम्, भैक्षं स्नातकस्यापि, एतान्यापत्तौ जीवनानि । तथा च मनुः - विद्या शिल्पं भृत्तिः सेवा गोरक्षा विपणिः कृषिः । गिरिर्भैक्षं कुसीदं च दश जीवनहेतवः। यथोक्तं याज्ञवल्क्येन -

कृषिः शिल्पं भृत्तिर्विद्या कुसीदं शकटं गिरिः ।
सेवानूपं नृपो भैक्षमापत्तौ जीवनानि तु ।। ३.४२

## बोधप्रश्नाः -

१. विक्रये पतनीयानि कानि ?

उत्तरं.........................................................

२. हीनवर्णकराणि द्रव्याणि कानि ?

उत्तरं.........................................................

३. केषां विक्रयेण ब्राह्मणः सद्यः पतति ?

उत्तरं.........................................................

४. कस्माद् ब्राह्मणः त्र्यहेण शूद्रो भवति ?

उत्तरं.........................................................

५. आपद्गतः विप्रः कथमेनसा न लिप्यते ?

उत्तरं.........................................................

६. कः धर्मः नानुष्ठेयः ?

उत्तरं.........................................................

७. आपत्तौ जीवनानि कानि ?

उत्तरं.........................................................

## २.६. कृष्यादीनां जीवनहेतूनामसंभवेऽपि जीवनधारणम् -

यथोक्तं याज्ञवल्क्येन -

बुभुक्षितस्त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेत् ।

प्रतिगृह्य तदाख्येयमभियुक्तेन धर्मतः ।। ३.४३

धान्याभावेन त्रिरात्रं बुभुक्षितोऽनश्नन् स्थित्वा अब्राह्मणाच्छूद्रात्तदभावे वैश्यात् तदभावे क्षत्रियाद्वा हीनकर्मण एकाहपर्याप्तं धान्यं हरेत् । यथाह मनुः - 'तथैव सप्तमे भक्ते भक्तानि षडनश्नता । अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः' ।। इति तथा च प्रतिग्रहोत्तरकालं यदपहृतं तद्धर्मतः तथावृत्तमाख्येयम्। यदि नास्तिकेन स्वामिना त्वयेदं किं नामापहृतमित्यधियुज्यते । तथाह मनुः - खलात्क्षेत्रादगाराद्वा यतो वाप्युपलभ्यते । आख्यातव्यं तु तत्तस्मै पृच्छते यदि पृच्छति ।।

## बोधप्रश्नाः -

१. जीवनहेतूनामभावे कथं जीवेत् ?

उत्तरं............................................................

२. धान्याभावे त्र्यहं बुभुक्षितः अनश्नन् कतिधान्यं हरेत् ?

उत्तरं............................................................

३. केन विधानेन हीनकर्मणः द्रव्यं हर्तव्यम् ?

उत्तरं............................................................

# २.७. आपदि राज्ञः कर्त्तव्यम् -

विषयेऽस्मिन् याज्ञवल्क्यस्याभिमतं यथा -

तस्य वृत्तं कुलं शीलं श्रुतमध्ययनं तपः ।

ज्ञात्वा राजा कुटुम्बं च धर्म्यां वृत्तिं प्रकल्पयेत् ।। ३.४४

योऽशनायापरीतोऽवसीदति तस्य वृत्तमाचारं, कुलमाभिजात्यं, शीलमात्मगुणम्, श्रुतं शास्त्रश्रवणम्, अध्ययनं वेदाध्ययनम्, तपः कृच्छ्रादि च परीक्ष्य राज्ञा धर्मादनपेतां वृत्तिं प्रकल्पयेत् ।अन्यथा तस्य दोषः । तथा च मनुः - यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा । तस्य सीदति तद्राष्ट्रं दुर्भिक्षव्याधिपीडितम्।।

## बोधप्रश्नाः -

१. श्रुतपदेन किमवबोध्यते ?

उत्तरं............................................................

२. शीलपदेन कः अर्थः गृह्यते ?

उत्तरं...............................................................

३. राजा किं ज्ञात्वा वृत्तिं प्रकल्पयेत ?

उत्तरं...............................................................

## २.८. सारांशः -

प्रियपाठकाः ! अस्मिन् खण्डे द्वितीयभागे वर्णानां मुख्यवृत्त्यसंभवे वृत्त्यन्तरं निरूपितम् । वैश्यवृत्त्यापि जीवतः ब्राह्मणस्य अपणनीयं (अविक्रेयम्) प्रतिपादितम् । फलोपलादीनां विक्रयनिषिद्धातिक्रमे दोषः विचारितः। आपत्तौ जीवनहेतवः निरूपिताः । कृष्यादीनां जीवनहेतूनामसम्भवे जीवनधारणोपयाः प्रतिपादिताः । परिशेषे राज्ञः कर्त्तव्यमालोचितम् ।

## २.९. पारिभाषिकशब्दाः -

| | | |
|---|---|---|
| उपलम् | - | मणिमाणिक्याद्यश्ममात्रम् |
| वीरुधः | - | वेत्रामृतादिलताः |
| आसवम् | - | मध्यम् |
| कुतपः | - | कम्बलः |
| केशाः | - | चमर्यादिसंबद्धाः |
| विषं | - | शृङ्ग्यादि |
| नीलम् | - | नीलरसम् |
| ओषधयः | - | फलपाकान्ताः |
| पशवः | - | आरण्याः |
| कृतान्तम् | - | सिद्धान्तम् |
| शिल्पम् | - | सूपकरणादि |
| विद्या | - | भृतकाध्यापकत्वाद्या |
| कुसीदम् | - | वृद्ध्यर्थं द्रव्यप्रयोगः |
| गिरिः | - | तद्गततृणेन्धनद्वारेण जीवनम् |
| सेवा | - | परिचित्तानुवर्तनम् |
| अनूपम् | - | प्रचुरतृणवृक्षजलप्रायः प्रदेशः |

## २.१०. आदर्शप्रश्नाः -

### निबन्धात्मकप्रश्ना: (प्रत्येकं २०/१५ अङ्का:)

१. वर्णानां मुख्यवृत्त्यसंभवे वृत्त्यन्तराणि याज्ञवल्क्यदिशा विमृशत ।

२. वैश्यवृत्त्यापि जीवतो ब्राह्मणस्य कृते कानि अपणनीयानि विज्ञानेश्वरदिशा विशदयत ।

३. फलोपलादीनां विक्रयनिषेद्धे दोषख्यापनं ग्रन्थोक्तदिशा आलोचयत ।

### विश्लेषणात्मकप्रश्ना: - (प्रत्येकं १२/१० अङ्का:)

१. जीवनहेतूनामसंभवे कथं जीवेदालोचयत ।

२. आपत्तौ जीवनानि निरूपयत ।

### लघुप्रश्ना: - (प्रत्येकं५ अङ्का:)

१. द्विज: कथमात्मानं पथि न्यसेत् ?

२. कारुकर्माणि कानि ?

३. ब्राह्मणस्य अपकृष्टानि कर्माणि कानि ?

४. एन: कैरपैति ?

५. केन तिला विक्रेयं नेया: ?

६. विप्र: कस्मात् सद्य: पतति ?

### एकाङ्कप्रश्ना: (प्रत्येकं १ अङ्क:)

१. कस्य उत्कृष्टं ब्राह्मकर्म न विद्यते ?

२. किमर्थं तिला विकेयं नेया: ?

३. कै: सह विनिमय: कार्य: ?

४. रसा: कै: निमात्तव्या: ?

५. कृतान्नं कैन परिवर्तनीयम् ?

६. सद्य: पतनीयानि कानि ?

७. क: ज्वलनार्कसम: ?

८. जीवनहेतव: कति ?

९. वुभुक्षितस्त्र्यहं स्थित्वा धान्यं कस्माद्धरेत् ?

१०. क: धर्म्या वृत्तिं प्रकल्पयेत् ?

## २.११. एकाङ्कप्रश्नानामुत्तराणि -

१. शूद्रस्य, २. धर्मार्थम्,३. सजातीयै:, ४. रसै:, ५. कृतान्नेन, ६. लाक्षालवणमांसानि,

७. विप्रः, ८. दश, ९. अब्राह्मणात्, १०. राजा ।**षष्ठपत्रम्**

# प्रथमखण्डः, तृतीयभागः ( Unit - III)

## ३.१. प्रस्तावना -

अस्मिन् खण्डे तृतीयभागे वानप्रस्थधर्मप्रकरणे वानप्रस्थधर्मास्तत्रापि द्रव्यसञ्चयनियमः, पुरुषार्थतया विहितद्विर्भोजननिवृत्तिः, अग्निपरिचर्या चैते विषया विवेचिताः ।

## ३.२. उद्देश्यम् -

प्रियपाठकाः ! अस्मिन् खण्डे तृतीयभागे भवन्तः वानप्रस्थधर्मप्रकरणं पठिष्यन्ति । अत्रापि अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- b वानप्रस्थधर्मान् प्रतिपादयिष्यन्ति ।
- b वानप्रस्थधर्मार्थं द्रव्यसञ्चयनियमान् निरूपयिष्यन्ति ।
- b पुरुषार्थतया विहितद्विर्भोजननिवृत्तिमालोचयिष्यन्ति ।
- b अग्निपरिचर्यां निर्णेतुं प्रभवन्ति ।

## ३.३. वानप्रस्थधर्माः -

यथोक्तं याज्ञवल्क्येन -

सुतविन्यस्तपत्नीकस्तया वाऽनुगतो वनम् ।
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनः व्रजेत् ।। ३.४५

वने प्रकर्षेण नियमेन च तिष्ठति चरतीति वनप्रस्थः, वनप्रस्थ एव वानप्रस्थः । असौ सुतविन्यस्तपत्नीकः 'त्वेयेयं वरणीया' इत्येवं सुते विन्यस्ता निक्षिप्ता पत्नी येन स तथोक्तः । यदि सा पतिपरिचर्याभिलाषेण स्वयमपि वनं जिगमिषति तदा तया अनुगतः वा सहितः । तथा ब्रह्मचारी ऊर्ध्वरेताः साग्निः वैतानाग्निसहितः तथा सोपासनः गृह्यग्निसहितश्च वनं व्रजेत् । एतच्चाश्रमसमुच्चयपक्ष- मङ्गीकृत्योक्तम्। 'अविल्पुतब्रह्मचर्यो यमिच्छेत्तु तमावसेत्' इत्यकृतगार्हस्थ्योऽपि वनवासेऽधिक्रियत एव ।अयं च वनप्रवेशः जराजर्जरकलेवरस्य जातपौत्रस्य वा । यथाऽऽह मनुः -

गृहस्थस्तु यदा पश्येद्वलीपलितात्मनः ।
अपत्यस्यैव वाऽपत्यं तदारण्यं समाश्रयेत् ।।

अयं च पुत्रेषु पत्नीनिक्षेपो विद्यमानभार्यस्य । मृतभार्यस्य अपि आपस्तम्बादिभिः

वनवासस्मरणात्। 'साग्नि: सोपासन' इत्यत्रापि यदार्घाधानं कृतं तदा श्रौताग्निभिर्गृह्येण च सहितो वनं व्रजेत् । सर्वाधाने तु श्रौतैरेव केवलम् । यदि कथंचिज्ज्येष्ठभ्रातुरनाहिताग्नित्वादिना श्रौताग्नयोऽनाहितास्तर्हि केवलं सोपासानो व्रजेदित्येवं विवेचनीयम्। अग्निनयनं च अग्निहोत्रादिकर्मसिद्ध्यर्थम् । अत एव मनु: - वैतानिकं च जुहुयादग्निहोत्रं यथाविधि । दर्शमस्कन्दयन्पर्व पौर्णमासं च शक्तित: ।। पुनश्च ब्रह्मचारिण: विधुरस्य वा वनं प्रस्थितस्य अग्निहोत्रादिपरिलोप: यथा न स्यात् तथा निक्षिप्तपत्नीकस्य अप्यग्निहोत्राद्यभाव इति शङ्कनीयम् । अपात्रिकरणत्वेन श्रवणात् । न च ब्रह्मचारिविधुरयोरप्यग्निसाध्यकर्मस्वनधिकार: । वानप्रस्थो जटीलश्चीराजिनवासा न फालकृष्टमधितिष्ठेत् । अकृष्टं मूलफलं संचिन्वीत ऊर्ध्वरेता: क्ष्माशय: दद्यादेव न प्रतिगृह्णीयादूर्ध्वं पञ्चभ्यो मासेभ्य श्रावणिकेनाग्नीनाधाय आहिताग्नि: वृक्षमूलक: दद्याद् देवपितृमनुष्येभ्य: स गच्छेत् स्वर्गमानन्त्यम् । न कृष्टक्षेत्रस्योपरि निवसेत् । श्रावणिकेन वैदिकेन मार्गेण न लौकिकेनेत्यर्थ:।

पुनश्च, याज्ञवल्क्येनोक्तम् -

अफालकृष्टेनाग्नींश्च पितृदेवातिथीनपि ।
भृत्यांश्च तर्पयेत् श्मश्रुजटालोमभृदात्मवान् ।। ३.४६

'फाल' ग्रहणं कर्षणसाधनोपलक्षणम् । अकृष्टक्षेत्रोद्भवेन नीवारवेणुश्यामकादिना अग्निसाध्यानि कर्माणि अनुतिष्टेत् । तथा पितृ्न् देवानतिथीन् भूतान्यपि तेनैव तर्पयेत् । तथा च मनु: यद्भक्ष्यं स्यात्ततो दद्याद्बलिं भिक्षां च शक्तित: । अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् ।। एवं पञ्चमहायज्ञान् कृत्वा स्वयमपि तच्छेषमेव भुञ्जीत । 'देवताभ्यश्च तद्धुत्वा वन्यं मेध्यतरं हवि: 'शेषमात्मनि युञ्जीत लवणं च स्वयंकृतम् ।। तथा श्मश्रूणि मुखजानि रोमाणि जटारूपांश्च शिरोरूहान् कक्षादीनि च रोमाणि विभृयात् । रोमग्रहणं नखानामप्युपलक्षणम् । तथा आत्मोपासनारत: स्यात् ।

## बोधप्रश्ना: -

१. गृहस्थ: कदा वनं व्रजेत् ?

उत्तरं.............................................................

२. वानप्रस्थ: कथं व्रजेत ?

उत्तरं.............................................................

३. वानप्रस्थाश्रमस्य काल: क: ?

उत्तरं.............................................................

४.	कः वनं व्रजेत् ?

उत्तरं.........................................................

५.	अग्निसाध्यानि कर्माणि केनानुतिष्ठेत् ?

उत्तरं.........................................................

६.	पितृदेवानतिथीनपि केन तर्पयेत् ?.

उत्तरं.........................................................

७.	स्वयमेव किं भुञ्जीत ?

उत्तरं.........................................................

८.	वानप्रस्थः कानि विभृयात् ?

उत्तरं.........................................................

## ३.४. द्रव्यसंचयनियमाः -

यथोक्तं याज्ञवल्क्येन -

अह्नो मासस्य षण्णां वा तथा संवत्सरस्य वा ।
अर्थस्य संञ्चयं कुर्यात्कृतमाश्वयुजे त्यजेत् ।। ३.४७

एकस्याह्नः संबन्धि भोजनयजनादिदृष्टादृष्टकर्मणः पर्याप्तस्य अर्थस्य संचयं कुर्यात् । मासस्य वा षणां मासानां वा संवत्सरस्य वा संबन्धि कर्मपर्याप्तं संचयं कुर्यात्, नाधिकम् । यद्येवं क्रियमाणमपि कथंचिदचिरिच्यते तर्हि तदतिरिक्तम् आश्वयुजे मासि त्यजेत् ।किञ्च, दान्तो दर्परहितः, त्रिषु सवनेषु प्रातर्मध्यंदिनापराह्णेषु स्नानशीलः स्यात्, तथा प्रतिग्रहे पराङ्मुखः। 'च' शब्दाद्याजनादिनिवृत्तिश्च । स्वाध्यायवान् वेदाभ्यासरतः । तथा फलमूलभिक्षादिदानशीलः सर्वप्राणिहिताचरणनिरतश्च भवेत् ।

विषयेऽस्मिन् याज्ञवल्क्यस्याभिमतं यथा -

दान्तस्त्रिसवनस्नायी निवृत्तश्च प्रतिग्रहात् ।
स्वाध्यायवान्दानशीलः सर्वसत्त्वहिते रतः ।। ३.४८

किञ्च, दन्ता एवोलूखलं निस्तुषीकरणसाधनं दन्तोलूखलं, तद्यस्यास्ति स दन्तोलूखलिकः । कालेनैव पक्वं कालपक्वं नीवारवेणुश्यामकादि फलं तदशनशीलः कालपक्वाशी । 'वा' शब्दः अग्निपक्वाशनो वा स्यात्कालपक्वभुगेव वा' इति मनूक्ताग्निपक्वाशित्वाभिप्रायः । अश्मकुट्टको वा भवेत् । अश्मना कुट्टनमवहननं यस्य स तथोक्तः । तथा श्रौतं स्मार्तञ्च कर्म भोजनाभ्यञ्जनादिक्रियाः मधुकादिमेध्यतरुफलोद्भवैः स्नेहद्रव्यैः कुर्यात्, न तु घृतादिकैः । तथा

च मनु: - मेध्यवृक्षोद्भवानद्यात्स्नेहांश्च फलसंभवान् इति । याज्ञवल्क्येनाप्युक्तं

दन्तोलूखलिक: कालपक्वाशी वाश्मकुट्टक: ।
श्रोत्रं स्मार्तं फलस्नेहै: कर्म कुर्यात्तथा क्रिया ।। ३.४९

## बोधप्रश्ना: -

१. कतिकालस्य कृते अर्थस्य सञ्चयं कुर्यात् ?

उत्तरं.......................................................................

२. अतिरिक्तं संचितमर्थं कस्मिन्मासि त्यजेत् ?

उत्तरं.......................................................................

३. वानप्रस्थ: कीदृश: भवेत् ?

उत्तरं.......................................................................

४. वानप्रस्थ: कदा स्नायात् ?

उत्तरं.......................................................................

५. क: सर्वसत्त्वहिते रत: स्यात् ?

उत्तरं.......................................................................

६. दन्तोलूखलिक: क: स्यात् ?

उत्तरं.......................................................................

७. कालपक्वाशी को भवेत् ?

उत्तरं.......................................................................

८. श्रौतं स्मार्तं च कर्म वानप्रस्थ: कै: कुर्यात् ?

उत्तरं.......................................................................

## ३.५. पुरुषार्थतया विहितद्विर्भोजननिवृत्ति: -

यथोक्तं याज्ञवल्क्येन -

चान्द्रायणैर्नयेत्कालं कृच्छ्रैर्वा वर्तयेत्सदा ।
पक्षे गते वाप्यश्नीयान्मासे वाऽहनि वा गते ।। ३.५०

चान्द्रायणै: वक्ष्यमाणलक्षणै: कालं नयेत् । कृच्छ्रैर्वा प्राजापत्यादिभि: कालं वर्तयेत् । यद्वा पक्षे पञ्चदशदिनात्मकेऽतीतेऽश्नीयात् । मासे वाऽहनि गते वा नक्तमश्नीयात् । 'अपि' शब्दाच्च चतुर्थकालिकत्वादिनापि। यथाह मनु: नक्तं वान्नं समश्नीयाद्दिवा वाहृत्य शक्तित: । चतुर्थकालिको वा स्याद्यद्वाप्यष्टमकालिक: ।।एतेषां च कालनियमानां स्वशक्त्यपेक्षया विकल्प:

।

किञ्च, आहाराविहारावसरवर्ज्यं रत्रौ शुचिः प्रयतः स्वप्यात् न उपविशेत् नापि तिष्ठेत् । दिवास्वप्नस्य पुरुषमात्रार्थतया प्रतिषिद्धत्वात् न तन्निवृत्तिपरम् । तथा भूमौ एव स्वप्यात् । दिनं तु संप्रपदैरटनैर्नयेत् । स्थानासनरूपैर्वा विहारैः संचारैः किंचित्कालं स्थानं किंचिच्चोपवेशनमित्येवं वा दिनं नयेत् । योगाभ्यासेन वा आत्मनः संसिद्धये ब्रह्मप्राप्तये दिनं नयेत् । यथोक्तं याज्ञवल्क्येन -

स्वप्याद्भूमौ शुची रात्रौ दिवा संप्रपदैर्नयेत् ।
स्थानासनविहारैर्वा योगाभ्यासेन वा तथा ।। ३.५१

किञ्च, 'त्र्यर्तुः संवत्सरः ग्रीष्णो वर्षा हेमन्तः' इति दर्शनाद् ग्रीष्णे चैत्रादिमासचतुष्टये चतसृषु दिक्षु चत्वारोऽग्नयः उपरिष्टादादित्य इत्येवं पञ्चानामग्नीनां मध्ये तिष्ठेत् । तथा वर्षासु श्रावणादिमासचतुष्टये स्थण्डिलेशयः वर्षाधारानिवारणविरहिणि भूतले निवसेत् । हेमन्ते मार्गशीर्षादिमासचतुष्टये क्लिन्नं वासः वसीत । एवं विधतपश्चरणे असमर्थः स्वशक्त्यनुरूपं वा तपश्चरेत् । यथा शरीरशोषस्तथा यतेत । विषयेऽस्मिन् याज्ञवल्क्यमतम् -

ग्रीष्णे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः ।
आर्द्रवासास्तु हेमन्ते शक्त्या वापि तपश्चरेत् ।। ३.५२

किञ्च, यः कश्चित्कण्टकादिभिर्विविधमङ्गानि तुदति व्यथयति तस्मै न कुध्येत् । यः चन्दनादिभिरुपलिम्पति सुखयति तस्य न परितुष्येत् । तयोरुभयोरपि समः स्यादुदासीनो भवेत् ।

## बोधप्रश्नाः -

१. वानप्रस्थः कैः कालं नयेत् ?
उत्तरं.............................................................

२. वानप्रस्थः सदा कैः वर्तयेत् ?
उत्तरं.............................................................

३. वानप्रस्थः कदा अश्नीयात् ?
उत्तरं.............................................................

४. वानप्रस्थः कुत्र स्वप्यात् ?
उत्तरं.............................................................

५. वानप्रस्थः रात्रौ दिवा च कथं कालं नयेत् ?
उत्तरं.............................................................

६. वानप्रस्थ: ग्रीष्मे कुत्रस्थ: तिष्ठेत् ?

उत्तरं..........................................................

७. वर्षासु कुत्रस्थ: तिष्ठेत् ?

उत्तरं..........................................................

८. आद्रवास: कस्मिन् ऋतौ तिष्ठेत् ?

उत्तरं..........................................................

९. कथं तप: चरेत् ?

उत्तरं..........................................................

१०. कयोरुभयोरुपरि उदासीन: भवेत् ?

उत्तरं..........................................................

## ३.६. अग्निपरिचर्या -

यथोक्तं याज्ञवल्क्येन -

अग्नीन्वाप्यात्मसात्कृत्वा वृक्षावासो मिताशन: ।
वानप्रस्थगृहेष्वेव यात्रार्थं भैक्षमाचरेत् ।। ३.५४

अग्निनात्मनि समारोप्य वृक्षवासो वृक्ष एव आवास: कुटी यस्य स तथोक्त: । मिताशन: स्वल्पाहार: । यथाह मनु: - 'अग्नीनात्मनि वैतानान्समारोप्य यथाविधि । अनग्निरनिकेत: स्यान्मुनिर्मूलफलाशन:' ।। मुनिर्मौनव्रतयुक्त: । फलमूलासंभवे च यावत्प्राणधारणं भवति तावन्मात्रं भैक्षं वानप्रस्थगृहेष्वाचरेत् । यदा तु तदसंभव: व्याध्याभिभव: वा तदा कि कुर्यादिति प्रश्ने याज्ञवल्क्येनोच्यते - 'ग्रामादाहृत्य वा ग्रासानष्टौ भुञ्जीत वाग्यत:' । अर्थाद् ग्रामाद्वा भैक्षमाहृत्य वाग्यत: मौनी भूत्वा अष्टौ ग्रासान् भुञ्जीत । यदा पुनरष्टभिर्ग्रासै: प्राणधारणं न संभवति तदा ' अष्टौ ग्रासा मुनेर्भैक्ष वानप्रस्थस्य षोऽशे'ति स्मृत्यन्तरोक्तं द्रष्टव्यम् । सकलानुष्टानासमर्थे वायुभक्ष: प्रागुदीचीमैशानीं दिशं गच्छेत् । आ वर्ष्मसंक्षयात् निपातपर्यन्तम् अकुटिलगतिर्गच्छेत् । यथाह मनु: -

'अपराजितां वास्थाय गच्छेद्दिशमजिह्मग:' । इति महाप्रस्थानेऽप्यशक्तौ भृगुपतनादिकं कुर्यात्; 'वानप्रस्थो वीराध्वानज्वलनाम्बुप्रवेशनं भृगुपतनं वानुतिष्टेत्' इति स्मरणात् । स्नानाचमनादिधर्मा ब्रह्मचारिप्रकरणाद्यभिहिताश्च अविरोधिन: अस्यापि भवन्ति; 'उत्तरेषां चैतदविरोधि' इति गौतमस्मरणात्। एवं पूर्वोक्तैर्धमैरनुतिष्टन् ब्रह्मलोके पूज्यतां प्राप्नोति । यथाह मनु: -

आसां महर्षिचर्याणां त्यक्त्यान्यतमया तनुम् ।
वीतशोकभयो विप्रो ब्रह्मलोके महीयते ।। ६.३२

एवमात्मानमवसादयन्निति गार्हस्थ्य-वानप्रस्थ - नैष्ठिकत्वस्वरूपमभिधाय सर्व एते पुण्यश्लोका भवन्ति इति त्रयाणामाश्रमिणां पुण्यलोकप्राप्तिमभिधाय ब्रह्मसंस्थोऽमृतत्त्वमेति इति पारिशेष्यात्परिव्राजकस्यैव ब्रह्मस्थस्य मुक्तिलक्षणामृतत्वप्राप्तिरभिहिता । यद्यपि 'श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते' इति गृहस्थस्यापि मोक्षप्रतिपादनं तद्भावान्तरानुभूतपारिव्रज्यस्य इत्यवगन्तव्यम्।

## बोधप्रश्ना: -

१. वानप्रस्थ: कीदृश: स्यात् ?

उत्तरं.........................................................

२. वानप्रस्थ: कीदृशेषु गृहेषु यात्रार्थं भैक्षमाचरेत् ?

उत्तरं.........................................................

३. वानप्रस्थ: गृहेषु भिक्षाऽसंभवे कस्मादाहृत्य भुञ्जीत ?

उत्तरं.........................................................

४. वानप्रस्थ: कतिग्रासान् भुञ्जीत ?

उत्तरं.........................................................

५. वानप्रस्थ: कथं भुञ्जीत ?

उत्तरं.........................................................

६. वायुभक्ष: कां दिशं कियत्पर्यन्तं गच्छेत् ?

उत्तरं.........................................................

## ३.६.सारांश: -

प्रियपाठका: ! अस्मिन् खण्डे तृतीयभागे वानप्रस्थधर्मा: विचारिता: । तत्रापि वानप्रस्थधर्मे वानप्रस्थकाल: निर्धारित: । द्रव्यसंचयनियमा: विचारिता: । पुरुषार्थतया विहितद्विर्भोजननिवृत्तिरालोचिता। वानप्रस्थस्य आहारविहारादय: प्रतिपादिता: । तपश्चरणमालोचितम् । उदासीनभावो निरूपित: । अग्निपरिचर्या च विशदीकृता।

## ३.७. पारिभाषिकशब्दा:-

| | | |
|---|---|---|
| ब्रह्मचारी | - | ऊर्ध्वरेता: |
| श्रावणिकेन | - | वैदिकेन |

| | | |
|---|---|---|
| फालम् | - | कर्षणसाधनोपलक्षणम् |
| दान्तः | - | दर्परहितः |
| उलूखलम् | - | निस्तुषीकरणसाधनम् |
| कृच्छ्रम् | - | प्राजापत्यादिकम् |
| प्रपदैः | - | पादाग्रैः |
| क्लिन्नं | - | आर्द्रवस्त्रम् |
| तुदति | - | व्यथयति |
| मुनिः | - | मौनव्रतयुक्तः |
| वर्ष्म | - | वपुः |

## ३.८. आदर्शप्रश्नाः -

### निबन्धात्मकप्रश्नः -(प्रत्येकं २०/१५ अङ्काः)

१. वानप्रस्थकालमुल्लिख्य तस्य धर्मान् ग्रन्थोक्तदिशा विवेचयत ।

### विश्लेषणात्मकप्रश्नाः - (प्रत्येकं १२/१० अङ्काः)

१. वानप्रस्थिनः द्रव्यसञ्चयतियमान् प्रतिपादयत ।

२. पुरुषार्थाय विहितभोजननिवृत्तिमालोचयत ।

३. अग्निपरिचर्यां विशदयत ।

### लघुप्रश्नाः - (प्रत्येकं ५ अङ्काः)

१. वानप्रस्थी केषु ऋतुषु कथं तपश्चरेत् ?

२. वानप्रस्थी कयोः कृते उदासीनः स्यात् ?

३. वानप्रस्थः कतिग्रासान् कथं भुञ्जीत ?

४. कः प्रागुदीचीं आवर्ष्मसंक्षयात् गच्छेत् ?

### एकाङ्कप्रश्नाः - (प्रत्येकं १ अङ्कः)

१. कः साग्निः सोपासनः व्रजेत् ?

२. महायज्ञान् कृत्वा तच्छेषं कः भुञ्जीत ?

३. वानप्रस्थः कस्मिन् मासि अतिरिक्तं धनं त्यजेत् ?

४. त्रिसवनस्नायी कः स्यात् ?

५. सर्वसत्वहिते कः रतः भवेत् ?

६. वानप्रस्थः कैः कालं नयेत् ?

७.	वानप्रस्थः कैः सदा वर्तयेत् ?

८.	वानप्रस्थः कुत्र स्वप्यात् ?

९.	कस्मादाहृत्य अष्टौ ग्रासान् भुञ्जीत ?

१०.	वानप्रस्थः यात्रार्थं किमाचरेत् ?

## ३.९. एकाङ्कप्रश्नानामुत्तराणि -

१.	वानप्रस्थः

२.	वानप्रस्थः

३.	आश्वयुजि मासि

४.	वानप्रस्थः

५.	वानप्रस्थः

६.	चान्द्रायणैः

७.	कृच्छ्रैः

८.	भूमौ

९.	गृहात्

१०.	भैक्षम्

# षष्ठपत्रम्

# प्रथमखण्ड:, चतुर्थभाग: ( Unit - IV)

# (यतिधर्मनिरूपणादारभ्य शब्दब्रह्मोपासनप्रकारं यावत्)

## ४.१. प्रस्तावना -

अस्मिन् खण्डे चतुर्थभागे यतिधर्मप्रकारणे यतधर्मा: (परिव्राजकधर्मा:), तत्रापि अधिकारिधर्मा:, भिक्षाटनविधि:, इन्द्रियनिरोधोपायतया संसारस्वरूपम्, जीवपरमात्मनो: भेदाभाव:, जरायुजाण्डजादिचतुर्विधदेहपरिग्रहविचार:, आत्मन: सृष्टि:, शरीरग्रहणप्रकार:, संयुक्तशुक्रशोणितस्य कार्यरूपपरिणतौ क्रम:, कायस्वरूपम्, सविषयाणि ज्ञानेन्द्रियाणि, शिरादीनां शाखाप्राचुर्येण संख्यान्तरम्, शारीररसादिपरिमाणम्, उपासनीयात्मस्वरूपम्, शब्दब्रह्मोपासनञ्चैते विषया विचारिता: ।

## ४.२. उद्देश्यम् -

प्रियपाठका: ! भवन्त: अस्मिन् खण्डे चतुर्थभागे अधोलिखितान् विन्दून् पठिष्यन्ति ।

- यतिधर्मान् निरूपयिष्यन्ति ।
- अधिकारिधर्मान्प्रतिपादयिष्यन्ति ।
- यते:भिक्षाटनविधिमालोचयिष्यन्ति ।
- इन्द्रियनिरोधोपायतया संसारस्वरूपं निरूपयिष्यन्ति ।
- जीवपरमात्मनो: भेदाभावं निर्णेष्यन्ति ।
- जरायुजाण्डजादिचतुर्विधदेहपरिग्रहविचारं करिष्यन्ति ।
- आत्मन: सृष्टिविषयेऽऽलोचयिष्यन्ति ।
- शरीरग्रहणप्रकारं निर्णेतुं प्रभवन्ति ।
- संयुक्तशुक्रशोणितस्य कार्यरूपपरिणतौ क्रमं प्रतिपादयिष्यन्ति ।
- कायस्वरूपं विचारयिष्यन्ति ।
- सविषयाणि ज्ञानेन्द्रियाणि निरूपयिष्यन्ति ।
- शिरादीनां शाखाप्राचुर्येण संख्यान्तरमालोचयिष्यन्ति ।
- शरीररसादिपरमाणं निरूपयिष्यन्ति ।
- उपसनीयात्मस्वरूपं विचारयिष्यन्ति ।

b शब्दब्रह्मोपासनं निरूपयिष्यन्ति ।

## ४.३. परिव्राजकधर्मा: - (धर्मेऽस्मिन्नधिकारिनिरूपणम्)

यथोक्तं याज्ञवल्क्येन -

वनाद् गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणाम् ।
प्राजापत्यां तदन्ते तानग्नीनारोप्य चात्मनि ।। ३.५६
अधीतवेदो जपकृत्पुत्रवानन्नदोऽग्निमान् ।
शक्त्या च यज्ञकृन्मोक्षे मन: कुर्यात्तु नान्यथा ।। ३.५७

अर्थात् यावता कालेन तीव्रतप:शोषितवपुष: विषयकषायपरिपाक: भवति पुनश्च मदोद्भवाशङ्का नोद्भाव्यते तावत्कालं वनवासं कृत्वा तत्समनन्तरं मोक्षे मन: कुर्यात् । 'वनगृहशब्दाभ्यां तत्संबन्धाश्रमो लक्ष्यते । 'मोक्ष' शब्देन च मोक्षैकफलकश्चतुर्थाश्रम: । अथवा, गृहाद् गार्हस्थ्यादनन्तरं मोक्षे मन: कुर्यात् । तथा च विकल्प: जावालश्रुतौ श्रूयते - 'ब्रह्मचर्यं परिसमाप्य गृही भवेत्, गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत् । यदि वा इतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहद्वा वनाद्वा' इति । तथा गार्हस्थ्योत्तराश्रमबाधश्च गौतमेन दर्शित: । 'एकाश्रम्यं त्वाचार्या: प्रत्यक्षविधानाद्गारस्थ्यस्य' इति । एतेषां श्रुतिमूलत्वादिच्छया विकल्प: । तथा च मनु: - 'आत्मन्यग्नीन्समारोप्य ब्राह्मण: प्रव्रजेद् गृहात्' । तथा एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विध: । इत्युपक्रमोपसंहाराभ्यां मनुना ब्राह्मणस्य अधिकारप्रतिपादनात्। ब्राह्मणा: प्रव्रजन्तीति श्रुतेश्चाग्रजन्मन: एवाधिकार:, न द्विजातिमात्रस्य । अन्ये तु 'त्रैवर्णिकानां प्रकृतत्वात् त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा:' इति सूत्रकारप्य द्विजातिमात्रस्याधिकारमाहु: । यदा च वनाद् गृहाद्वा प्रव्रजति तदा सार्ववेदसदक्षिणां दत्वा, प्रजापतिदेवताकमिष्टिं कृत्वा तदन्ते तान् वैतानाग्नीनात्मनि श्रुत्युक्तविधानेन समारोप्य उत्तरायणे पौर्णमास्यां पुरश्चरणमादौ कृत्वा शुद्धेन कायेन अष्टौ श्राद्धानि निर्वपेत् द्वादश वा' इति बौधायनाद्युक्तं पुरश्चरणादिकं च कृत्वा तथाऽधीतवेद: जपपरायण: जातपुत्र: दीनान्धकृपणार्पितार्थो यथाशक्त्यान्नदश्च भूत्वा अनाहिताग्नि: ज्येष्ठत्वादिना प्रतिबन्धाभावे कृताधान: नित्यनैमितिकान्यज्ञान् कृत्वा मोक्षे मन: कुर्यात् ।

यथा मनु: -

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेसयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यध: ।। ६.३५

यदा तु ब्रह्मचर्यात् प्रव्रजति तदा न प्रजोत्पादनादिनियम:, अकृतदारपरिग्रहस्य तत्रानधिकारात् रागप्रयुक्तत्वाच्च विवाहस्य । ननु 'जायमानो वै ब्राह्मण: त्रिभिर्ऋणवाञ्जायते

ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य' इति जातमात्रस्यैव प्रजोत्पादनादीन्यावश्यकानीति दर्शयति । न हि जातमात्रःअकृतदाराग्निपरिग्रहो यज्ञादिष्वधिक्रियते तस्मादधिकारी जायमानः ब्रह्मणादिर्यज्ञादीननुतिष्ठेदिति तस्यार्थः ।

## बोधप्रश्नाः -

१. कः मोक्षे मनः कुर्यात् ?

उत्तरं........................................................................

२. आश्रमाः कति ?

उत्तरं........................................................................

३. अन्तिमाश्रमः कः ?

उत्तरं........................................................................

४. कः गृहात्प्रव्रजेत् ?

उत्तरं........................................................................

५. कति ऋणान्यपाकृत्य मनः मोक्षे निवेसयेत् ?

उत्तरं........................................................................

६. ऋणानि कति ?

उत्तरं........................................................................

७. कः अधः व्रजति ?

उत्तरं........................................................................

## ४.४. अधिकारिधर्माः -

यथोक्तं विषयेऽस्मिन् याज्ञवल्क्येन -

सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः ।

एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत् ।। ३.५८

सर्वभूतेभ्यः प्रियाप्रियकारिभ्यः हित उदासीनः, न पुनर्हिताचरणः । शान्तः बाह्यान्तःकरणोपरतः, त्रयो दण्डा अस्य सन्तीति त्रिदण्डी ते च दण्डा वैणवा ग्राह्याः । 'प्राजापत्येष्ट्यनन्तरं त्रीन्वैणवान्द्रण्डान् मूर्धप्रमाणान् दक्षिणेन पाणिना धारयेत् सव्येन सोदकं कमण्डलुम्' इति स्मृत्यन्तरदर्शनात् । एकं वा दण्डं धारयेत् । एकदण्डी त्रिदण्डी वा' इति बौधायनस्मरणात् । 'मुण्डः शिखी वा' इति गौतमस्मरणात् । यद्यशक्ति तदा कन्थापि ग्राह्या 'काषायी मुण्डस्त्रिदण्डी सकमण्डलुपवित्रपादुकासनकन्थामात्रः । इति देवलस्मरणात् । शौचाद्यर्थं

कमण्डलुसहितश्च भवेत् । एकारामः प्रव्रजितान्तरेणासहायः सन्यासिनीभिः स्त्रिभिश्च । 'स्त्रीणां चैके' इति बौधायनेन स्त्रीणामपि प्रव्रज्यास्मरणात् । अत्र वेदाभ्यासः प्रणवाभ्यासः तत्र यत्नवान् भवेत । अहं ममाभिमानं तत्कृतं च लौकिकं वैदिकं च कर्म नियतकाम्यात्मकं संत्यजेत्। भिक्षाप्रयोजनार्थं ग्राममाश्रयेत् । न पुनः सुखनिवासार्थम् । वर्षाकाले तु न दोषः, 'ऊर्ध्वं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासी' इति शङ्खस्मरणात् । अशक्तौ पुनः मासचतुष्टयपर्यन्तं स्थातव्यं न चिरमेकत्र वसेदन्यत्र वर्षाकालात् । 'श्रावणादयो चत्वारो मासा वर्षाकालः' इति ।

## बोधप्रश्नाः -

१. कः ग्राममाश्रयेत् ?

उत्तरं.............................................................

२. कः त्रिदण्डी भवेत् ?

उत्तरं.............................................................

३. कः लौकिकं वैदिकञ्च नित्यकाम्यात्मकं कर्म संत्यजेत् ?

उत्तरं.............................................................

४. कः सर्वभूतहितः शान्तः एकारामश्च स्यात् ?

उत्तरं.............................................................

५. के मासाः वर्षाकालान्तर्गताः ?

उत्तरं.............................................................

## ४.५. भिक्षाटनविधिः -

यथोक्तं याज्ञवल्क्येन -

अप्रमत्तश्चरेद्भैक्षं सायाह्नेऽनभिलक्षितः ।
रहिते भिक्षुकैःर्ग्रामे यात्रामात्रमलोलुपः ।। ३.५९

अप्रमतः वाक्चक्षुरादिचापलरहितः भैक्षं चरेत् । वसिष्ठेनात्र विशेषो दर्शितः - 'सप्तागाराण्यसंकल्पितानि चरेद्भैक्षम्' इति । सायाह्ने अह्नः पञ्चमे भागे । त्तथा च मनुः - 'विधूमे सन्नमुसले व्यङ्गारे भुक्तवर्जने । वृत्ते शरावसंपाते नित्यं भिक्षां यतिश्चरेत् ।। तथा - 'एककालं चरेद्भिक्षां प्रसज्येन्न तु विस्तरे । भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति । अनभिलक्षितः ज्योतिर्विज्ञानोपदेशादिना अचिह्नितः । मनुः यथा - ' न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया । नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ।। भिक्षुकैः पाखण्ड्यादिभिर्वर्जिते यावता प्राणयात्रा

वर्तते तावन्मात्रं भैक्षं चरेत् । मनुनात्र विशेष उक्तः -

न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः ।

आकीर्णं भिक्षुकैरन्यैरगारमुपसंव्रजेत् ।।

तथा च संवर्तः -

अष्टौ भिक्षाः समादाय मुनिः सप्त च पञ्च वा ।

अद्भिः प्रक्षाल्य ताः सर्वास्ततोऽश्नीयाच्च वाग्यतः ।।.

अलोलुपः मिष्टान्नव्यञ्जनादिष्वप्रसक्तः सन् भुञ्जीत ।

## बोधप्रश्नाः -

१. यतिः कथं भैक्षं चरेत् ?

उत्तरं........................................................................

२. यतिः कदा भैक्षं चरेत् ?

उत्तरं........................................................................

३. यतिः कीदृशि ग्रामे भिक्षां चरेत् ?

उत्तरं........................................................................

४. यतिः कियत्परिमितभिक्षां चरेत् ?

उत्तरं........................................................................

## ४.५.१. यतिपात्राणि -

यथोक्तं याज्ञवल्क्येन -

यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च ।

सलिलं शुद्धिरेतेषां गोबालैश्चावघर्षणम् ।। ३.६०

मृदादिप्रकृतिकानि यतीनां पात्राणि भवेयुः । तेषां सलिलं गोबालावघर्षणं च शुद्धिसाधनम् । एत एव मनुना - 'अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च । तेषामद्भिः स्मृतं शौचं चमसानाविमाध्वरे ।। पात्रान्तराभावे भोजनमपि तत्रैव कार्यम् । 'तद्भैक्षं गृहीत्वैकान्ते तेन पात्रेणान्येन वा तूष्णीं प्राणमात्रं भुञ्जीतेति देवलस्मरणात् ।

## ४.५.२. यतेरात्मोपासनाङ्गनियमः - (यतेः मुक्तिः)

चक्षुरादीन्द्रियसमूहं रूपादिविषयेभ्यः सम्यक् निरुद्ध्य रागद्वेषौ प्रियाप्रियविषयौ त्यक्त्वा 'च' शब्दादीर्ष्यादीनपि, तथा भूतानामपकारेण भयमकुर्वन् शुद्धान्तः करणः सन् अद्वैतसाक्षात्कारेण

अमृतीभवति मुक्तो भवति । यथोक्तं याज्ञवल्क्येन -

संनिरुद्ध्येन्द्रियग्रामं रागद्वेषौ प्रहाय च ।
भयं हित्वा च भूतानाममृतीभवति द्विजः ।। ३.६१

किञ्च - विषयाभिलाषद्वेषजनितदोषकलुषितस्य अन्तःकरणस्य शुद्धिः कल्मषक्षयः प्राणायामैः कर्तव्यः। तस्याः शुद्धेः आत्मद्वैतसाक्षात्काररूपज्ञानोत्पत्तिनिमित्तत्वात् । एवं सति विषयासक्तितज्जनित- दोषात्मकप्रतिबन्धक्षये सत्यात्मध्यानधारणादौ स्वतन्त्रो भवति । तस्माद्भिक्षुकेण त्वेषा शुद्धिर्विशेषतः अनुष्ठेया, तस्य मोक्षप्रधानत्वात् । मोक्षस्य च शुद्धान्तःकरणातान्तरेण दुर्लभत्त्वात्। यथाह मनुः - दह्यन्ते ध्यायमानानां धातूनां हि यथामलाः । तथेन्द्रियाणां दह्यन्ते दोषः प्राणस्य निग्रहात् ।।

## बोधप्रश्नाः -

१. यतिपात्राणि कानि ?

उत्तरं.............................................................

२. यतिपात्राणां शुद्धिसाधनं किम् ?

उत्तरं.............................................................

३. यतिपात्राभावे यतिभिःभोजनं कस्मिन् पात्रे कर्तव्यम् ?

उत्तरं.............................................................

४. यतिः कथं अमृती भवति ? (वा मुक्तो भवति)

उत्तरं.............................................................

५. शुद्धिः कैः कर्तव्या ?

उत्तरं.............................................................

६. शुद्धिः कथं कर्तव्या ?

उत्तरं.............................................................

७. यतिः कथं स्वतन्त्रः भवति ?

उत्तरं.............................................................

## ४.५. इन्द्रियनिरोधोपायतया संसारस्वरूपनिरूपणम् -

वैराग्यसिद्ध्यर्थं मूत्रपुरीषादिपूर्णनानाविधगर्भवासाः पर्यालोचनीयाः । तथा निषिद्धाचरणादिक्रियाजन्या महारौरवादिनिरयपतनरूपा गतयः । तथा आधयः मनःपीडाः, व्याधयश्च ज्वरातिसाराद्याः, क्लेशाः अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च, जरा वलीपलिताद्यभिभवः रूपविपर्ययः खञ्जकुब्जत्वादिना प्राक्तनस्य रूपस्यान्यथाभावः, तथा श्वसूकरखरोरगाद्यनेकजातिषु

भव उत्पत्तिः । तथा 'इष्टस्याप्राप्तिः अनिष्टस्य प्राप्तिः' इत्यादि बहुतरक्लेशावहं संसारस्वरूपं पर्यालोच्य तत्परिहारार्थं आत्मज्ञानोपायभूतेन्द्रियजये प्रयतेत । यथाह याज्ञवल्क्यः -

'अवेक्ष्या गर्भवासाश्च कर्मजा गतयस्तथा ।
आधयो व्याधयः क्लेशा जरा रूपविपर्ययः ।। ३.६३
भवो जातिसहस्रेषु प्रियाप्रियविपर्ययः ।

एवं अवेक्षानन्तरं किं कर्तव्यमित्युक्ते याज्ञवल्क्य आह -

ध्यानयोगेन संपश्येत्सूक्ष्म आत्मात्मनि स्थितः ।। ३.६४

योगश्चित्तवृत्तिनिरोधः, आत्मैकाग्रता ध्यानम्, तस्या एव बाह्यविषयत्वोपरमः ध्यानयोगेन सूक्ष्मशरीरप्राणादिव्यतिरिक्तः क्षेत्रज्ञ आत्मा आत्मनि ब्रह्मण्यवस्थितः इत्येवं तत्त्वं पदार्थयोरभेदं सम्यक् पश्येत्, अत एव श्रुतौ - 'आत्मा वाऽरे द्रष्टव्यः' इति साक्षात्काररूपं दर्शनमनूद्य तत्साधनत्वेन 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रवणमनननिदिध्यासनानि विहितानि ।

किञ्च, याज्ञवल्क्येनोक्तं -

नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः ।
अतो यदात्मनोऽपथ्यं परेषां न तदाचरेत् ।। ३.६५

प्राक्तनश्लोकोक्तात्मोपासनाख्ये धर्मे नाश्रमो दण्डकमण्डल्वादिधारणं कारणम् । यस्मादसौ क्रियमाणो भवेदेव नातिदुष्करः । तस्माद्यदात्मनोऽपथ्यमुद्वेगकरं परुषभाषणादि तत्परेषां न समाचरेत् । अतो ज्ञानोत्पत्तिहेतोः आश्रमस्य न परित्यागोऽपितु तस्यापि विधानमनुष्ठेयम् । यथाह मनुः - दूषितोऽपि चरेद्धर्मं यत्र तत्राश्रमे वसन् । समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ।।

किञ्च, याज्ञवल्क्येनोक्तं -

सत्यमस्तेयमक्रोधो ह्रीःशौचं धीर्धृतिर्दमः ।
संयतेन्द्रियता विद्या धर्मः सर्व उदाहृतः ।। ३.६६

एतैः सत्यादिभिरात्मगुणैः सर्वो धर्मोऽनुष्ठीयते ।

## बोधप्रश्नाः -

१. वैरागसिद्ध्यर्थं केऽवेक्षाः ?

उत्तरं.............................................................

२. गतयः काः ?

उत्तरं.............................................................

३. क्लेशाः कति, ते च के ?

उत्तरं.............................................................

४. कथमिन्द्रियजये प्रयतेत ?

उत्तरं.........................................................

५. योगलक्षणं किम् ?

उत्तरं.........................................................

६. आत्मानं केन संपश्येत् ?

उत्तरं.........................................................

७. धर्मे किं तावन्न कारणम् ?

उत्तरं.........................................................

८. कः क्रियमाणः भवेत् ?

उत्तरं.........................................................

९. परेषां किं न आचरेत् ?

उत्तरं.........................................................

१०. के धर्मे सर्वे उदाहृताः ?

उत्तरं.........................................................

## ४.७. जीवपरमात्मनोः भेदाभावविचारः -

यथोक्तं याज्ञवल्क्येन -

निःसरन्ति यथा लोहपिण्डात्तप्तात्स्फुलिङ्गकाः ।
सकाशादात्मनस्तद्वदात्मानः प्रभवन्ति हि ।। ३.६७

यद्यपि जीवपरमात्मनोः पारमार्थिकभेदो नास्ति तथाप्यात्मनः सकाशाद् विद्योपाधिभेदतया जीवात्मानः प्रभवन्ति यस्मात् तस्माद्युज्यत एव जीवपरमात्मनोर्भेदव्यपदेशः । यथा हि तप्तल्लोहपिण्डादयगोलकात् विस्फुलिङ्गकाः तेजोवयवा निःसरन्ति । यद्यपि सूक्ष्मरूपेण प्रलयवेलायां प्रलीनास्तथाप्यात्मनः सकाशादविद्योपाधिभेदभिन्नतया जीवात्मानः प्रभवन्ति, पुनः कर्मवशात्स्थूलशरीराभिमानिनः जायन्ते ।

## बोधप्रश्नौ -

१. कस्मात्सकाशादात्मानः प्रभवन्ति ?

उत्तरं.........................................................

२. तप्तलोहपिण्डत्स्फुलिङ्गका इव के निःसरन्ति ?

उत्तरं.........................................................

## ४.८. जरायुजाण्डजादिचतुर्विधदेहपरिग्रहविचारः -

यथोक्तं याज्ञवल्क्येन -

तत्रात्मा हि स्वयं किंचित्कर्म किंचित्स्वभावतः ।
करोति किञ्चिदभ्यासाद्धर्माधर्मोभयात्मकम् ।। ३.६८

यद्यपि तस्यामवस्थायां परिस्पन्दात्मकक्रियाभावः तथापि धर्माधर्मव्यवसायात्मकं कर्म मानसं भवत्येव। तस्य च विशिष्टशरीरग्रहणहेतुरस्त्येव, 'वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्' इति मनुस्मरणात्। एवं गृहीतवपुः अन्वयव्यतिरेकनिरपेक्षः सन् किञ्चिदभ्यासवशाद्धर्माधर्मोभयरूपं करोति। तथा च स्मृत्यन्तरे - प्रतिजन्म यदभ्यस्तं दानमध्ययनं तपः । तेनैवाभ्यासयोगेन तदेवाभ्यसते पुनः ।। एवं जीवानां कर्मवैचित्र्यात्तत्कृतं जरायुजादिदेहवैचित्र्यं युज्यत एव ।

### बोधप्रश्नौ -

१. आत्मा कथं कर्म करोति ?

उत्तरं...............................................................

२. आत्मा कीदृशं कर्म करोति ?

उत्तरं...............................................................

## ४.९. आत्मसृष्टिव्यवहारः -

याज्ञवल्क्य आह -

निमित्तमक्षरः कर्ता बोद्धा ब्रह्म गुणी वशी ।
अजः शरीरग्रहणात्स जात इति कीर्त्यते ।। ३.६९

सत्यमात्मा सकलजगत्प्रपञ्चाविर्भावे अविद्यासमावेशवशात्समवाय्यसमवायिनिमित्तमित्येवं स्वयमेव त्रिविधमपि कारणम्, अक्षरोऽविनश्वरः, आत्मैव कर्ता, जीवोपभोग्यसुखदुःखहेतुभूतादृष्टादेर्बोद्धा, स एव ब्रह्म, न चासौ निर्गुणः, यतस्तस्य त्रिगुणशक्तिरविद्या प्रकृतिप्रधानाद्यपरपर्याया विद्यते । आत्मैव वशी प्रमाणान्तराभावात्स्वतन्त्रः। तथा अजःउत्पत्तिरहितः । ततस्तस्य यद्यपि साक्षाज्जननं नोत्पद्यते तथापि शरीरग्रहणमात्रेण जात इत्युच्यते अवस्थान्तरयोगितयोत्पत्तेर्गृहस्थो जात इतिवत् ।

### बोधप्रश्नः -

१. आत्मा जात इति कथमुच्यते ?

उत्तरं...............................................................

## ४.१०. आत्मनः शरीरग्रहणप्रकारः -

यथोक्तं याज्ञवल्क्येन -

सर्गादौ स यथाकाशं वायुं ज्योतिर्जलं महीम् ।
सृजत्येकोत्तरगुणांस्तथादत्ते भवन्नपि ।। ३.७०

सृष्टिसमये स परमात्मा यथाकाशादीन् शब्दैकगुणं गगनं शब्दस्पर्शगुणः पवनः, शब्दस्पर्शरूपगुणं तेजः, शब्दस्पर्शरूपरसगुणवदुदकम्, शब्दस्पर्शरूपरसगन्धगुणा जगतीत्येवमेकोत्तरगुणान् सृजति । तथात्मा जीवभावमापन्नः भवन्नुत्पद्यमानोऽपि स्वशरीरस्यारम्भकत्वेनापि गृह्यते ।

कथं शरीरारम्भकत्वं पृथिव्यादीनामित्युक्ते उच्यते - यजमानैः प्रक्षिप्तया आहुत्या पुरोडाशादिरसेनाप्यायते सूर्यः । सूर्याच्च कालवशेन परिपक्वाज्यादिहवीरसाद्वृष्टिः भवति । ततो व्रीह्याद्यौषधिरूपमन्नम् । तच्चान्नं सेवितं सत् रसरुधिरादिक्रमेण शुक्रशोणितभावमापद्यते । ततः ऋतुवेलायां स्त्रीपुंसयोर्योगे शुक्रं च शोणितं च शुक्रशोणितं तस्मिन्परस्परसंयुक्ते विशुद्धे स्थित्वा पञ्चधातून् पृथिव्यादिपञ्चमहाभूतानि शरीरारम्भकतया स्वयं षष्ठश्चिदात्मा प्रभुः शरीरारम्भकारणादृष्टकर्मयोगितया समर्थो युगपदादते । यथोक्तं याज्ञवल्क्येन -

स्त्रीपुंसयोस्तु संयोगे विशुद्धे शुक्रशोणिते ।
पञ्चधातून्स्वयं षष्ठ आदत्ते युगपत्प्रभुः ।। ३.७१
किञ्च, इन्द्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः ।
धारणा प्रेरणं दुःखमिच्छाहंकार एव च ।। ३.७३
प्रयत्न आकृतिर्वर्णः स्वरद्वेषौ भवाभवौ ।
तस्यैतदात्मजं सर्वमनादेरादिमिच्छतः ।। ३.७४

तस्य अनादेरात्मनः नित्यस्यादिमिच्छतः शरीरं जिघृक्षमाणस्य सर्वमेतत् इन्द्रियादिकम् आत्मजनितं प्राग्भवीयकर्मबीजजन्यमित्यर्थः ।

## बोधप्रश्नाः -

१. आत्मा कथं स्वशरीरस्यारम्भकत्वेन गृह्यते ?

उत्तरं.............................................................

२. सूर्यः कया आप्यायते ?

उत्तरं.............................................................

३. कस्माद्वृष्टिः जायते ?

उत्तरं.............................................................

## ४.११. संयुक्तशुक्रशोणितस्य कार्यरूपपरिणतौ क्रमः -

असौ चेतनः षष्ठः धातुविमूर्च्छितः पृथिव्यादिषु लोलीभूतः प्रथमे गर्भमासि संक्लेदभूतः

द्रवरूपतां प्राप्त एवावतिष्ठते । द्वितीये मासे अर्वुदमीषत्कठिनमांसपिण्डरूपं भवति । तृतीये तु मासि अङ्गैरिन्द्रियैश्च संयुक्तो भवति । यथोक्तं -

प्रथमे मासि संक्लेदभूतो धातुविमूर्च्छितः ।
मास्यर्वुदं द्वितीये तु तृतीयेऽङ्गेन्द्रियैर्युतः ।। ३.७५

किञ्च, आत्मा गगनाल्लघिमानं, सौक्ष्म्यं शब्दविषयम्, श्रोत्रम्, बलम्, पवनात्स्पर्शेन्द्रियम्, चेष्टाम्, व्यूहनमङ्गानां विविधप्रसारणम्, कर्कशत्वम्, पित्तात् तेजसः दर्शनम्, पंक्तिम् (पचनम्) औष्ण्यम्, रूपम्, प्रकाशिताम्, एवं रसात् रसनम् । शैत्यम, स्नेहम्, क्लेदम्, आर्दवम्, तथा भूमेः गन्धं घ्राणेन्द्रियं गरिमाणं मूर्त्तिं च गृहणाति । सर्वमेतत् परमार्थतः जन्मरहितोऽप्यात्मा तृतीये मासि गृहणाति । ततः चतुर्थे मासि स्पन्दते चलति ।

किञ्च, गर्भस्यैकं हृदयं गर्भिण्याश्चापरमित्येवं द्विहृदया तस्याः स्त्रियाः यदभिलषितं तत् दौहृदं, तस्याप्रदानेन गर्भः विरूपतां मरणरूपं वा दोषं प्राप्नोति । तस्मात्तद्दोषपरिहारार्थं गर्भपुष्ट्यर्थञ्च गर्भिण्याः स्त्रियाः यत्प्रियमभिलषितं तत्संपादनीयम् ।

किञ्च तृतीये मासि प्रादुर्भूतस्याङ्गसङ्घस्य चतुर्थे मासि स्थैर्यं भवति । पञ्चमे लोहितस्योत्पत्तिः । तथा षष्ठे बलस्य वर्णस्य नखरोम्णाञ्च च संभवः । असौ पूर्वोक्तः गर्भः सप्तमे मासि मनसा चेतसा चेतनया युक्तों नाडिभिः स्नायुभिः शिराभिः संयुक्तो भवति । सप्तमे तथा अष्टमे मासि त्वचा मांसेन स्मृत्या च युक्तो भवति । किञ्च, तस्य अष्टममासिकस्य गर्भस्यौजः कश्चन गुणविशेषः धात्रीं गर्भञ्च प्रति शीघ्रतया गच्छति । ततोऽष्टमे मासि जातः गर्भः प्राणैर्वियुज्यते । एवं करचरणचक्षुरादिपरिपूर्णाङ्गेन्द्रियो नवमे दशमे वापि मासे प्रवलैः सूतिमारुतैः प्रेरितस्नाय्वस्थिचर्मादिनिर्मितवपुर्यन्त्रस्य छिद्रेण सज्वरः दुसहदुःखाभिभूयमानः निःसार्यते धनुर्यन्त्रेण वाण इव ।

**बोधप्रश्नाः -**

१. कस्मिन् मासि संक्लेदभूतः आत्मा द्रवरूपतां गृहणाति ?

उत्तरं..........................................................

२. आत्मा कस्मिन् मासि कठिनमांसपिण्डरूपं दधाति ?

उत्तरं..........................................................

३. आत्मा कस्मिन् मासि इन्द्रियैर्युक्तो भवति ?

उत्तरं..........................................................

## ४.१२. कायस्वरूपम् -

यथोक्तं याज्ञवल्क्येन -

तस्य षोढा शरीराणि षट् त्वचो धारयन्ति च ।

षडङ्गानि तथाऽस्थ्नां च सह षष्ट्या शतत्रयम् ।। ३.८४

तस्यात्मनः यानि जरायुजाण्डजशरीराणि तानि प्रत्येकं षट्प्रकारकाणि रक्तादिषड्धातुपरिपाकहेतु-भूतषडग्निस्थानयोगित्वेन, तानि शरीराणि षट् त्वचः धारयन्ति रक्तमांसमेदोऽस्थिमज्जाशुक्राख्याः षड्धातव एव बाह्याभ्यन्तररूपेण स्थिताः षट् त्वचः धारयन्ति । तथाङ्गानि च षडेव करयुग्मं चरणयुगलमुत्तमाङ्गं गात्रमिति। अस्थ्नां तु षष्ठिसहितं शतत्रयमवगन्तव्यम् ।

किञ्च, स्थालैः सह चतुः षष्टिर्दन्ता वै विंशतिर्नखाः ।

पाणिपादशलाकाश्च तेषां स्थानचतुष्टयम् ।। ३.८५

षष्ट्यङ्गुलीनां द्वे पार्ष्ण्योर्गुल्फेषु च चतुष्टयम् ।

चत्वार्यरत्निकास्थीनि जङ्घयोस्तावदेव तु ।। ३.८६

द्वे द्वे जानुकपोलोरुफलकांससमुद्भवे ।

अक्षतालूषके श्रेणीफलके च विनिर्दिशेत् ।। ३.८७

भगास्थ्येकं तथा पृष्ठे चत्वारिंशच्च पञ्च च ।

ग्रीवा पञ्चदशास्थिः स्याज्जत्र्वेकं तथा हनुः ।। ३.८८

तन्मूले द्वे ललाटाक्षिगण्डे नासा घनास्थिका ।

पार्श्वकाः स्थालकैः सार्धमर्बुदैश्च द्विसप्ततिः ।। ३.८९

किञ्चः भ्रूकर्णयोः मध्यप्रदेशावस्थितविशेषौ शङ्खकौ शिरसः संबन्धीनि चत्वारि कपालानि ।उरो वक्षः, तत्सप्तदशास्थिकमित्येवं त्रयोविंशतिः ।पूर्वोक्तैश्च सह षष्ट्यधिकं शतत्रयमित्येवं पुरुषस्यास्थिसंग्रहः कथितः ।

## बोधप्रश्नाः -

१. आत्मनः शरीराणि कति ?

उत्तरं..........................................................

२. आत्मनः त्वचः कति ?

उत्तरं..........................................................

३. आत्मनः अङ्गानि कति ?

उत्तरं..........................................................

४. आत्मनः शरीराणि कति अस्थीनि धारयन्ति ?

उत्तरं...........................................................

## ४.१३. सविषयाणि ज्ञानेन्द्रियाणि -

यथोक्तं याज्ञवल्क्येन -

गन्धरूपरसस्पर्शशब्दाश्च विषयाः स्मृताः

नासिका लोचने जिह्वा त्वक् श्रोत्रं चेन्द्रियाणि च ।। ३.९१

एते गन्धादयो विषयाः पुरुषस्य बन्धनहेतवः, 'विषय'शब्दस्य षञ् बन्धने धातोर्व्युत्पन्नत्वात् । एतैश्च गन्धादिभिर्बोध्यत्वेन व्यवस्थितैः स्वस्वगोचरसंवित्साधनतयानुमेयानि घ्राणादीनि पञ्चेन्द्रियाणि भवन्ति ।

## बोधप्रश्नाः -

१. विषयाः कति, ते च के ?

उत्तरं...........................................................

२. के बन्धनहेतवः ?

उत्तरं...........................................................

३. ज्ञानेन्द्रियाणि कति, तानि च कानि ?

उत्तरं...........................................................

## ४.१३.१. कर्मेन्द्रियाणि -

यथा - हस्तौ पायुरुपस्थं च जिह्वा पादौ च पञ्च वै ।

कर्मेन्द्रियाणि जानीयान्मनश्चैवोभयात्मकम् ।। ३.९२

अर्थः सुष्पष्टः ।

## ४.१३.२. प्राणस्थानानि -

याज्ञवल्क्य आह -

नाभिरोजो गुदं शुक्रं गोणितं शङ्खकौ तथा ।

मूर्धांसकण्ठहृदयं प्राणस्यायतनानितु ।। ३.९३

नाभिप्रभृतीनि दश प्राणस्य स्थानानि । समाननाम्नः पवनस्य सकलाङ्गसंचारित्वेऽपि नाभ्यादिस्थानविशेषवाचोक्तिः प्राचुर्याभिप्राया । किञ्च स्थानानां वर्णनम् - यथाह याज्ञवल्क्यः -

वपा वसावहननं नाभिः क्लोम यकृत्प्लिहा ।

क्षुद्रान्त्रं वृक्ककौ बस्तिः पुरीषाधानमेव च ।। ३.९४

आमाशयोऽथ हृदयं स्थूलान्त्रं गुद एव च ।
उदरं च गुदौ कोष्ठ्यौ विस्तारोऽयमुदाहृतः ।। ३.९५

अयं प्राणायतनस्य विस्तार उक्तः ।

पुनश्चोक्तम् -

कनीनिके चाक्षिकूटे शष्कुली कर्णपत्रकौ ।
कर्णौ शङ्खौ भ्रुवौ दन्तवेष्टावोष्ठौ ककुन्दरे ।। ३.९६
वङ्क्षणौ वृषणौ वृक्कौ श्लेष्मसंघातजौ स्तनौ ।
उपजिह्वास्फिजौ बाहू जङ्घोरुषु च पिण्डिका ।। ३.९७
तालूदरं बस्तिशीर्षं चिवुके गलशुण्डिके ।
अवटश्चैवमेतानि स्थानान्यत्र शरीरके ।। ३.९८
अक्षिकर्णचतुष्कं च पद्धस्तहृदयानि च ।
नवच्छिद्राणि तान्येव प्राणस्यायतनानि तु ।। ३.९९

एवमेतानि कुत्सिते शरीरे स्थानानि । तथाक्षियुगलं कर्णयुग्मं नासाविवरद्वयमास्यं पायुरुपस्थमित्येतानि पूर्वोक्तानि नवच्छिद्राणि च प्राणस्य आयतनान्येव ।

## बोधप्रश्नौ -

१. प्राणस्थानानि कति तानि च कानि ?

उत्तरं...........................................................

२. नव च्छिद्राणि कस्य आयतनानि ?

उत्तरं...........................................................

## ४.१४. - शिरास्नायुधमनीपेशीनां संख्या -

यथोक्तं याज्ञवल्क्येन -

शिराः शतानि सप्तैव नव स्नायुशतानि च ।
धमनीनां शते द्वे तु पञ्च पेशीशतानि च ।। ३.१००

शिराः वातपित्तश्लेष्मवाहिन्यः सप्तशतसंख्या भवन्ति । स्नायवः नवशतानि । धमन्यः चतुर्विंशतिसंख्याः प्राणादिवायुवाहिन्यः शाखाभेदेन द्विशतं भवन्ति । पेश्यः मांसलाकाराः पञ्चशतानि भवन्ति ।

## ४.१४.१. शिरादीनां शाखाप्राचुर्येण संख्यान्तरम् -

शिरा धमन्यः मिलिताः शाखोपशाखाभेदेन एकोनत्रिंशल्लक्षाणि तथा नवशतानि

षट्पञ्चाशच्च भवन्ति।

किञ्च, शरीरिणां श्मश्रूणि केशाश्च मिलिता: सन्तस्त्रयो लक्षाविज्ञेया: । मर्माणि क्लेशकराणि स्थानानि सप्तोत्तरं शतम् । अस्थ्नां तु द्वे सन्धिशते स्नायुशिरादिसन्धय: पुनरनन्ता: ।

## ४.१४.२. सकलशरीरसुषिरादिसंख्या -

यथोक्तं याज्ञवल्क्येन -

रोम्णां कोट्यस्तु पञ्चशच्चतस्र: कोट्य एव च ।
सप्तषष्टिस्तथा लक्षा: सार्धा: स्वेदायनै: सह ।। ३.१०३
वायवीयैर्विगण्यन्ते विभक्ता: परमाणव: ।
यद्यप्येकोऽनुवेत्त्येषां भावनां चैव संस्थितिम् ।। ३.१०४

पूर्वोदितशिराकेशादिसहितानां रोम्णां परमाणव: सूक्ष्मसूक्ष्मतररूपा भागा स्वेदस्रवणसुषिरै: सह चतु:पञ्चाशत्कोट्य: सप्तोत्तरषष्टिलक्षा: सार्धा: पञ्चाशत्सहस्रसहिता: वायवीयैर्विभक्ता: पवनपरमाणुभि: पृथकतया विगण्यन्ते ।

## बोधप्रश्ना: -

१. धमनीनां संख्या कति ?

उत्तरं..........................................................

२. शरीरिणां श्मश्रुकेशा: कतिलक्षपरिमिता: विज्ञेया: ?

उत्तरं..........................................................

३. रोम्णां संख्या कति ?

उत्तरं..........................................................

## ४.१५. शरीररसादिपरिमाण: -

सम्यक्परिणताहारस्य सार: रस: तस्य परिमाणं नवाञ्जलय: । जलस्याञ्जलय: दश विज्ञेया: । पुरीषस्य सप्तैव । रक्तस्य अष्टौ । श्लेष्मण: कफस्य षडञ्जलय: । पित्तस्य तेजस: पञ्च । मूत्रस्योच्चारणस्य चत्वार: । वसाया: मांसस्नेहस्य त्रय: । मेदस: द्वावञ्जली । मज्जात्वस्थिगतसुषिरगतस्तस्यैकोऽञ्जलि: । मस्तके पुन: अर्धाञ्जलि: मज्जा श्लेष्मौजस: श्लेष्मसारस्य । तथा रेतस: चरमधातो: अर्धाञ्जलिरेव । तस्मादीदृशकुत्सितशरीरस्य आत्यन्तिकविनिवृत्त्यर्थमात्मोपासने प्रयतितव्यम् ।

## बोधप्रश्ना: -

१. रसस्य परिमाणं कति ?

उत्तरं..............................................................

२. जलस्य रसपरिमाणं कति ?

उत्तरं..............................................................

३. पुरीषस्य रसपरिमाणं कति ?

उत्तरं..............................................................

## ४.१६. उपासनीयात्मस्वरूपम् -

यथोक्तं याज्ञवल्क्येन -

द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः ।
हिताहिता नाम नाड्यस्तासां मध्ये शशिप्रभवम् ।।
मङ्गलं तस्य मध्यस्थ आत्मा दीप इवाचलः ।
स ज्ञेयस्तं विदित्वेह पुनराजायते न तु ।। ३.१०९

हृदयप्रदेशादभिनिःसृताः हिताहितेतिसंज्ञा द्वासप्ततिसहस्राणि नाड्यः भवन्ति ।अपरस्तिस्रो नाड्यः तासामिडापिङ्गलाख्ये द्वे नाड्यौ सव्यदक्षिणपार्श्वगते हृदि नासाविवरसम्बद्धे प्राणापानायतने ।सुषुम्नाख्या पुनः तृतीया दण्डवन्मध्ये ब्रह्मरन्ध्रविनिर्गता ।तासां नाडीनां मध्ये मण्डलं चन्द्रप्रभं तस्मिन्नात्मा निर्वातस्थदीप इवाचालः प्रकाशमान आस्ते । यतस्तत्साक्षात्करणादिह संसारे न पुनः संसरति अमृतत्वं प्राप्नोति ।

किञ्च, चित्तवृत्तेर्विषयान्तरतिरस्कारेणात्मनि स्थैर्यं योगस्तत्प्राप्त्यर्थं बृहदारण्यकाख्यमादित्याद्यन्मया प्राप्तं तच्च ज्ञातव्यम् ।

कथं पुनरात्मा ध्यातव्य इत्युक्ते उच्यते -

अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम् ।
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत्प्रभुः ।। ३.१११

आत्मव्यतिरिक्तविषयेभ्यो मनोबुद्धिस्मृतीन्द्रियाणि प्रत्याहृत्य आत्मैकविषयाणि कृत्वा आत्मा ध्येयः। योऽसौ प्रभुर्निर्वातस्थप्रदीपवद्दीप्यमानो निष्प्रकम्पो हृदि तिष्ठति ।

यस्य पुनः चित्तवृत्तिर्निराकारालम्बनतया समाधौ नाभिरमते तेन शब्दब्रह्मोपसनं कार्यम् -

यथोक्तं याज्ञवल्क्येन -

यथाविधानेन पठन्सामगायमविच्युतम् ।
सावधानस्तदभ्यासात्परं ब्रह्माधिगच्छति ।। ३.११२

स्वाध्यायावगतमार्गानतिक्रमेण विधिपूर्वकं नियमितरूपेण ससावधानः आत्मैकाग्रचित्तवृत्तिः सामगानकारी शब्दाकारशून्योपासनेन परं ब्रह्माधिगच्छति । तदुक्तम् - 'शब्दब्रह्मणि निष्णातः परं ब्रह्मण्यधिगच्छति' ।

## बोधप्रश्नाः -

१. कस्य स्वरूपमुपासनीयम् ?

उत्तरं..........................................................

२. कः दीप इवाचलः ?

उत्तरं..........................................................

३. नाड्यः कति सन्ति ?

उत्तरं..........................................................

४. संसारे कथममृतत्वं प्राप्यते ?

उत्तरं..........................................................

५. आत्मा कथं ध्यातव्यः ?

उत्तरं..........................................................

६. केन शब्दब्रह्मोपासनं कार्यम् ?

उत्तरं..........................................................

७. कः परंब्रह्मण्यधिगच्छति ?

उत्तरं..........................................................

## ४.१७. सारांशः -

अस्मिन् खण्डे चतुर्थाध्याये यतिधर्माः निरूपिता । अधिकारिधर्माः प्रतिपादिताः । भिक्षाटनविधिरालोचितः। यतिपात्राणि निरूपितानि । इन्द्रियनिरोधोपायतया संसारस्वरूपं पतिपादितम्। जीवपरमात्मनोः भेदाभावो निदर्शितः । जरायुजाण्डजादिचतुर्विधदेहपरिग्रहविचारो विहितः । आत्मसृष्टिव्यवहारः निरूपितः । आत्मनः शरीरग्रहणप्रकारः विचारितः । संयुक्तशुक्रशोणितस्य कार्यरूपपरिणतौ क्रमः प्रदर्शितः। कायस्वरूपं विचारितम् । सविषयाणीन्द्रियाण्यालोचितानि । प्राणस्थानानि निरूपितानि । शिरास्नायुधमनीपेशीनां संख्या निर्धारिता । सकलशरीरसुषिरादिसंख्या वर्णिता । शारीररसादिपरिमाणः प्रदर्शितः । उपासनीयात्मस्वरूपं विवेचितम् । शब्दब्रह्मोपासनं विचारितञ्चेति ।

## ४.१८. पारिभाषिकशब्दाः -

| | | |
|---|---|---|
| शान्तः | - | बाह्यान्तःकरणोपरतः |
| दण्डः | - | वैणवः |
| मुण्डः | - | अममोऽक्रोधोऽपरिग्रहः |
| एकारामः | - | प्रव्रजितान्तरेणासहायः सन्यासिनीभिः स्त्रीभिश्च |
| अप्रमतः | - | वाक्चक्षुरादिचापलरहितः |
| अनभिलक्षितः | - | ज्योतिर्विज्ञानोपदेशादिना अचिह्नितः |
| अलोलुपः | - | मिष्टान्नव्यञ्जनादिष्वप्रसक्तः |
| आधयः | - | मनोपीडा |
| क्लेशाः | - | अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च |
| योगः | - | चित्तवृत्तिनिरोधः |
| आत्मैकाग्रता | - | ध्यानम् |
| क्षेत्रज्ञः | - | आत्मा |
| सत्यं | - | यथार्थप्रियवचनम् |
| धृतिः | - | इष्टवियोगेऽनिष्टप्राप्तौ प्रचलितचित्तस्य यथापूर्वमवस्थापनम् |
| विद्या | - | आत्मज्ञानम् |
| व्यूहनम् | - | अङ्गनां विविधप्रसारणम् |
| मनः | - | अभयसाधारणम् |
| ज्ञानम् | - | अवगमः |
| आयुः | - | कालविशेषावच्छिनं जीवनम् |
| सुखम् | - | निवृत्तिः |
| धृत्तिः | - | चित्तधैर्यम् |
| धारणा | - | प्रज्ञा मेधा च |
| प्रेरणम् | - | ज्ञानकर्मेन्द्रियाणामधिष्ठातृत्वम् |
| दुःखम् | - | उद्वेगः |
| वर्णः | - | गौरिमादिः |
| स्वरः | - | षड्जगान्धारादिः |
| भवः | - | पुत्रपश्चादिविभवः |

स्थालानि - दन्तमूलप्रदेशस्थान्यस्थीनि

शलाका - काराण्यस्थीनि

## ४.१९. आदर्शप्रश्नाः -

### निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः)

१. यतिधर्मान् ग्रन्थोक्तदिशा प्रतिपादयत ।

२. इन्द्रियनिरोधोपायतया संसारस्वरूपं विज्ञानेश्वरदिशा आलोचयत ।

३. कायस्वरूपं याज्ञवल्क्यमतानुसारमालोचयत ।

### विश्लेषणात्मकप्रश्नाः - (प्रत्येकं १२/१० अङ्काः)

१. धतिधर्मेऽधिकारिधर्मानालोचयत ।

२. जीवपरमात्मनोः भेदाभवरूपं निरूपयत ।

३. जरायुजाण्डजादिचतुर्विधदेहपरिग्रहप्रकारं विशदयत ।

### लघुप्रश्नाः - (प्रत्येकं ५ अङ्काः)

१. आत्मसृष्टिं विमृशत ।

२. संयुक्तशुक्रशोणितस्य कार्यरूपपरिणतौ क्रमं निरूपयत ।

३. सविषयणि ज्ञानेन्द्रियाणि विमृशत ।

४. शरीररसादिपरिमाणमालोचयत ।

५. शब्दब्रह्मोपासनं याज्ञवल्क्यदिशा विशदयत ।

### एकाङ्कप्रश्नाः - (प्रत्येकं १ अङ्कः)

१. मोक्षशब्देन कः आश्रमः बोध्यते ?

२. ऋणानि कति ?

३. कः ग्राममाश्रयते ?

४. यतिः कदा भैक्षमाचरेत् ?

५. यतिः कथं भिक्षामश्नीयात् ?

६. यतिपात्राणां शुद्धेः कारणं किम् ?

७. ज्ञानेन्द्रियाणि कति ?

८. कैः गुणैः सर्वो धर्मोऽनुष्ठीयते ?

९. देहपरिग्रहः कतिविधः ?

१०. आत्मनः शरीराणि कति ?

## ४.२०. एकाङ्कप्रश्नानामुत्तराणि -

१. चतुर्थाश्रमः, २. त्रीणि, ३. भिक्षार्थी, ४. सायाह्ने, ५. वाग्यतः, ६. सलिलम्, ७. पञ्च, ८. आत्मगुणैः, ९. चतुर्विधः, १०. षट् ।

# षष्ठपत्रम्

## प्रथमखण्डः पञ्चमभागः ( Unit - V)

## (वीणादिवाद्यद्वारा मोक्षमार्गप्राप्तिमारभ्य अध्यात्मप्रकरणसमाप्तिं यावत्)

### ५.१. प्रस्तावना -

अस्मिन् खण्डे पञ्चम-भागे यतिधर्मप्रकरणे लौकिकगीतानुस्मृतात्मोपासनम्, चित्तविक्षेपाद्यन्तरायहतस्य गीतज्ञस्य फलान्तरम् । मुनिभिः पृष्टः प्रत्युत्तरम्, आत्मनः निर्मुक्तिः, आत्मनः जगज्जन्म, कर्मानन्तरं फलभोक्तृत्वविचारः, सत्त्वादिगुणपरिपाकः, आत्मनः जगत्सृष्टिः, उपासनाविशेषविध्यर्थं संसारस्य रूपम्, शरीरग्रहणद्वारेण कथं पुनस्तस्य विस्रम्भः, अमृतत्वप्राप्तिविचारः, अजातिस्मरस्य गतिः, मोक्षमार्गः स्वर्गमार्गः, संसरणमार्गः, क्षेत्रज्ञस्वरूपम्, बुद्ध्यादेरुत्पत्तिः, गुणस्वरूपम्, प्राप्तिमार्गः, पितृयानम्, उपासनाप्रकारः, धारणात्मकप्रयोगाभ्यासे प्रयोजनम्, यज्ञदानाद्यसंभवे सत्त्वशुद्धावुपायान्तरं चैते विषया आलोचिताः ।

### ५.२. उद्देश्यम् -

प्रियपाठकाः ! भवन्तः अस्मिन् खण्डे पञ्चमभागे अधोलिखितान् विन्दून् पठिष्यन्ति ।

- लौकिकगीतानुस्मृतौ आत्मोपासनं निरूपयिष्यन्ति ।
- चित्तविक्षेपाद्यन्तरायहतस्य गीतज्ञस्य फलान्तरं प्रतिपादयिष्यन्ति ।
- आत्मनः संसरणमनाद्यन्तत्वाद् निमुक्तिप्रसङ्गं विचारयिष्यन्ति ।
- आत्मनः जगज्जन्म प्रतिपादयितुमर्हन्ति ।
- कर्मानन्तरं फलभोक्तृत्वविचारं करिष्यन्ति ।
- सत्वादिगुणपरिपाकमालोचयिष्यन्ति ।
- उपासनाविशेषविध्यर्थं संसारस्य रूपं निर्णेष्यन्ति ।
- शरीरग्रहणद्वारेण पुनस्तस्य विस्रम्भमालोचिष्यन्ति ।
- अमृतत्वप्राप्तिविचारं करिष्यन्ति ।
- अजातिस्मरस्य गतिं निरूपयिष्यन्ति ।
- मोक्षमार्गं प्रतिपादयिष्यन्ति ।
- स्वर्गमार्गं निर्णेतुमर्हन्ति ।
- संसरणमार्गमालोचयिष्यन्ति ।

- b क्षेत्रज्ञस्वरूपं प्रतिपादयितुं प्रभवन्ति ।
- b बुद्ध्यादेरुत्पत्तिं निरूपयितुं शक्नुवन्ति ।
- b गुणस्वरूपं निर्णेतुं शक्नुवन्ति ।
- b प्राप्तिमार्गं निरूपयितुं प्रभवन्ति ।
- b पितृयानं प्रतिपादयितुमर्हन्ति ।
- b उपासनाप्रकारमालोचयितुं प्रभवन्ति ।
- b धारणात्मकप्रयोगाभ्यासे प्रयोजनं निर्णेतुमर्हन्ति ।
- b यज्ञदानाद्यसंभवे सत्त्वशुद्धावुपायन्तरं प्रदर्शयिष्यन्ति ।

## ५.३. लौकिकगीतानुस्मृतात्मोपासनम् -

यथोक्तं याज्ञवल्क्येन -

अपरान्तकमुल्लोप्यं मद्रकं प्रकरीं तथा ।
औवेणकं सरोविन्दुमुत्तरं गीतकानि च ।। ३.११३
ऋग्गाथा पाणिका दक्षविहिता ब्रह्मगीतिका ।
गेयमेतत्तदभ्यासकरणान्मोक्षसंज्ञितम् ।। ३.११४

अपरान्तकोल्लोप्य-मद्रक-प्रकरी-औवेणकानि सरोविन्दु-सहितं चोतरमित्येतानि सप्त गीतकानि। ऋग्गाथाद्याश्चतस्रो गीतिका इत्येतदपरान्तकादिगीतजातमध्यारोपितात्मभावं मोक्षसाधनत्वात् मोक्षसंगीतं मन्तव्यम्। तदभ्यासस्यैकाग्रतापादनद्वारेण आत्मैकतापत्तिकारणत्वात् ।

किञ्च, वीणावादनतत्वज्ञः श्रुतिजातिविशारदः (श्रूयत इति श्रुतिः द्वाविंशतिविधाः सप्तस्वरेषु, जातयस्तु षड्जादय सप्त शुद्धाः) तालज्ञश्च चित्तवृत्तेरात्मैकाग्रतायाः सुकरत्वादल्पायासेन एव मुक्तिपथं प्राप्नोति ।

## बोधप्रश्नाः -

१. गीतकानि कति ?

उत्तरं.........................................................................

२. किं तावद्मोक्षसंगीतं मन्तव्यम् ?

उत्तरं.........................................................................

३. कः मुक्तिपथं अल्पायासेन प्राप्नोति ?

उत्तरं.........................................................................

## ५.४. चित्तविक्षेपाद्यन्तरायहतस्य गीतज्ञस्य फलान्तरम् -

गीतज्ञः यदि कथंचिद्योगेन परमं पदं प्राप्नोति तर्हि रूद्रस्य सचिवः भूत्वा तेनैव सह क्रीडति । प्रागुक्तरीत्या अनादिरात्मा क्षेत्रज्ञस्तस्य च शरीरग्रहणमेवादिरुद्भवः कथितः 'अजः शरीरग्रहणाद्' इत्यत्र। परमात्मनश्च सकाशात्पृथिव्यादिसकलभुवनोद्भवः तस्मादुद्भूताच्च पृथिव्यादिभूतसंघाताज्जीवानां स्थूलशरीरतया संभवश्च ।

यदेतज्जगत् आत्मनः सकाशात्कथमुत्पन्नमिति मुनिभिः पृष्टे तदुत्तरं यथा -

मोहजालमुपास्येह पुरुषो दृश्यते हि यः ।
सहस्रकरपन्नेत्रः सूर्यवर्चाः सहस्रकः ।। ३.११९
स आत्मा चैव यज्ञश्च विश्वरूपः प्रजापतिः ।
विराजः सोऽन्नरूपेण यज्ञत्वमुपगच्छति ।। ३.१२०

इह जगति यदिदं मोहजालं तदपास्य तद्व्यतिरिक्तः य पुरुषःअनेककरचरणलोचनः अनन्तरश्मिः सहस्रकः बहुशिरा दृश्यते । एतच्च तत्तद्गोचरशक्त्याधारतयोच्यते; तस्य साक्षत्कारादिसंबन्धाभावात् । स एवात्मा यज्ञः प्रजापतिः, यतोऽसौ विश्वरूपः सर्वात्मकः । यस्मादसौ पुरोडाशाद्यन्नरूपेण यज्ञमुपगच्छति। यज्ञाच्च वृष्ट्यादिद्वारेण प्रजासृष्टिरित्येवं वैश्वरूप्यम् ।

किञ्च, द्रव्यस्य चरुपुरोडाशादेर्देवतोद्देशेन त्यागाद्यो रसः अदृष्टरूपमात्मनः परिणत्यनन्तरम् उत्तमः सकलजगज्जन्मबीजतयोत्कृष्टतमः संभूतः स देवान् संप्रदानकारकभूतान् सम्यक्प्रणयित्वा यजमानं चाभिलषितफलेन संयोज्य पवनेन प्रेर्यमाणः चन्द्रमण्डलं प्रति नीयते । ततः शशिमण्डलाद्रश्मिभिर्भानु- मण्डलम्। सा एषा त्रय्येव विद्या तपतीति अभेदाभिधानात् ऋग्यजुःसाममयं प्रत्युपनीयते । ततश्च खमण्डलादसौ सूर्योऽमृतरसं वृष्टिरूपमुत्तमं यत्सकलभूतानामशनानशनात्मनां चराचराणां जननिमित्तं तत्सृजति । तस्माद् वृष्टिसंपादितौषधिमयात्प्रजोत्पत्तिहेतोरन्नात्पुनर्यज्ञः; यज्ञाच्च पूर्वाभिहितभङ्ग्या पुनरन्नं,अन्नाच्च पुनः क्रतुरित्येवमखिलं संसारचक्रं प्रवाहरूपेणोत्पत्तिविनाशविरहितं सम्यक्परिवर्तत इत्यनेन क्रमेण आत्मनः सकाशादखिलजगदुत्पत्तिः। अत्र चात्मनः स्वकर्मानुरूपविग्रहपरिग्रहः ।

### बोधप्रश्नाः -

१. गीतज्ञः रुद्रस्य सचिवः भूत्वा केन सह क्रीडति ?

उत्तरं.............................................................

२. कस्मात्सकाशात्पृथिव्यादिसकलभुवनोद्भवः ?

उत्तरं.............................................................

३. कः विश्वरूपः ?

उत्तरं.............................................................

४. कस्मात् प्रजोत्पत्तिः संभवति ?

उत्तरं.............................................................

५. कस्मात् सकाशादखिलजगदुत्पत्तिः ?

उत्तरं.............................................................

## ५.५. आत्मनः संसरणमनाद्यन्तत्वादनिर्मुक्तिः -

यथोक्तं याज्ञवल्क्येन -

अनादिरात्मा संभूतिर्विद्यते नान्तरात्मनः ।
समवायी तु पुरुषो मोहेच्छाद्वेषकर्मजः ।। ३.१२५

यद्यप्यात्मनः अनादित्वात्संभूतिर्न विद्यते अन्तरात्मनः शरीरव्यापिनः तथापि पुरुषः शरीरेण समवायी भवति । स च समवायः मोहेच्छाद्वेषजनितकर्मनिर्मेयः ननु निसर्गजातः । तस्य कायत्वेन विनाशोत्पत्तेर्न निमुक्तिः स्यात् ।

## बोधप्रश्नः -

१. कः शरीरेण समवायी भवति ?

उत्तरं.............................................................

## ५.६. आत्मनः जगज्जन्म -

यद्यसौ सकलजीवात्मकतया प्रपञ्चात्मकतया च सहस्रात्मा बहुरूपस्तथा सकलजगद्धेतुतया आदिदेव उदाहृतः तस्य वदनभुजसक्थिचरणजाता यथाक्रममग्रजन्मादयः चत्वारो वर्णाः । तथा तस्य पादाद् भूमिः, मस्तकात्सुरसद्मः, घ्राणात्प्राणाः, कर्णात्ककुभः, स्पर्शात्पवनः, वदनाद्धुतवहः, मनसः शशाङ्कः, नेत्राद् भानुः, जघनाद्गगनम्, जङ्गमाजङ्गमात्मकं जगच्च जातम् ।

यद्यपि ईश्वरः स्वरूपेण सत्यज्ञानमनन्तलक्षणः तथापि अविद्यासमावेशवशान्मोह-रागादिभावैरभिभूयमानः नानाहीनयोनिजननसाधनं मानसादित्रिविधं कर्मनिचयमाचरति । यथोक्तं याज्ञवल्क्येन -

अन्त्यपक्षिस्थावरतां मनोवाक्कायकर्मजैः ।
दोषैः प्रयाति जीवोऽयं भवं योनिशतेषु च ।। ३.१३१

किञ्च, शरीरिणां जीवानां शरीरेषु भावा अभिप्रायविशेषाः

सत्त्वाद्युद्रेकतारतम्याद्यथाऽनन्तास्तथा तत्कार्याण्यपि रूपाणि कुब्जवामनत्वादीनि देहिनां सर्वयोनिषु भवन्ति । विषयेऽस्मिन् याज्ञवल्क्य आह।

अनन्ताश्च यथा भावा: शरीरेषु शरीरिणाम् ।

रूपाण्यपि तथैवेह सर्वयोनिषु देहिनाम् ।। ३.१३२

## बोधप्रश्ना: -

१. सकलजगद्धेतु: क: ?

उत्तरं.........................................................................

२. वर्णा: कति ?

उत्तरं.........................................................................

३. ईश्वर: स्वरूपेण कतिविधं कर्मनिचयमाचरति ?

उत्तरं.........................................................................

## ५.७. कर्मानन्तरं फलभोक्तृत्वविचार: -

यथोक्तं याज्ञवल्क्येन -

विपाक: कर्मणां प्रेत्य केषांचिदिह जायते ।

इह वाऽमुत्र वैकेषां भावस्तत्र प्रयोजनम् ।। ३.१३३

केषांचिज्ज्योतिष्टोमादिकर्मणां विपाक: (फलं) प्रेत्य देहान्तरे भवति । केषांचित्कारीर्यादिकर्मणां वृष्ट्यादिफलमिहैव भवति । केषांचिच्चित्रादीनां फलं पश्वादिकमिह देहान्तरे वेत्यनियतम् । अत्र च कर्मणां शुभाशुभफलजनकत्वे सत्त्वादिभाव एव प्रयोजकभूत: ।

परधनानि कथमहमपहरेयमित्याभिमुख्येन ध्यायंस्तथाऽनिष्टानि ब्रह्महत्यादीनि हिंसात्मकानि करिष्यामीति चिन्तयन् वितथेऽभिनिवेश: पुन: पुन: संकल्पस्तदांश्च श्वचण्डालाद्यन्त्ययोनिषु जायते ।

किञ्च, यस्त्वनृतवदनशील: पुरुष: पिशुन: परुष: परोद्वेगकरभाषी अनिबद्धप्रलापी च मृगपक्षिषु जायन्ते - यथा आह -

पुरुषोऽनृतवादी च पिशुन: परुषस्तथा ।

अनिबद्धप्रलापी च मृगपक्षिषु जायते ।। ३.१३५

किञ्च, अदत्तादाननिरत: अदत्तपरधनापहरणप्रसक्त: परदारप्रसक्त: च अविहितमार्गेण प्राणिनां घातकश्च दोषगुरुलघुभावतारतम्यात्तरुलतापूतानादिस्थावरेषु जायते ।

## बोधप्रश्ना: -

१. इह वाऽमुत्रजनने किं तावत्प्रयोजनम् ?

उत्तरं.........................................................

२. पुरुषः किं कृत्वा अन्त्यासु योनिषु जायते ?

उत्तरं.........................................................

३. के पुरुषाः मृगपक्षिषु जायन्ते ?

उत्तरं.........................................................

४. कस्तावत् स्थावरेषु जायते ?

उत्तरं.........................................................

## ५.८. सत्त्वादिगुणपरिपाकः -

आत्मज्ञः विद्याधनाभिजनाद्यभिमानरहितः, शौचवान्, दान्तः तपस्वी, तथा इन्द्रियार्थेषु अप्रसक्तः, नित्यनैमित्तिकधर्मानुष्ठाननिरतः वेदार्थवेदी च यः सात्विकः । स च सत्त्वद्रेकतारतम्यवशात् उत्कृष्टोत्कृष्टतरसुरयोनितां प्राप्नोति। किञ्च -

असत्कार्यरतोऽधीर आरम्भी विषयी च यः ।
स राजसो मनुष्येषु मृतो जन्माधिगच्छति ।।
निद्रालुः क्रूरकृल्लुब्धो नास्तिको याचकस्तथा ।
प्रमादवान् भिन्नवृत्तो भवेत्तिर्यक्षु तामसः ।। ३.१३९

एवमविद्याविद्धोऽयमात्मा रजस्तमोभ्यां सम्यगाविष्ट इह संसारे पर्यटन् नानाविधदुःखप्रदैर्भावैः अभिभूतः पुनः पुन संसारं प्राप्नोति ।

पुनश्च यद्यपि आत्मा अन्तःकरणादिज्ञानसाधनसंपन्नः तथापि जन्मान्तरानुभूतार्थावबोधे न समर्थः; यथा दर्पणः मलच्छन्नः रूपज्ञानोत्पादनसमर्थः न भवति । यथोक्तं याज्ञवल्क्येन -

मलिनो हि यथाऽऽदर्शो रूपालोकस्य न क्षमः ।
तथाऽविपक्वकरण आत्मज्ञानस्य न क्षमः ।। ३.१४१

यः पुनः देही देहाभिमानयुक्तः, स सर्वाश्रयामाध्यात्मिकादिरूपां वेदनां स्वकर्मोपार्जित एव देहे प्राप्नोति, न देहान्तरागतां भोगायतनारम्भादृष्टवैलक्षण्यादेव, यस्तु योगी मुक्ताहंकारादिः सकलक्षेत्रज्ञगतानां सुखदुःखादिसंविदां वेदिता भवति परिपक्वकरणत्वात् ।

### ५.८.१. एकस्मिन्नात्मनि सुरनरादिदेहेषु न भेदप्रत्ययः -

यथोक्तं याज्ञवल्क्येन -

आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।

तथात्मैको ह्यनेकश्च जलाधारेष्विवांशुमान् ।। ३.१४४

आकाशसूर्ययोरिव एकोऽपि आत्मा अन्तःकरणोपाधिभेदेन नाना प्रतीयते ।

किञ्च, 'पञ्चधातून्स्वयं षष्ठ आदत्ते युगपत्प्रभुः' इत्यस्यार्थः याज्ञवल्क्येनोच्यते -

ब्रह्मखानिलतेजांसि जलं भूश्चेति धातवः ।

इमे लोका एष चात्मा तस्माच्च सचराचरम् ।। ३.१४५

ब्रह्म आत्मा, खं गगनं, अनिलो वायुः, तेजोऽग्निः, जलं प्रसिद्धम्, भूश्चेत्येते वातादिधातव एव शरीरं व्याप्य धारयन्ति । तत्र खादयः पञ्च धातवः लोक्यन्ते दृश्यन्ते इति लोकाः । एष चिद्धातुरात्मा एतस्माज्जडाजडसमुदायात्स्थावरजङ्गमात्मकं जगदुत्पद्यते ।

## ५.८.२. आत्मन आत्मसृष्टिः -

यथोक्तं याज्ञवल्क्येन -

मृद्दण्डचक्रसंयोगात्कुम्भकारो यथा घटम् ।

करोति तृणमृत्काष्ठैर्गृहं वा गृहकारकः ।। ३.१४६

हेममात्रमुपादाय रूपं वा हेमकारकः ।

निजलालासमायोगात्कोशं वा कोशकारकः ।। ३.१४७

कारणान्येवमादाय तासु तास्विह योनिषु ।

सृजत्यात्मानमात्मा च संभूयकारणानि च ।। ३.१४८

यथा हि कुलाल - गृहकारक - हेमकारक - कौशकारकाश्च तन्निमितकरणैः स्वकर्माणि कुर्वन्ति, तथैव करणान्यपि श्रोत्रादीन्युपादाय अस्मिन्संसारे तासु तासु सुरादियोनिषु स्वयमेवात्मानं निजकर्मबन्धवद्धं शरीरितया सृजति ।

## ५.८.३. वैषयिकज्ञानेन्द्रियव्यतिरिक्तात्मसद्भावे प्रमाणम् -

यथा पृथिव्यादिमहाभूतानि सत्यानि प्रमाणान्तरगम्यत्वात् तथा आत्मापि सत्यः । अन्यथा यदि बुद्धीन्द्रियव्यतिरिक्तः ज्ञाता ध्रुवो न स्यात्तर्हि एकेन चक्षुरिन्द्रियेण दृष्टं वस्तु अन्येन स्पर्शेन्द्रियेण को विजानाति 'यमहमद्राक्षं तमहं स्पृशामि' इति । यथा कस्यचित्पुरुषस्य वाचं पूर्वं श्रुत्वा पुनः श्रूयमाणं वाचं तस्य वागियमिति कः प्रत्यभिजानाति । तस्मात् ज्ञानेन्द्रियातिरिक्तः ज्ञाता ध्रुव इति सिद्धम् । तस्मादपि बुद्धीन्द्रियव्यतिरिक्त आत्मा स्थित इति ।

## बोधप्रश्नाः -

१. क उत्कृष्टोत्कृष्टतरसुरयोनितां प्राप्नोति ?

उत्तरं.........................................................................

२.	राजस: क: ?

उत्तरं..........................................................

३.	क: तिर्यक्षु: भवेत् ?

उत्तरं..........................................................

४.	आत्मा कथं कै: समाविष्ट: संसारं प्रतिपद्यते ?

उत्तरं..........................................................

५.	निजदेहे क: वेदनां विन्दति ?

उत्तरं..........................................................

६.	क: जलाधारे अंशुमानिव एकोऽपि अनेक: प्रतीयते ?

उत्तरं..........................................................

७.	धातव: कति ?

उत्तरं..........................................................

८.	कस्माज्जगदुत्पद्यते ?

उत्तरं..........................................................

९.	आत्मनं क: सृजति ?

उत्तरं..........................................................

१०.	को ध्रुव इति सिद्धम् ?

उत्तरं..........................................................

## ५.९. उपासनाविशेषविध्यर्थं संसारस्य स्वरूपम् -

यथोक्तं याज्ञवल्क्येन -

स संदिग्धमति: कर्मफलमस्ति न वेति वा ।
विलुप्त: सिद्धमात्मानमसिद्धोऽपि हि मन्यते ।। ३.१५२

योऽसौ पूर्वोक्त आत्मा विप्लुतोऽहंकारदूषित: स सकलकर्मसुफलमस्ति न वेति संदिग्धमति: भवति । यथा असिद्धोऽपि अकृतार्थोऽपि सिद्धमेव कृतार्थमात्मानं मन्यते । किञ्च, तस्य विलुप्तमते: मम कलत्रपुत्रप्रेष्यादयोऽहमेषामित्यतीव ममताकुलस्थिति: भवति । तथा हिताहितकरे कार्यप्रकरे स विप्लुतमति: सदा भवेत् । यथाह याज्ञवल्क्य: -

मम दारा: सुतामात्या अहमेषामिति स्थिति: ।
हिताहितेषु भावेषु विपरीतमति: सदा ।। ३.१५३

किञ्च, ज्ञेयं जानातीति ज्ञेयज्ञस्तस्मिन्नात्मनि प्रकृतौ चात्मनः गुणसाम्यावस्थायां विकारे चाहंकारादौ अविशेषवान् विवेकानभिज्ञः भवति । तथानशनहुताशनाम्बुप्रवेशविषाशनादिषु विप्लववशात्कृतप्रयत्नो भवेत्। एवमात्मा असत्कार्याभिनिवेशयुक्तः सन् तत्कर्मकृतजातेन रागद्वेषाभ्यां मोहेन च बध्यते ।

## बोधप्रश्नाः -

१. संदिग्धमतिः कः ?

उत्तरं..............................................................

२. कः सदा विपरीतमतिः स्यात् ?

उत्तरं..............................................................

३. को विवेकानभिज्ञः भवति ?

उत्तरं..............................................................

४. कीदृगात्मा द्वेषमोहाभ्यामिच्छया एव बध्यते ?

उत्तरं..............................................................

## ५.१०. शरीरग्रहणद्वारेण पुनस्तस्य विस्रम्भः -

यथोक्तं याज्ञवल्क्येन -

आचार्योपासनं वेदशास्त्रार्थेषु विवेकिता ।
तत्कर्मणामनुष्टानं सङ्गः सद्भिर्गिरः शुभाः ।। ३.१५६
स्त्र्यालोकालम्भविगमः सर्वभूतात्मदर्शनम् ।
त्यागः परिग्रहाणाञ्च जीर्णकाषायधारणम् ।। ३.१५७
विषयेन्द्रियसंरोधस्तन्द्रालस्यविवर्जनम् ।
शरीरपरिसंख्यानं प्रवृत्तिष्वघदर्शनम् ।। ३.१५८
नीरजस्तमसा सत्त्वशुद्धिर्निःस्पृहता शमः ।
एतैरुपायैः संशुद्धः सत्त्वयोग्यमृती भवेत् ।। ३.१५९

विद्यार्थमाचार्यसेवा, वेदान्तार्थेषु विवेकित्वम्, तत्प्रतिपादितध्यानकर्मणामनुष्ठानम्, सत्पुरुषसङ्गः प्रियहितवचनत्वम्, परिग्रहाणाञ्च पुत्रक्षेत्रकलत्रादीनां त्यागः, जीर्णकाषायधारणम्, शब्दादिविषयेषु श्रोत्रादीन्द्रियाणां प्रवृत्तिनिरोधः, तन्द्रा निद्रानुकारिणी, आलस्यमनुत्साहः तयोर्विशेषेण त्यागः, शरीरस्य परिसंख्यानमस्थिराशुचित्वादि दोषानुसंधानम्, सकलगमनादिषु प्रवृत्तिषु सूक्ष्मप्राणिवधादिदोषपरामर्शः, तथा रजस्तमोविधुरता, प्राणायमादिभिः भावशुद्धः, निःस्पृहता विषयेष्वनभिलाषः, शमः बाह्यान्तःकरणसंयमः, एतैराचार्योपासनादिभिरुपायैः सम्यक् शुद्धः

केवलसत्वयुक्त: ब्रह्मोपासनेनामृती भवेत् ।

## बेधप्रश्ना: -

१. विद्यार्थं कस्य सेवा उद्दिष्टा ?

उत्तरं.............................................................

२. केषां त्याग: विधेय: ?

उत्तरं.............................................................

३. किं धारयेत् ?

उत्तरं.............................................................

४. कै: सम्यक्शुद्ध: ब्रह्मोपसनेन मुक्तो भवति ?

उत्तरं.............................................................

## ५.११. अमृतत्वप्राप्ति: -

आत्माख्यतत्त्वस्मृतेरात्मनि निश्चलतयोपस्थानात् सत्त्वशुद्धियोगात् केवलसत्त्वगुणयोगात्कर्मवीजानां परिक्षयात् सत्पुरुषाणां च संबन्धात् आत्मयोग: प्रवर्तते । यथोक्तं याज्ञवल्क्येन -

तत्त्वस्मृतेरुपस्थानात्सत्त्वयोगात्परिक्षयात् ।
कर्मणां संनिकर्षाच्च सतां योग: प्रवर्तते ।। ३.१६०

किञ्च, यस्य पुन: योगिन: अविप्लुतमते: शरीरसंक्षयसमये मन: सत्त्वयुक्तं सम्यगेकाग्रतया ईश्वरं प्रति व्याप्रियते स यद्युपासनाप्रयोगाप्रवीणतया आत्मानं नाधिगच्छति तर्हि विशिष्टसंस्कारपाटववशेन जात्यन्तरानुभूत - कृमिकीटादिनानागर्भवासादिसमुद्भूतदु:खस्मरत्वं प्राप्नुयात् । तत्स्मरणेन च जातोद्वेगतस्तद्विच्छेदकारिणि मोक्षे प्रवर्तते । यथाह याज्ञवल्क्य: -

शरीरसंक्षये यस्य मन: सत्त्वस्थमीश्वरम् ।
अविप्लुतमति: सम्यक्स जातिस्मरतामियात् ।। ३.१६१

## बोधप्रश्ना: -

१. कस्मात् सतां येग: प्रवर्तते ?

उत्तरं.............................................................

२. क: जातिस्मरतामियात् ?

उत्तरं.............................................................

३. क: गर्भसमुद्भूतदु:खस्मरत्वं प्राप्नुयात् ?

उत्तरं...........................................................

## ५.१२. अजातिस्मरस्य गतिः -

यथोक्तं याज्ञवल्क्येन -

यथा हि भरतो वर्णैर्वर्णयत्यात्मनस्तनुम् ।
नानारूपाणि कुर्वाणस्तथात्मा कर्मजास्तनूः ।। ३.१६२

भरतो नटः स यथा रामरावणादिनानारूपाणि कुर्वाणः सितासितपीतादिभिर्वर्णैः आत्मनस्तनुं वर्णयति (रचयति) तथैवात्मा तत्तत्कर्मफलोपभोगार्थं कुब्जवामनादिनानारूपाणि कर्मनिमित्तानि कलेवराण्यादत्ते, किञ्च, न केवलं कर्मैव कुब्जवामनत्वादिनिमित्तं, किन्तु कालकर्मणि स्वकारणस्व-पितृबीजदोषः मातृदोषश्चेति सर्वमेतत्सहकारिकारणम् । एतेन दृष्टादृष्टस्वरूपेण कारणकलापेन गर्भस्याङ्गतया विकारो जन्मन आरभ्य अनियतकालो दृष्टः । मनोऽहंकारौ प्रसिद्धौ, गतिः संसरणहेतुभूतः दोषराशिः, कर्मफलं धर्माधर्मरूपम्, शरीरं लिङ्गात्मकम्, एतैरहंकारादिभिः अयमात्मा कदाचिदपि न मुच्यते । यथोक्तं -

अहंकारेण मनसा गत्या कर्मफलेन च ।
शरीरेण च नात्मायं मुक्तपूर्वः कथंचन ।। ३.१६४

ननु प्रतिनियतकर्मणां जीवानां प्रतिनियतकालमेवोपरतिर्युक्ता न पुनः संग्रामादौ युगपदकाले प्राणसंक्षय इत्याशङ्क्याह -

वर्त्याधारस्नेहयोगाद्यथा दीपस्य संस्थितिः ।
विक्रियापि च दृष्टैवमकाले प्राणसंक्षयः ।। ३.१६५

## बोधप्रश्नाः -

१. कः वर्णैः आत्मनः तनुं वर्णयति ?

उत्तरं...........................................................

२. कैरात्मा कदाचिदपि न मुच्यते ?

उत्तरं...........................................................

३. कस्माद्धेतोः दीपस्य संस्थितिः स्यात् ?

उत्तरं...........................................................

## ५.१३. मोक्षमार्गः -

योऽसौ हृदि प्रदीपवत्स्थितः जीवस्तस्यानन्ता रश्मयो नाड्यः सुखदुःखहेतुभूताः 'द्वासप्ततिसहस्राणि' इत्यादिनोक्ताः सितासितकर्बुरादिरूपाः सर्वतः स्थिताः तेषामेको रश्मिरूर्ध्वं

व्यवस्थित: योऽसौ मार्तण्डमण्डलं चातिक्रम्य वर्तते तेन जीव: परां गतिं प्राप्नोति । यथोक्तम् -

अनन्ता रश्मयस्तस्य दीपवद्य: स्थितो हृदि ।
सितासिता: कबुरूपा: कपिला नीललोहिता: ।। ३.१६६
ऊर्ध्वमेक: स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् ।
ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ।। ३.१६७

## बोधप्रश्नौ -

१. जीवस्य सुखदु:खहेतुभूता: का: ?

उत्तरं.............................................................

२. केन जीव: परां गतिं प्राप्नोति ?

उत्तरं.............................................................

## ५.१४. स्वर्गमार्ग: -

यदुक्तं याज्ञवल्क्येन -

यदस्यान्यद्रश्मिशतमूर्ध्वमेव व्यवस्थितम् ।
तेन देवशरीराणि सधामानि प्रपद्यते ।। ३.१६८

यदस्यात्मन: मुक्तिमार्गभूताद्रश्मिरन्यद्रश्मिशतमूर्ध्वाकारमेव व्यवस्थितं तेन सुरशरीराणि तैजसानि सुखैकभोगाधिकरणानि सधामानि कनकरजतरत्नरचितामरपुरसहितानि प्रपद्यते ।

## बोधप्रश्न: -

१. केन देवशरीराणि सधामानि प्रपद्यते ?

उत्तरं.............................................................

## ५.१५. संसरणमार्ग: -

ये पुनस्तस्याधस्ताद्रश्मय: मृदुप्रभास्तैरिह फलोपभोगार्थं संसारे संसरति अवश: स्वकृतकर्मपरतन्त्र:। यथोक्तं -

येऽनेकरूपाश्चाधस्ताद्रश्मयोऽस्य मृदुप्रभा: ।
इह कर्मोपभोगाय तै: संसरति सोऽवश: ।। ३.१६९

भूतचैतन्यवादिपक्षं परिजिहीर्षुराह -

वेदै:, शास्त्रै:, विज्ञानै: 'ममेदं शरीरम्' इत्यादिदेहव्यतिरिक्तात्मानुभवै:, जन्म-मरणाभ्याम्, आर्त्या, गत्या, अगत्या, सत्येन, अनृतेन, श्रेयसा, सुखदु:खाभ्याम्, कर्मभि: शुभाशुभै:,

निमित्तशाकुनज्ञानग्रहसंयोगजैः फलैः, तारानक्षत्रसंसारैः जागरैः स्वप्नजैः, आकाशाद्यैश्च जीवोपभोगार्थतया सृष्टैः, तथा मन्वन्तरप्राप्त्या देहेऽनुपपद्यमानतया, मन्त्रौषधिफलैः प्रेक्षापूर्वकैः साक्षात्परम्परया वा देहेऽनुपपद्यमानैर्वेद्यमानं जानीत ।

किञ्च, अहंकारः स्मृतिर्मेधा द्वेषो बुद्धिः सुखं धृतिः ।
इन्द्रियान्तरसंचार इच्छा धारणजीविते ।। ३.१७४
स्वर्गः स्वप्नश्च भावानां प्रेरणं मनसो गतिः ।
निमेषश्चेतना यत्न आदानं पाञ्चभौतिकम् ।। ३.१७५
यत एतानि दृश्यन्ते लिङ्गानि परमात्मनः ।
तस्मादस्ति परो देहादात्मा सर्वग ईश्वरः ।। ३.१७६

अहंकारादीनि एतानि लिङ्गानि भूतेष्वनुपपन्नानि साक्षात्परम्परया वा परमात्मनः द्योतकानि दृश्यन्ते । तस्मादस्ति देहातिरिक्त आत्मा सर्वग ईश्वर इति सिद्धम् ।

## बोधप्रश्नाः -

१. कैः आत्मा इह संसरति ?

उत्तरं.............................................................

२. परमात्मनः लिङ्गानि कानि ?

उत्तरं.............................................................

३. कः सर्वग ईश्वर इति सिद्धम् ?

उत्तरं.............................................................

## ५.१६. क्षेत्रस्वरूपम् -

बुद्धीन्द्रियाणि श्रोत्रादीनि सार्थानि शब्दादिविषयसहितानि मनः कर्मेन्द्रियाणि वागादीनि तथाऽहंकारो बुद्धिश्च निश्चयात्मिका पृथिव्यादीनि पञ्च भूतानि अव्यक्तं प्रकृतिरित्येतत् क्षेत्रमस्य योऽसावीश्वरः सर्वगतः अत एव सद्रूपः प्रमाणान्तराग्राह्यत्वात् । असत् अस्पष्टप्रतीतिकत्वात् । सदसद्रूपोऽसौ आत्मा क्षेत्रज्ञ इति निगद्यते । यत उक्तमस्ति -

अव्यक्तमात्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते ।
ईश्वरः सर्वभूतस्थः सन्नसन्सदसच्च यः ।। ३.१७८

## बोधप्रश्नः -

१. कः क्षेत्रज्ञ इति निगद्यते ?

उत्तरं.............................................................

## ५.१७. बुद्ध्यादेरुत्पत्तिः -

यथोक्तं याज्ञवल्क्येन -

बुद्धेरुत्पत्तिरव्यक्तात्ततोऽहंकारसंभवः ।
तन्मात्रादीन्यहंकारादेकोत्तरगुणानि च ।। ३.१७९

सत्वादिगुणसाम्यमव्यक्तम् । ततस्त्रिप्रकारायाः सत्त्वरजस्तमोमय्या बुद्धेरुत्पत्तिः, तस्याश्च वैकारिकस्तैजसो भूतादिरिति त्रिविधोऽहंकार उच्यते । तत्र तामसाद्भूतादिसंज्ञकादहंकारत्तन्मात्राणि, 'आदिग्रहणाद्गगनादीनि तानि चैकोत्तरगुणान्युत्पद्यन्ते । 'च" शब्दाद्वैकारिकतैजसाभ्यां बुद्धिकर्मेन्द्रियाणामुत्पत्तिः।

## बोधप्रश्नाः -

१. कस्माद् बुद्धेरुत्पत्तिः ?

उत्तरं..............................................................

२. कस्मात् अहंकारस्योत्पत्तिः ?

उत्तरं..............................................................

३. कस्माद् गुणानामुत्पत्तिः ?

उत्तरं..............................................................

## ५.१८. गुणस्वरूपम् -

यथोक्तं याज्ञवल्क्येन -

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च तद्गुणाः ।
यो यस्मान्निसृतश्चैषां स तस्मिन्नेव लीयते ।। ३.१८०

तेषां गगनादिपञ्चभूतानां एकोत्तरबुद्ध्या पञ्च शब्दादयो गुणा वेदितव्याः । एषां च बुद्ध्यादिविकाराणां मध्ये यो यस्मात्प्रकृत्यादेः उत्पन्नः स तस्मिन्नेव सूक्ष्मरूपेण प्रलयसमये प्रलीयते ।

## बोधप्रश्नः -

१. गुणाः कति वेदितव्याः ?

उत्तरं..............................................................

## ५.१८.१. आत्मज्ञानहेतवः -

यथोक्तं याज्ञवल्क्येन–

वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः ।
श्रद्धोपवासः स्वातन्त्र्यमात्मनो ज्ञानहेतवः ।। ३.१९०

वेदस्य नित्यत्वे सति तत्प्रामाण्यबलाद्वेदानुवचनादयः सत्त्वशुद्ध्यापादनद्वारेण आत्मज्ञानस्य हेतवः इत्युपपन्नं भवति ।

**बोधप्रश्नः -**

१. आत्मज्ञानहेतवः के ?

उत्तरं...........................................................

## ५.१९. प्राप्तिमार्गः -

यथोक्तम्- क्रमात्ते संभवन्त्यर्चिरहः शुक्लं तथोत्तरम् ।
अयनं देवलोकं च सवितारं सवैद्युतम् ।। ३.१९३
ततस्तान्पुरुषोऽभ्येत्य मानसो ब्रह्मलौकिकान् ।
करोति पुनरावृत्तिस्तेषामिह न विद्यते ।। ३.१९४

ते विदितात्मानः क्रमादग्न्याद्यभिमानिदेवतास्थानेषु मुक्तिमार्गभूतेषु विश्रम्य परमपदं प्राप्नुवन्ति। तेषामिह संसारे पुनरावृत्तिर्न विद्यते । किन्तु प्राकृतप्रतिसंचारावसरे त्यक्तलिङ्गशरीराः परमात्मन्येकीभवन्ति।

**बोधप्रश्नौ -**

१. के परमपदं प्राप्नुवन्ति ?

उत्तरं...........................................................

२. केषामिह संसारे पुनरावृत्तिः न विद्यते ?

उत्तरं...........................................................

## ५.२०. पितृयानम् -

ये पुनः विहितैर्मार्गैः यज्ञदानतपोभिः स्वर्गफलभोक्तारस्ते क्रमाद्धूमादिचन्द्रपर्यन्तपदार्थाभिमानि- नीर्देवताः प्राप्य पुनरेव वायुवृष्टिजलभूमीः प्राप्य ब्रीह्याद्यन्नरूपेण शुक्रत्वमवाप्य संसारिणो योनिं व्रजन्ति। एतन्मार्गद्वयम् अमत्तो यो न विजानाति मार्गद्वयोपायभूतधर्मानुष्ठानं न करोति असौ दन्दशूको भुजङ्गः, पतङ्गः, कृमिः कीटो वा भवेत् ।

**बोधप्रश्नौ -**

१. के पुनः संसारिणो योनिं व्रजन्ति ?

उत्तरं...........................................................

२. कः दन्दशूकः कीटो वा भवति ?

उत्तरं..............................................................

## ५.२१. उपासनाप्रकार: -

ऊरुस्थोत्तानचरण: सव्यकरे दक्षिणमुत्तानं न्यस्य मुखं किञ्चिदुन्नाम्योरसा च विष्टभ्य स्तम्भयित्वा तथा निमीलिताक्ष:, कामक्रोधादिरहित:, दन्तैर्दन्तानसंस्पर्शयन्, पिहितानन:, नातिनिचासन: यथा चित्तविक्षेप: न भवति तथोपविष्ट: सन् द्विगुणं त्रिगुणं वा प्राणायामाभ्यासमुपक्रमेत् । तत: वशीकृतपवनेन योगिना योऽसौ हृदये दीपवदप्रकम्प: प्रभु: स्थितोऽसौ ध्यातव्य: । पञ्चदशमात्राभिरधम: प्राणायाम:, त्रिंशद्भिर्मध्यम:, पञ्चचत्वारिंशद्भिरुत्तम इति । प्राणायामत्रयात्मिका एका धारणा, ताश्च तिस्र: 'योग' शब्दवाच्यास्ताश्च धारयेत्।

### बोधप्रश्ना: -

१. कीदृश: प्रभु: ध्यातव्य: ?

उत्तरं..............................................................

२. कतिमात्रात्मक: प्राणायामोऽधम: ?

उत्तरं..............................................................

३. उत्तमप्राणायाम: कति मात्रात्मक: ?

उत्तरं..............................................................

४. बुध: कं धारयेत् ?

उत्तरं..............................................................

## ५.२२. धारणात्मकयोगाभ्यासे प्रयोजनम् -

यथोक्तं याज्ञवल्क्येन -

अन्तर्धानं स्मृति: कान्तिर्दृष्टि: श्रोत्रज्ञता तथा ।
निजं शरीरमुत्सृज्य परकायप्रवेशनम् ।। ३.२०२
अर्थानां छन्दत: सृष्टिर्योगसिद्धेर्हि लक्षणम् ।
सिद्धे योगे त्यजन्देहममृतत्वाय कल्पते ।। ३.२०३

### बोधप्रश्नौ -

१. कदा देहं त्यजन् अमृतत्वाय कल्पते ?

उत्तरं..............................................................

२. किं तावद् योगसिद्धेर्लक्षणम् ?

उत्तरं..............................................................

## ५.२३. यज्ञदानाद्यसंभवे सत्त्वशुद्धावुपायान्तरः -

यथोक्तं याज्ञवल्क्येन -

अथवाप्यभ्यसन्वेदं न्यास्तकर्मा वने वसन् ।
अयाचिताशी मितभुक्परां सिद्धमवाप्नुयात् ।। ३.२०४

त्यक्तकाम्यनिषिद्धकर्मा अन्यतमं वेदमभ्यसन्, एकान्तशीलोऽयाचितमिताशनापादित-सत्त्वशुद्धिरात्मोपासनेन परां मुक्तिलक्षणां सिद्धिं प्राप्नोति ।

किञ्च, सत्प्रतिग्रहादिन्यायेनोपार्जितधनः अतिथिपूजातत्परः नित्यनैमित्तिकश्राद्धानुष्ठाननिरतः सत्यवदनशीलः सन्नात्मतत्त्वध्याननिरतः गृहस्थोऽपि मुक्तिमाप्नोति, तस्मान्न केवलमैहिकपारिव्राज्यपरिगृह एव मुक्तिसाधनम् । उक्तं च याज्ञवल्क्येन -

न्यायागतधनस्तत्त्वज्ञाननिष्ठाऽतिथिप्रियः ।
श्राद्धकृत्सत्यवादी च गृहस्थोऽपि हि मुच्यते ।। ३.२०५

## बोधप्रश्नः -

१. कीदृशः गृहस्थोऽपि मुच्यते ?

उत्तरं..............................................................

## ५.२४. सारांशः -

अस्मिन् खण्डे पञ्चमाध्याये लौकिकगीतानुस्मृतात्मोपासनं निरूपितम् । चित्तविक्षेपाद्यन्तरायहतस्य गीतज्ञस्य फलान्तरं प्रतिपादितम् । आत्मनः संसरणमनाद्यन्तनिर्मुक्तिरालोचिता। आत्मनः जगज्जन्म विचारितम् । कर्मान्तरं फलभोक्तृत्वविचारः कृतः । सत्त्वादिगुणपरिपाकः प्रतिपादितः। आत्मन आत्मसृष्टिः निरूपिता । वैषयिकज्ञानेन्द्रियव्यतिरिक्तात्मसद्भावे प्रमाणं निगदितम् । उपासनाविशेषविध्यर्थं संसारस्वरूपं प्रदर्शितम् । शरीरगृहणद्वारेण पुनस्तस्य विस्रम्भो निरुपितः । आत्मतत्त्वप्राप्तिः प्रतिपादिता । मोक्षमार्गः प्रदर्शितः। संसरणमार्गः विचारितः । क्षेत्रज्ञस्वरूपं निगदितम्। बुद्ध्यादेरुत्पत्तिरालोचिता । गुणस्वरूपं प्रतिपादितम् । आत्मज्ञानहेतव उदाहताः । प्राप्तिमार्गः निर्धारितः। पितृयानं प्रतिपादितम् । उपासनाप्रकारः निगदितः । धारणात्मकयोगाभ्यासे प्रयोजनं निरूपितम् । यज्ञदानाद्यसम्भवे सत्त्वशुद्धावुपायान्तरः निरूपितश्चेति ।

## ५.२५. पारिभाषिकशब्दाः -

विपाकः - फलम्

पिशुन: - कर्णे जप:

परुष: - परोद्वेगकरभाषी

अनिबद्धप्रलापी- प्रकृतासङ्गतार्थवादी

दान्त: - उपसमान्वित:

तपस्वी - कृच्छ्रादितपोयुक्त:

नि:स्पृहता - विषयेष्वनभिलाष:

अमृती - मुक्त:

भरत: - नट:

गति: - संसरणहेतुभूतो दोषराशि:

कर्मफलम् - धर्माधर्मरूपम्

स्मृति: - प्रागभवीयानुभवभावितसंस्कारोद्बोधनिबन्धना स्तन्यपानादिगोचरा

सुखम् - ऐहिकम्

स्वर्ग: - नियतदेहान्तरोपभोग्य: सुखविषय:

अव्यक्तम् - सत्त्वादिगुणसाम्यम्

अर्चि: - वह्नि:

## ५.२६. आदर्शप्रश्ना: -

### निबन्धात्मकप्रश्ना: (प्रत्येकं २०/१५ अङ्का:)

१. उपासनाविशेषविध्यर्थं संसारस्वरूपं ग्रन्थोक्तदिशा विशदयत ।

२. चित्तविक्षेपाद्यन्तरायहतस्य गीतज्ञस्य फलान्तरं विज्ञानेश्वरदिशा विवृणुत ।

३. कर्मानन्तरं फलभोक्तृत्वविचारं मिताक्षरादिशा आलोचयत ।

### विश्लेषणात्मकप्रश्ना: - (प्रत्येकं १२/१० अङ्का:)

१. सत्त्वादिगुणपरिपाकमालोचयत ।

२. आत्मनि सुरनरादिषु भेदप्रत्ययं निरूपयत ।

३. आत्मन: आत्मसृष्टिं प्रदर्शयत ।

४. शरीरग्रहणद्वारेण पुनरात्मन: विस्रम्भं विशदयत ।

५. अमृतत्वप्राप्तिमालोचयत ।

**लघुप्रश्नाः - (प्रत्येकं ५ अङ्काः)**

१. मोक्षमार्गं विचारयत ।

२. स्वर्गमार्गं निरूपयत ।

३. संसरणमार्गं विशदयत ।

४. क्षेत्रज्ञस्वरूपं प्रतिपादयत ।

**एकाङ्कप्रश्नाः - (प्रत्येकं १ अङ्क)**

१. कः क्षेत्रज्ञ इति निगद्यते ?

२. गुणाः कति ?

३. कः सर्वगः ?

४. बुद्धीन्द्रियाणि कति ?

५. सर्वभूतस्थः कः ?

६. कस्मात् अहंकारस्योत्पत्तिः स्यात् ?

७. आत्मानं कः सृजति ?

८. बीजभूता धर्मप्रवर्तकाः के ?

९. अधमप्राणायामः कतिमात्रात्मकः ?

१०. कीदृशो गृहस्थः मुच्यते ?

## ५.२७. एकाङ्कप्रश्नानामुत्तराणि -

१. आत्मा, २. पञ्च, ३. ईश्वरः, ४. पञ्च, ५. ईश्वरः, ६. बुद्धेः, ७. आत्मा, ८. मुनयः, ९. पञ्चदश, १०. श्राद्धकृत्सत्यवादी ।

# षष्ठपत्रम्

## द्वितीयखण्ड:, ( Unit - VI - X)

## षष्ठभाग: ( Unit - VI)

## (प्रायश्चित्तप्रकरणस्य आदित: उपपातकं यावत्)

### ६.१. प्रस्तावना -

अस्मिन् खण्डे षष्ठभागे प्रायश्चित्तप्रकरणस्य कर्मविपाक:, महापातकानां विशेषकथनम्, प्रायश्चित्तेष्वधिकारिनिरूपणम्, प्रायश्चित्ताकरणे दोष:, नरकस्वरूपम्, पञ्चमहापातकानि, ब्रह्महत्यासमानि पापानि, सुरापानसमानि पापानि, सुवर्णस्तेयसमानि पापानि, गुरुलल्पसमानि पापानि, गुरुतल्पातिदेश:, उपपातकानि चैते विषया आलोचिता: ।

### ६.२. उद्देश्यम् -

प्रियपाठका: ! अस्मिन् खण्डे षष्ठभागे भवन्त: प्रायश्चित्तप्रकरणस्य आदित आरभ्योपपातकानि यावदधोलिखितान् विन्दून् पठिष्यन्ति।

- कर्मविपाकं निरूपयिष्यन्ति ।
- महापातकिनां विशेषस्वरूपं निर्णेतुं शक्नुवन्ति ।
- प्रायश्चित्तेषु अधिकारिनिरूपणं विधास्यन्ति ।
- प्रायश्चित्ताकरणे दोषं प्रतिपादयितुमर्हन्ति ।
- नरकस्वरूपं स्पष्टयितुं शक्नुवन्ति ।
- पञ्च महापातकानि निरूपयिष्यन्ति ।
- ब्रह्महत्यासमानि पापानि निरूपयितुं प्रभवन्ति ।
- सुरापानसमानि पापानि प्रदर्शयितुं प्रभवन्ति ।
- सुवर्णस्तेयसमानि पापानि प्रतिपादयितुमर्हन्ति ।
- गुरुतल्पसमानि पापानि निरूपयिष्यन्ति ।
- गुरुतल्पातिदेशं निर्णेतुं शक्नुवन्ति ।
- उपपातकानि विशदयितुं प्रभवन्ति ।

### ६.३. कर्मविपाक: -

षड्विधस्मार्तधर्मेषु अन्तिमधर्म: निमित्तधर्म: । तस्य निमित्तधर्मस्य अधिकारिविशेषं

प्रदर्शयितुम् अर्थवादरूपं कर्मविपाकं तावदाह याज्ञवल्क्य: - यथा -

महापातकजान्घोरान्नरकान्प्राप्य दारुणान् ।
कर्मक्षयात्प्रजायन्ते महापातकिनस्त्विह ।। ३.२०६

ब्रह्महत्यादिपञ्चकस्य महापातकसंज्ञा । महापातकजनितां तामिस्रादिनरकान् स्वजनितदुष्कृता- नुरूपान् घोरान् दारुणान् दु:खैकभोगनिलयान् प्राप्य कर्मक्षयात् कर्मशेषात् पुनरिह संसारे दु:खबहुलश्वसृगालादियोनिषु प्रकर्षेण महापातकिनो भूयो भूयो जायन्ते ।

## बोधप्रश्ना: -

१. कर्मक्षयादिहं के प्रजायन्ते ?

उत्तरं.............................................................

२. कान् प्राप्य महापातकिन इह प्रजायन्ते ?

उत्तरं.............................................................

३. कस्मात् महापातकिन इह प्रजायन्ते ?

उत्तरं.............................................................

## ६.४. महापातकिनां विशेषस्वरूपम् -

यथोक्तं याज्ञवल्क्येन -

मृगश्वसूकरोष्ट्राणां ब्रह्महा योनिमृच्छति ।
खरपुल्कसवेनानां सुरापो नात्र संशय: ।। ३.२०७
कृमिकीटपतङ्गत्वं स्वर्णहारी समाप्नुयात् ।
तृणगुल्मलतात्वं च क्रमशो गुरुतल्पग: ।। ३.२०८

मृगा हरिणादय:, श्वसूकरोष्ट्रा:, तेषां योनिं ब्रह्महा स्वकर्मशेषेण प्राप्नोति । खरो रासभ:, पुल्कस: प्रतिलोमनिषादेन शूद्रायां जात: वैदेहकेनाम्बष्ठायां जातो वेन:,तेषां योनिं सुराप: प्राप्नोति । कृमय: सजातीयसंभोगनिरपेक्षां मांसविष्ठागोमयादिजन्या:, तत: किंचित्स्थूलतरा: पक्षास्थिरहिता: पिपीलिकादय: कीटा:, पतङ्ग: शलभ:, तेषां योनिं ब्राह्मणस्वर्णहारी प्राप्नुयात् । गुरुतल्पग: क्रमश: तृणगुल्मलतात्वं प्राप्नोति ।

एवं च तिर्यक्त्वादुत्तीर्णानां मानुष्ये रोगादि लक्षणानि -

यथोक्तं याज्ञवल्क्येन -

ब्रह्महा क्षयरोगी स्यात्सुराप: श्यावदन्तक: ।

हेमहारी तु कुनखी दुश्चर्मी गुरुतल्पगः ।। ३.२०९

यो येन संवसत्येषां स तल्लिङ्गोऽभिजायते ।

किञ्च, एवं रौरवादिनरकेषु सूकरखरादियोनिषु च दारुणं दुःखमनुभूयानन्तरं दुरितशेषेण जननसमय एव क्षयरोगादिलक्षणयुक्ताः मानवशरीरेषु संसरन्ति । तत्र ब्रूह्महा क्षयरोगी भवेत् । निषिद्धसुरापी कृष्णदशनः भवति । ब्राह्मणसुवर्णहारी कुत्सितनखत्वम्, गुरुदारगामी दुश्चर्मत्वं च प्राप्नोति । एतेषां ब्रूह्महादीनां मध्ये येन पतितेन यः पुरुषः संवसति स तल्लिङ्गोऽभिजायते ।

किञ्च अन्नस्यापहर्ता आमयावी, वागपहारकः पुस्तकापहारी च मूको भवेत् । धान्यमिश्रः अतिरिक्ताङ्गः, पिशुनः पूतिनासिकः,तैलस्य हर्ता तैलपायी कीटविशेषो भवति । असद्दोषसंकीर्तनः दुर्गन्धिवदनो जायते । एतच्च तिर्यक्त्वप्राप्त्युत्तरकालं मानुषशरीरप्राप्तौ द्रष्टव्यम् ।

किञ्च, यः परदारानपहरति, ब्रूह्मस्वं च सुवर्णव्यतिरिक्तमपहरति असौ अरण्ये निर्जने देशे ब्रूह्मराक्षसो भूतविशेषो जायते । यथोक्तं याज्ञवल्क्येन -

परस्य योषितं हृत्वा ब्रूह्मस्वमपहृत्य च ।

अरण्ये निर्जने देशे भवति ब्रूह्मराक्षसः ।। ३.२१२

किञ्च, हीनजातौ हैमकाराख्यायां पक्षिजातौ पररत्नाद्यपहारकः जायते । पत्रात्मकं शाकं हृत्वा मयूरः । शुभानान्धानपहृत्य छुच्छुन्दरी राजदुहिताख्या मूषिका भवति ।

किञ्च, याज्ञवल्क्य आह -

मूषको धान्यहारी स्याद्यानमुष्ट्रः कपिः फलम् ।

जलं ल्पवः पयः काको गृहकरी ह्युपस्करम् ।। ३.२१४

मधु दंशः पलं गृध्रो गां गोधाग्निं वकस्तथा ।

श्वित्री वस्त्रं श्वा रसं तु चीरी लवणहारकः ।। ३.२१५

द्रव्यस्यापह्रियमाणस्य यादृशाः प्रकारास्तादृशा एव प्राणिजातयः स्तेयकर्मण्यपहर्तारो भवन्ति । यथा कांस्यहारी हंस इति । ब्रूह्महा कुष्ठी, तैजसापहारी मण्डली, देवब्राह्मणाक्रोशकः खलतिः, गोध्नः अन्धः, धर्मपत्नीं त्यक्त्वा अन्यत्र प्रवृत्तः शब्दवेधा, कुण्डाशी भगभक्षः,देवब्राह्मणस्वापहारी पाण्डुरोगी, न्यासपहारी काणः, स्त्रीपण्योपजीवी षण्ढः, कौमारदारत्यागी दुर्भगः, अभक्षभक्षकः गण्डमाली, कूरकर्मा वामनः, वस्त्रापहारी पतङ्गः,शय्यापहारी क्षणपकः,मातापित्रोराक्राशः खञ्जकः, चतुष्पथे विण्मूत्रविसर्जने मूत्रकृच्छ्री, कन्यादूषकः षण्ढः, न्यासापहारी अनपत्यः, रत्नापहारी अत्यन्तदरिद्रः, विद्याविक्रयी पुरुषमृगः, वेदविक्रयी द्विपी, पर्युषितभोजी कृमिः, अदत्तादायी वलीवर्दः, शूद्राचार्यः श्वपाकः, गोगामी मण्डूकः, परद्रव्यापहारी

परप्रेष्य: इति । स्त्रियोऽपि एतेषु निमित्तेषु पूर्वोक्तासु एव जातिषु स्त्रीत्वमनुभवन्ति । तथा हि पापक्षयार्थं प्रायश्चित्तम् । न च प्रायश्चित्तेन प्रारब्धफलपापापूर्वविनाशे किञ्चन प्रयोजनमस्ति ।

किञ्च यथा - कर्म स्वकृतदुष्कृतानतिक्रमेण तदनुरूपं नरकादिफलं तिर्यक्त्वञ्च प्राप्य कालक्रमेण क्षीणे कर्मणि दुष्टलक्षणा दरिद्राश्च पुरुषेषु निकृष्टा जायन्ते । यथोक्तं याज्ञवल्क्येन -

यथाकर्म फलं प्राप्य तिर्यक्त्वं कालपर्यायात् ।
जायन्ते लक्षणभ्रष्टा दरिद्रा: पुरुषाधमा: ।। ३.२१७

किञ्च, तत: दुर्लक्षणमनुष्यजन्मानन्तरं निष्कल्मषीभूता नरकाद्युपभोगद्वारेण क्षीणपापा: प्राग्भवीयसुकृतशेषेण महाकुले भोगसंपन्ना: विद्याधनधान्यसंपन्ना जायन्ते । तथोक्तं -

ततो निष्कल्मषीभूता कुले महति भोगिन: ।
जायन्ते विद्ययोपेता धनधान्यसमन्विता: ।। ३.२१८

## बोधप्रश्ना: -

१. क: मृगश्वसूकरोष्ट्राणां योनिमृच्छति ?

उत्तरं.........................................................................

२. क: खरपुल्कसवेनानां योनिं प्राप्नोति ?

उत्तरं.........................................................................

३. कृमिकीटपतङ्गत्वं क: प्राप्नोति ?

उत्तरं.........................................................................

४. क: क्षयरोगी स्यात् ?

उत्तरं.........................................................................

५. क: मूषको भवेत् ?

उत्तरं.........................................................................

## ६.५. प्रायश्चित्तेषु अधिकारिनिरूपणम् -

यथोक्तं याज्ञवल्क्येन -

विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहश्चेन्द्रियाणां नर: पतनमृच्छति ।। ३.२१९
तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये ।
एवमस्यान्तरात्मा च लोकश्चैव प्रसीदति ।। ३.२२०

विहितमिति यदावश्यकं संध्योपासनाग्निहोत्रादिकं नित्यमशुचिस्पर्शादौ नैमित्तिकत्वेन

चोदितं स्नानादिकं च तदुभयमुच्यते तस्याकरणात्, निन्दितस्य सुरापानादेः करणात्, इन्द्रियाणामनिग्रहाच्च नरः पतनं प्राप्नोति । 'विहितस्याननुष्ठानान्नरः पतनमृच्छति' इति कथमस्या स्मृतेः गतिरिति वाच्यं चेदुच्यते - अग्निहोत्रादिविषयाधिकारासिद्धिरूपप्रत्यवायाभिप्रायणेति न दोषः । मनुः - 'वान्ताश्युल्कामुखः प्रेतो विप्रो धर्मात्स्वकाच्च्युतः । अमेध्यकुणपायी च क्षत्रियः कटपूतनः ।। मैत्राक्षज्योतिकः प्रेतो वैश्यो भवति पूयभुक् । चैलाशकस्तु भवति शूद्रो धर्मात्स्वकाच्च्युतः ।। इत्येतानि विहिताकरणप्रत्यवायपराणि मनुवचनानि कथं घटन्ते ? उच्यते - यथा वान्तमश्नता उल्कया वा दह्यमानमुखस्य दुःखं तथास्यापि विहितमकुर्वतः पुरुषस्य पुरुषार्थासिद्धेरित्यकरणनिन्दनमनुष्ठानप्रोचनार्थमित्याविरोधः । अस्मादेव पापक्षयार्थप्रायश्चित्तविधानाज्जन्मान्तराचरित निषिद्धसेवादिजन्यपापापूर्वं समाक्षिप्तमित्यभिशापादिकं तन्निमित्तप्रायश्चित्तापनोद्यमानानुष्ठितमिति कल्प्यते । तस्माद्युक्तैव प्रायश्चित्ते निमित्तत्रयपरिगणना । यथा च मनुः -

अकुर्वन्विहितं कर्म निन्दितं च समाचरन् ।
प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ।। ११.४४

'नर'- ग्रहणं प्रतिलोमजातानामपि प्रायश्चित्ताधिकारप्राप्त्यर्थम्, तेषामपि हिंसादिसाधारण-धर्मव्यतिक्रमसंभवात्, यस्मादेवं निषिद्धाचरणादिना प्रत्यवैति तस्मात्तेन कृतनिषिद्धसेवाद्वारा पुरुषेण प्रायश्चित्तशब्दश्चायं पापक्षयार्थे नैमित्तिके कर्मविशेषे रूढः । एवं प्रायश्चित्ते कृते अस्यान्तरात्मा शुद्धतया प्रसीदति लोकश्च संव्यवहर्तुं प्रसीदति यस्मात् मनुः -

'चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये ।
निन्द्यैर्हि लक्षणैर्युक्ता जायन्तेऽनिष्कृतैनसः ।। ११.५३

## बोधप्रश्नाः -

१. नरः कथं पतनमृच्छति ?

उत्तरं........................................................

२. इह किमर्थं प्रायश्चित्तं कर्तव्यम् ?

उत्तरं........................................................

३. कृते प्रायश्चित्ते कः प्रसीदति ?

उत्तरं........................................................

४. प्रायश्चित्तशब्दोऽयं कस्मिन्नर्थे रूढः ?

उत्तरं........................................................

## ६.६. प्रायश्चित्ताकरणे दोषः -

विषयेऽस्मिन् याज्ञवल्क्यस्याभिमतम् -

प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः ।
अपश्चात्तापिनः कष्टान्नरकान्यान्ति दारुणान् ।। ३.२२१

पापेषु शास्त्रार्थव्यतिक्रमजनितेषु प्रसक्ताः पुरुषाः अपश्चात्तापिनः मया दुष्कृतं कृतमित्येवमुद्वेगरहिताः प्रायश्चित्तमकुर्वाणाः दुःसहान्नरकान्प्राप्नुवन्ति ।

## बोधप्रश्नः -

१. के कष्टान्नरकान् यान्ति ?

उत्तरं..............................................................

## ६.७. नरकस्वरूपम् -

यथोक्तं याज्ञवल्क्येन -

तामिस्रं लोहशङ्कुं च महानिरयशाल्मली ।
रौरवं कुड्मलं पूतिमृत्तिकं कालसूत्रकम् ।। ३.२२२
संघातं लोहितोदं च संविषं संप्रपातनम् ।
महानरककाकोलं संजीवनमहापथम् ।। ३.२२३
अवीचिमन्धतामिस्रं कुम्भीपाकं तथैव च ।
असिपत्रवनं चैव तापनं चैकविंशकम् ।। ३.२२४
महापातकजैर्घोरैरुपपातकजैस्तथा ।
अन्विता यान्त्यचरितप्रायश्चित्ता नराधमाः ।। ३.२२५

तामिस्रप्रभृतींस्तापनपर्यन्तानेकविंशतिनरकान् अन्वर्थसंज्ञाद्योतितान् अवान्तरभेदान् महापातकोपपातकजनितभयङ्करदुरितैः अन्विता अनाचारिताः प्रायश्चित्ताः पुरुषाधमाः प्राप्नुवन्ति ।

## बोधप्रश्नौ -

१. नरकाः कतिसंख्यकाः ?

उत्तरं..............................................................

२. कीदृशा नराः कथं नरकान् प्राप्नुवन्ति ?

उत्तरं..............................................................

## ६.७.१. प्रायश्चित्तस्यावश्यकता -

याज्ञवल्क्य आह -

प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ।
कामतो व्यवहार्यस्तु वचनादिह जायते ।। ३.२२६

प्रायश्चितैः वक्षमाणलक्षणैःअज्ञानाद्यदेनः पापं कृतं तदपैति, न कामतः कृतम् । किन्तु तत्र प्रायश्चित्तविधायकवचनबलादिह लोके व्यवहार्यो जायते । तथाहि - 'विहितं यदकामानां कामात्तद् द्विगुणं भवेत् ।' तथा अबुद्धिपूर्वक्रियायामर्धं प्रायश्चित्तम् । तथा 'म्लेच्छेनाधिगतः शूद्रस्त्वज्ञानात्तु कथंचन। कृच्छ्रत्रयं प्रकुर्वीत ज्ञानात्तु द्विगुणं भवेत्' ।। इत्यादिभिः वचनैः ज्ञानकामनयोः तुल्यप्रायश्चित्तदर्शनात्तुल्यफलतैव । यथा पापोत्पत्तिः शास्त्रगम्या तथा तत्परिक्षयोऽपीति नात्र मरणान्तरं क्रमते । अत एव गौतमेन पूर्वोत्तरपक्षभङ्ग्या अयमर्थः दर्शितः । तत्र प्रायश्चित्तं कुर्यान्न कुर्यादिति मीमांसन्ते । न कुर्यादित्याहुः न हि कर्म क्षीयत इति । कुर्यादित्यपरे । 'पुनः स्तोमेनेष्ट्वा पुनः सवनमायान्तीति विज्ञायते । व्रात्यस्तोमेनेष्ट्वा तरति सर्वं पाप्मानं तरति भ्रूणहत्यां योऽश्वमेधेन यजते' इति पुनः सवनमायान्ति इति सवनसंपाद्यज्योतिष्टोमादिद्विजातिकर्मणि योग्यः भवतीत्यर्थः । न चेदं अर्थवादमात्रम् । अतो युक्तं 'प्रायश्चित्तैरपैत्येनः' इति । ननु कामकृते प्रायश्चित्ताभावात् कथं व्यवहार्यत्वं तदभावश्च 'अनभिसंधिकृतेऽपराधे प्रायश्चित्तम्' इति वसिष्ठवचनात् । 'इयं विशुद्धिरुदिता प्रामाप्याकामतो द्विजम् । कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ।। तथा - विहितं यदकामानां कामात्तद्द्विगुणं भवेत् इति च कामकृतेऽपि प्रायश्चित्तदर्शनात् । ननु यदि कामकृतेऽपि प्रायश्चित्तमस्ति तर्हि पापक्षयोऽपि कस्मान्न स्यादविशेषाद्यदि पापक्षयोऽपि नास्ति तर्हि व्यवहार्यतापि कथं भवति ? उच्यते – उभयत्र प्रायश्चित्ताविशेषेऽपि फलविशेषः शास्त्रतोऽवगम्यते । अज्ञानकृते तु सर्वत्र पापक्षयः यत्र तु ब्रह्महसुरापगुरुतल्पग - मातृपितृयोनिसंबद्धावागमस्तेन नास्तिकनिन्दित - कर्माभ्यासि - पतितात्याग्यपतितत्यागिनः पतिताः पातकसंयोजकाश्च । द्वे हि पापस्य शक्ती नरकोत्पादिका व्यवहारनिरोधिका चेति । तत्र इतरशक्त्यविनाशेऽपि व्यवहारनिरोधिकायाः शक्तेः विनाशः नानुपपन्नस्तस्मात्पापानपगमेऽपि व्यवहार्यत्वं नानुपपन्नम् । यत्तु मनुवचनम् - अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः । कामकारकृतेप्याहुरेके श्रुतिनिदर्शनात् ।। इति, तदपि कामकृते प्रायश्चित्तप्राप्त्यर्थम्, न पुनः पापक्षयप्रतिपादनपरम् । पतनीये पुनः कामकृतेऽपि प्रायश्चित्तेन पापक्षयः भवत्येव, अकामतः कृतं पापं वदाभ्यासेन शुद्ध्यति । अकामस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैः ।। इति मनुस्मरणात् । पतनीयेऽपि कर्मणि कामकृते मरणान्तिकप्रायश्चित्तेषु कल्मषक्षयः भवत्येव फलान्तराभावात् ।

## बोधप्रश्ना: -

१. कै: एन: अपैति ?

उत्तरं..............................................................

२. किं तावत्पापं प्रायश्चित्तैरपैति ?

उत्तरं..............................................................

३. कस्य वधे निष्कृतिर्न विद्यते ?

उत्तरं..............................................................

## ६.८. पञ्चमहापातकानि -

निषिद्धाचरणादिकं प्रायश्चित्ते निमित्तमित्युक्तं तत्प्रपञ्चयितुमाह -

ब्रह्महा मद्यप: स्तेनस्तथैव गुरुतल्पग: ।

एते महापातकिनो यश्च तै: सह संवसेत् ।। ३.२२७

ब्राह्मणं हतवानिति ब्रह्महा, मद्यप: निषिद्धसुराया: पाता, स्तेन: ब्राह्मणसुवर्णस्य हर्त्ता, गुरुतल्पग: गुरुभार्यागामी। 'तल्पशब्देन शयनवाचिना साहचर्याद्भार्या लक्ष्यते । एते ब्रह्महादयो महापातकिन: । पातयन्तीति पातकानि ब्रह्महत्यादीनि । महत्शब्देन तेषां गुरुत्वं ख्याप्यते । यश्च तै: ब्रह्महादिभि: प्रत्येकं सह संवसति । एभिस्तु संवसेद्यो वै वत्सरं सोऽपि तत्सम:' इति वक्षमाणन्यायेन सोऽपि महापातकी । तथा शब्द प्रकारवचनोऽनुग्राहकप्रयोजकादिकर्तृसंग्रहार्थ: ।अत: मनुना अनुग्राहकस्य हिंसाफलसंबन्धो दर्शित: । यथोक्तं आपस्तम्बेन 'प्रयोजितानुमन्ता कर्ता चेति स्वर्गनर्कफलेषु कर्मसु भागिन: यो भूय आरभते तस्मिन्फलविशेष:' तत्र अप्रवृत्तस्य प्रवर्तक: प्रयोजक: । स च त्रिप्रकार: - आज्ञापयिताभ्यर्थयमान उपदेष्टेति । तत्र आज्ञपयिता स्वयमुच्च: सन्नीचं भृत्यादिकं य: प्रेरयति मदीयममित्रं जहीति स उच्यते । अभ्यर्थयमानस्तु य: स्वयमसमर्थ: सन् प्रार्थनादिना मच्छत्रुं व्यापादयेत्युच्चं प्रवर्तयति सोऽभिधीयते । अनयो: स्वार्थसिद्ध्यर्थं प्रयोक्तृत्वम् । उपदेष्टा पुनस्त्वं शत्रुमित्थं व्यापादयेति मर्मोद्घाटनाद्युपदेशपुर:सरं प्रेरयन्कथ्यते । अनुमन्ता तु प्रवृत्तस्य प्रवर्तक: । स द्विप्रकारक: - कश्चित्स्वार्थसिद्ध्यर्थं अनुजानाति कश्चित्परार्थमिति । तथा योऽपि भर्त्सन-ताडन - धनापहारादिना परान्कोपयति सोऽपि मरणहेतुभूतमन्यूत्पादनद्वारेण हिंसाहेतुर्भवत्येव । एत एव विष्णुनोक्तम् - 'ज्ञातिमित्रकलत्रार्थं सुहृत्क्षेत्रार्थमेव च । यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम् ।। अनुमन्तादीनां व्यापारगतगुरुलाघवापेक्षया च फलं गुरुलाघवात् प्रायश्चित्तं गुरुलाघवं बोद्धव्यम् । प्रयोजकानां

मध्ये परार्थप्रवृत्तत्वेन उपदेष्टुरल्पफलत्वम्। तथा क्वचित् सत्यपि हिंसानिमितयोगित्वे परोपकारार्थप्रवृत्तौ वचनाद्दोषाभावः । यथाह संवर्तः - बन्धने गोभिश्चिकित्सार्थे मूढगर्भविमोचने । यत्ने कृते विपत्तिश्चेत्प्रायश्चित्तं न विद्यते ।। औषधं स्नेहमाहारं दद्द्गोब्राह्मणादिषु। दीयमाने विपत्तिः स्यान्न स पापेन लिप्यते । दाहच्छेदशिराभेदप्रयत्नैरुपकुर्वताम् । प्राणसंत्राणसिद्ध्यर्थं प्रायश्चित्तं न विद्यते ।।

## बोधप्रश्नाः -

१. महापातकिनः कति ?

उत्तरं..........................................................

२. अनुग्राहकलक्षणं किम् ?

उत्तरं..........................................................

३. पञ्चममहापातकी कः ?

उत्तरं..........................................................

४. घातकाः कतिविधाः ?

उत्तरं..........................................................

# ६.९. ब्रह्महत्यासमानि पापानि -

यथाह याज्ञवल्क्यः -

गुरूणामध्यधिक्षेपो वेदनिन्दा सुहृद्वधः ।
ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम् ।। ३.२२८

गुरूणामाधिक्येनाधिक्षेपः अनृताभिशसंनम् । 'गुरोरनृताभिशंसनमिति महापातकसमानि' इति गौतमस्मरणात् । एतच्च लोकाविदितदोषाभिशंसनम् । नास्तिक्याभिनिवेशेन वेदकुत्सनम् । सुहृन्मित्रं तस्य अब्राह्मणस्यापि बधः । अधीतस्य वेदस्य असत्शास्त्रविनोदेन आलस्यादिना वा नाशनं विस्मरणम्। एतानि प्रत्येकं ब्रह्महत्यासमानि ।

## बोधप्रश्नः -

१. ब्रह्महत्यासमानि पापानि कानि ?

उत्तरं..........................................................

# ६.१०. सुरापानसमानि पापानि -

यथाह याज्ञवल्क्यः -

निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतम् ।

रजस्वालामुखास्वादः सुरापानसमानि तु ।। ३.२२९

निषिद्धं लशुनादिकं, तस्य मतिपूर्वं भक्षणम् । अत एव मनुः छत्राकं विड्वराहं च लशुनं ग्रामकुकुटम्। पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेन्नरः ।। अमतिपूर्वे तु प्रायश्चित्तान्तरम् - अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सान्तापनं चरेत् । अतिचान्द्रायणं वापि शेषेषूपवसेदहः ।। जैहम्यं कौटिल्यम्, अन्याभिसंधानेनान्यवादित्वमन्यकर्तृत्वं च । अत्र च जैह्म्यमिति यद्यपि सामान्येनोक्तं, तथापि प्रायाश्चितस्य गुरुत्वान्निमित्तस्यापि विशेषावगतिः । तथा समुत्कर्षनिमित्तं राजकुलादौ अचतुर्वेद एव चतुर्वेदोऽहमित्यनृतभाषणम्। रजस्वलाया वक्त्रासवसेवनम् । एतानि सुरापानसमानि ।

## बोधप्रश्नाः -

१. सुरापानसमानि पापानि कानि ?

उत्तरं..........................................................

२. जैह्म्यमिति शब्देन किमवबोध्यते ?

उत्तरं..........................................................

३. अमत्या निषिद्धं जग्ध्वा किमाचरेत् ?

उत्तरं..........................................................

# ६.११. सुवर्णस्तेयसमानि पापानि -

यथोक्तं याज्ञवल्क्येन -

अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा ।
निक्षेपस्य च सर्वं हि सुवर्णस्तेयसंमितम् ।। ३.२३०

अश्वादीनां ब्राह्मणसंबन्धिना, निक्षेपस्य च सुवर्णव्यतिरिक्तस्य अपहरणमेतत्सर्वं सुवर्णस्तेयसमं वेदितव्यम्।

## बोधप्रश्नः -

१. केषामपहरणं सुवर्णस्तेयसमं भवति ?

उत्तरं..........................................................

# ६.१२. गुरुतल्पसमानि -

विषयेऽस्मिन् याज्ञवल्क्यस्याभिमतं यथा -

सखिभार्याकुमारीषु स्वयोनिष्वन्त्यजासु च ।
सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतम् ।। ३.२३१

सखा मित्रम्, तस्य भार्या, कुमारी उत्तमजातीया कन्यका, तासु सकामासु अनुलोमासु न दोषस्त्वन्यथा दमः । दूषणे तु करच्छेद उत्तमायां वधस्तथा, तत्रैव दण्डविशेषप्रतिपादनात्प्रायश्चित्तगुरुत्वं युक्तम् । स्वयोनिर्भगिनी अन्त्यजा चाण्डाली, सगोत्रा समानगोत्रा, सुतस्त्री स्नुषा, एतासां गमनं प्रत्येकं गुरुतल्पसमम् । एतच्च रेतः सेकादूर्ध्वं वेदितव्यम्; अर्वाङ्निवृत्तौ तु न गुरुतल्पसमत्वं, किन्त्वल्पमेव प्रायश्चित्तम् । 'रेतः सेकः स्वयोनिषु कुमारीष्वन्त्यजासु च । सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमंविदुः ।। एवं च सति याज्ञवल्क्येन ब्रह्महत्यासमत्वेनोक्तानामपि ब्रह्मोज्झत्ववेदनिन्दासुहृद्वधानां मनुना यत्सुरापानसाम्यं - ब्रह्मोज्झता वेदनिन्दा कौटसाक्षं सुहृद्वधः । गर्हितान्नाज्ययोर्जग्धिः सुरापानसमानि षट् ।। यत्तु वसिष्ठेन - गुरोरलीकनिर्बन्धे कृच्छ्रं द्वादशरात्रकं चरित्वा सचैलः स्नातः गुरुप्रसादात् पूतो भवति ।

## बोधप्रश्नाः -

१. गुरुतल्पसमानि पापानि कानि ?

उत्तरं.............................................................

२. सुरापानसमानि पापानि कति ?

उत्तरं.............................................................

३. कतिरात्रात्मकं कृच्छ्रं चरित्वा सचैलः स्नातः पूतो भवति ?

उत्तरं.............................................................

## ६.१३. गुरुतल्पातिदेशः -

यथोक्तं याज्ञवल्क्येन -

पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि
मातुः सपत्नीं भगिनीमाचार्यतनयां तथा ।। ३.२३२
आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः ।
लिङ्गं छित्वा वधस्तस्य सकामायाःस्त्रिया अपि ।। ३.२३३

पितृष्वस्रादयः प्रसिद्धाः,ताः गच्छन् गुरुतल्पगः, तस्य लिङ्गं छित्वा राज्ञा वधः कर्तव्यः दण्डार्थम्, प्रायश्चित्तं च तदेव । यथाह नारदः - 'माता पितृष्वसा श्वश्रूर्मातुलानी पितृष्वसा । पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा ।। दुहिताचार्यभार्या च सगोत्रा शरणागता । राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या । आसामन्यत्तमां गच्छन् गुरुतल्पग उच्यते । शिश्नस्योत्कर्तनात्तत्र नान्य दण्डो विधीयते ।। यदा पुनरेता स्त्रियः सकामाः सत्य एतानेव पुरुषान्वशीकृत्य उपभुञ्जन्ते तदा तासामपि पुरुषवद्वध एव दण्डः प्रायश्चित्तं च । एतानि

गुर्वधिक्षेपादितनयागमनपर्यन्तानि महापातकातिदेशविषयाणि सद्यः, पतनहेतुत्वात्पातकान्युच्यन्ते । यथाह यमः-

मातृष्वसा मातृसखी दुहिता च पितृष्वसा ।
मातुलानी स्वसा श्वश्रूर्गत्वा सद्यः पतेन्नरः ।।

एतदुक्तम् - महापातकतुल्यानि पापान्युक्तानि यानि तु ।
तानि पातकसंज्ञानि तन्न्यूनमुपपातकम् ।।

तथा चाङ्गिराः - पातकेषु सहस्रं स्यान्महत्सु द्विगुणं तथा ।
उपपापे तुरीयं स्यान्नरकं वर्षसंख्यया ।।

## बोधप्रश्नाः -

१. कस्य लङ्गं छित्वा वधः कार्यः ?

उत्तरं.........................................................

२. कीदृश्याः स्त्रिया अपि वधः कार्यः ?

उत्तरं.........................................................

३. पातकसंज्ञानि कानि ?

उत्तरं.........................................................

४. कस्मिन् पापे वर्षसंख्यया नरकं स्यात् ?

उत्तरं.........................................................

## ६.१४. उपपातकानि -

गोवधः, कालेऽनुपनीतत्वं वात्यता, ब्राह्मणसुवर्णतत्समव्यतिरिक्तपरद्रव्यापहरणं स्तेयम्, गृहीतस्य सुवर्णादेः अप्रदानम् ऋणानामनपाकरणम्, सत्यधिकारेऽनाहिताग्नित्वम्, अपण्यस्य लवणादेः विक्रयः, सहोदरस्य ज्येष्ठस्य तिष्ठतः कनीयसः भ्रातुः दाराग्निसंयोगः परिवेदनम्, पणपूर्वाध्यापकादध्ययनग्रहणम्, परदारसेवनम्, पारिवित्यं कनीयसि कृतविवाहे ज्यष्ठस्य विवाहराहित्यम्, वार्धुष्यं प्रतिषिद्धवृद्ध्युपजीवनम्, लवणस्योत्पादनम्, स्त्रीशूद्रक्षत्रियवधः, निन्दितार्थोपजीविनम्, नास्तिक्यम्, व्रतलोपः ब्रह्मचारिणः स्त्रीप्रसंगः, सुतानामपत्यानां विक्रयः, धान्यकुप्यपशुस्तेयम्, अयाज्यानां याजनम्, पितृमातृसुतत्यागः, तडागारामविक्रयः, कन्यादूषणम्, परिविन्दकयाजनम्, कौटिल्यम् व्रतलोपनम्, आत्मनोऽर्थे क्रियारम्भः, मद्यपस्त्रीनिषेवणम्, स्वाध्यायत्यागः, अग्नित्यागः, सुतत्याग, बान्धवत्यागः, इन्धनार्थं द्रुमच्छेदः, स्त्रीहिंसा,

औषधजीवनम्, हिंस्रयन्त्रविधानम्, आत्मविक्रय:, शूद्रप्रेष्यम्, हीनसख्यम्, हीनयोनिनिषेवणम्, अनाश्रमे वास:, परपाककरित्वम्, असच्छास्त्रस्य अधिगम:, सर्वाकरेषु सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञयाधिकारित्वम्, भार्याया:विक्रय: चैतेषां गोवधादीनां प्रत्येकमुपपातकसंज्ञा वेदितव्या । मनुना पुनरन्यान्यपि निमित्तानि जातिभ्रंशकरसंकरीकरणापात्रीकरणमलिनीकरणसंज्ञकानि परिगणितानि । यथाह मनु: - ब्राह्मणस्य रूज:कृत्वा घ्रात्यघ्रेयमद्ययो: । जैहम्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतम् । खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा । संकरीकरणं मीनाहिमहिषस्य च ।। निन्दितेभ्यो धनादानं वाणज्यं शूद्रसेवनम् । अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम् ।। कृमिकीटवयोहत्या मद्यानुगतभोजनम् । फलैध:कुसुमस्तेयमधैर्यं च मलावहम् ।। कात्यायनेन यथा - महापापं चातिपापं तथा पातकमेव च । प्रासंगिकं चोपपापमित्येवं पञ्चको गण: ।।

## बोधप्रश्ना: -

१. पातकं कतिविधम् ?

उत्तरं..............................................................

२. जातिभ्रशंकरं पापं किम् ?

उत्तरं..............................................................

३. संकरीकरणं पापं किम् ?

उत्तरं..............................................................

४. अपात्रीकरणं नाम पापं किम् ?

उत्तरं..............................................................

## ६.१५. सारांश: -

प्रियपाठका: ! अस्मिन् खण्डे षष्ठभागे कर्मविपाक: निरूपित: । महापातकानां विशेषस्वरूपं प्रतिपादितम् । प्रायश्चित्तेषु अधिकारिनिरूपणं विहितम् । प्रायश्चित्ताकरणे दोष: विचारित: । प्रायश्चित्तस्यावश्यता निगदिता । पञ्चमहापातकानि आलोचितानि। ब्रह्महत्यासमानि पापानि निरूपितानि। सुरापानसमानि पापानि विचारितानि । सुवर्णस्तेयसमानि पापानि प्रतिपादितानि । गुरुतल्पसमानि पापानि प्रदर्शितानि । गुरुतल्पातिदेश: व्याख्यात: । उपपातकानि च उल्लिखितानि।

## ६.१६. पारिभाषिकशब्दा: -

पतङ्ग: - शलभ:

| | | |
|---|---|---|
| पुल्कसः | - | प्रतिलोमनिषादेन शूद्रायां जातः |
| वेनः | - | वैदेहकेनाम्बष्ठयां जातः वेनः |
| पिशुनः | - | विद्यमानपरदोषख्यापनशीलः |
| सूचकः | - | असद्योषसंकीर्त्तनः |
| कुमारी | - | उत्तमजातीया कन्यका |
| प्रत्यवायी | - | पापी |
| जैह्म्यम् | - | कौटिल्यम् |
| स्वयोनिः | - | भगिनी |
| अन्त्यजा | - | चाण्डाली |
| स्नुषा | - | सुतस्त्री |
| धात्री | - | मातृव्यतिरिक्ता स्तन्यदानादिना पोषयित्री |
| साध्वी | - | व्रतचारिणी |
| वर्णोत्तमा | - | ब्राह्मणी |
| स्तेयम् | - | ब्राह्मणसुवर्णतत्समव्यतिरिक्तपरद्रव्यापहरणम् |
| परिवेदनम् | - | सोदरस्य ज्यष्ठस्य तिष्ठतः कनीयसः भ्रातुर्दाराग्निसंयोगः |
| पारिवित्त्यम् | - | कनीयसि कृतविवाहे ज्येष्ठस्य विवाहराहित्यम् |
| वार्धुष्यम् | - | प्रतिषिद्धवृद्ध्युपजीवनम् |

## ६.१७. आदर्शप्रश्नाः -

### निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः)

१. महापातकिनां विशेषस्वरूपं मिताक्षरादि प्रतिपादयत ।

२. प्रायश्चित्तेषु अधिकारिनिरूपणं ग्रन्थोक्तदिशा कुरुत ।

३. प्रायश्चित्तेन पापक्षयो भवति न वेति विज्ञानेश्वरमतानुसारमालोचयत ।

४. नरः कथं पतनमृच्छति याज्ञवल्क्यदिशा विचारयत ।

### विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः)

१. नरकस्वरूपं ग्रन्थोक्तदिशा निरूपयत ।

२. पञ्चमहापातकानां नामान्युल्लिख्य तेष्वेकस्यालोचनं कुरुत ।

३. गुरुतल्पातिदेशं मितक्षराकारदिशा विवेचयत ।

४. विंशत्युपपातकानां नामानि लिखत ।

**लघुप्रश्नाः - (प्रत्येकं ५ अङ्काः)**

१. ब्रह्महत्यासमानि पापानि लिखत ।

२. सुवर्णस्तेयसमानि पापानि निरूपयत ।

३. गुरुतल्पसमानि पापानि विलिखत ।

४. सुरापानसमानि पापानि प्रतिपादयत ।

५. के कष्टान् नरकान् यान्त्यालोचयत ।

**एकाङ्कप्रश्नाः - (प्रत्येकं १ अङ्कः)**

१. महापातकिनः कति ?

२. पातकं नाम किम् ?

३. कस्माद्धेतोः महापातकिन इह प्रजायन्ते ?

४. मृगश्वसूकरोष्ट्राणां योनिं कः प्राप्नोति ?

५. खरपुल्कसवेनानां योनिं कः प्राप्नोति ?

६. तृणगुल्मलतात्वं कः प्राप्नोति ?

७. कृमिकीटपतङ्गत्वं कः प्राप्नोति ?

८. कः क्षयरोगी स्यात् ?

९. श्यावदन्तकः कः भवेत् ?

१०. हेमहारी किं भवति ?

११. अन्नहर्त्ता किं स्यात् ?

१२. कः मूकः स्यात् ?

१३. कः पूतिनासिकः स्यात् ?

१४. परस्य योषितं ब्रह्मस्वञ्चापहृत्य किं भवति ?

१५. कः मूषकः स्यात् ?

१६. एनः केन अपैति ?

१७. वार्धुष्यपदेन किमवबोध्यते ?

## ६.१८. एकाङ्कप्रश्नानामुत्तराणि -

१. पञ्च,

२. पापम्,

३. कर्मक्षयात्,

४. ब्र्ह्महा,

५. सुरापः,

६. गुरुतल्पगः,

७. स्वर्णहारी,

८. ब्र्राह्महा,

९. सुरापः,

१०. कुनखी,

११. आमयावी,

१२. वागपहारकः,

१३. पिशुनः,

१४. ब्र्ह्मराक्षसः,

१५. धान्यहारी,

१६. प्र्रायश्चित्तेन,

१७. प्र्रतिषिद्धवृद्ध्युपजीवनम् ।

# षष्ठपत्रम्

## द्वितीयखण्ड:, सप्तमभाग: ( Unit - VII)

## (प्रायश्चित्तप्रकरणस्य ब्रह्महत्याप्रायश्चित्तादारभ्य संसर्गप्रायश्चित्तं यावत्)

### ७.१. प्रस्तावना -

अस्मिन् खण्डे सप्तमभागे नैमित्तिकप्रायश्चित्तेषु ब्रह्महत्याप्रायश्चित्तम्, ब्रह्महत्याप्रायश्चित्तस्य नैमित्तिकसमाप्त्यबधि:, ब्रह्महत्याप्रायश्चित्तान्तरम्, ब्रह्महत्याप्रायश्चित्तातिदेश:, सुरापानप्रायश्चित्तम्, सुरापानप्रायश्चित्तान्तरम्, मद्यपाने प्रायश्चित्तम्, सुवर्णस्तेयप्रायश्चित्तम्, सुवर्णस्तेयप्रायश्चित्तान्तरम्, गुरुतल्पप्रायश्चित्तम्, गुरुतल्पप्रायश्चित्तान्तरम्, संसर्गप्रायश्चित्तं चैते विषया आलोचिता:।

### ७.२. उद्देश्यम् -

प्रियपाठका: ! भवन्त: अस्मिन् खण्डे सप्तमभागे अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- ब्रह्महत्याप्रायश्चित्तं निरूपयितुं शक्नुवन्ति ।
- ब्रह्महत्याप्रायश्चित्तस्य नैमित्तिकसमाप्त्यबधिं निर्णेतुं प्रभवन्ति ।
- ब्रह्महत्याया: प्रायश्चित्तान्तरं प्रतिपादयितुमर्हन्ति ।
- ब्रह्महत्याप्रायश्चित्तातिदेशमालोचयिष्यन्ति ।
- सुरापानप्रायश्चित्तं निर्णेतुं शक्नुवन्ति ।
- सुरापानप्रायश्चित्तान्तरं प्रतिपादयितुमर्हन्ति ।
- मद्यपाने प्रायश्चित्तं निरूपयितुं प्रभवन्ति ।
- सुवर्णस्तेयप्रायश्चित्तं निर्णेतुं प्रभवन्ति ।
- सुवर्णस्तेयप्रायश्चित्तान्तरं प्रतिपादयितुं शक्नुवन्ति ।
- गुरुतल्पप्रायश्चित्तं निरूपयितुमर्हन्ति ।
- गुरूतल्पप्रायश्चित्तान्तरं प्रतिपादयितुं शक्नुवन्ति ।
- संसर्गप्रायश्चित्तं निर्णेतुं प्रभवन्ति ।

### ७.३. ब्रह्महत्याप्रायश्चित्तम्-

यथोक्तं याज्ञवल्क्येन -

शिर:कपाली ध्वजवान्भिक्षाशी कर्म वेदयन् ।

ब्रह्महा द्वादशाब्दानि मितभुक्शुद्धिमाप्नुयात् ।।

शिरस: कपालमस्यास्तीति शिर:कपाली, तथा ध्वजवान् 'कृत्वा शवशिरो ध्वजम्' इति मनुस्मरणात्। अन्यच्छिर:कपालं दण्डाग्रसमारोपितं ध्वजग्राह्यम् । 'ब्राह्मणो ब्राह्मणं घातयित्वा तस्यैव शिर:कपालमादाय तीर्थान्यनुसंचरेत्' इति शातातपस्मरणात् । तदलाभे अन्यस्यैव ब्राह्मणस्य ग्राह्यम् । 'खट्वाङ्गकपालपाणि:' इति गौतमस्मरणात् । 'खट्वाङ्ग'शब्देन दण्डारोपितशिर: कपालात्मको ध्वजो गृह्यते, न पुन: खट्वैकदेश: । एतच्च कपालधारणचिह्नार्थं न पुन योजनार्थं भिक्षार्थं वा । 'मृण्मयकपालपाणिर्भिक्षायै ग्रामं प्रविशेत्' इति गौतमस्मरणात् । 'ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत्' इति मनुस्मरणात् । ग्रामसमीपादौ वा । कृतवापनो वा निवसेद् ग्रामान्ते गोव्रजेऽपि वा । आश्रमे वृक्षमूले वा गोब्राह्मणहिते रत: ।। अत एव संवर्त: - 'ब्रह्महा द्वादशाब्दानि बालवासा जटी ध्वजी' इति तथा भिक्षाशनशीलश्च भवेत् । भिक्षा च लोहितकेन मृण्मयखण्डशरावेण ग्राह्या । सप्तगाराण्येवान्नमिष्टं भिक्षार्थं प्रविशेत् । 'सप्तागाराण्यसंकल्पितानि चरेद्भैक्षम्' इति वसिष्ठस्मरणात् । तथा एककाल एव भिक्षा ग्राह्या । एतच्च भैक्षं ब्राह्मणादिवर्णेष्वेव कार्यम् । तथा 'ब्रह्महाऽस्मि' इति स्वकर्म ख्यापयन् द्वारि स्थित: भिक्षां चरेत् । तथा ब्रह्मचर्यादियुक्तेन तेन भवितव्यम् । खट्वाङ्गकपालपाणिर्द्वादशसंवत्सरान्ब्रह्मचारी भिक्षायै ग्रामं प्रविशेत्कर्माचक्षाण: । 'स्थानासनाभ्यां विहरेत् सवनेषूदकोपस्पर्शी शुद्ध्येत्' इति गौतम:। एवं द्वादशवर्षाणि व्रतचर्यामावर्त्य ब्रह्महा शुद्धिमाप्नुयात् । अयं चाकामकृतब्रह्मवधविषय: । यथोक्तं मनुना -

इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम् ।
कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ।।

तत्र केचिन्मन्यन्ते ब्रह्महा द्वादशाब्दानीत्यत्र ब्रह्मशब्दस्यैकस्मिन् द्वयोर्बहुषु साधारणत्वादेकस्मिन् ब्राह्मणवधे यत्प्रायश्चित्तं तदेव द्वितीये तृतीयेऽपि । तत्रैकब्राह्मणवधनिमित्तैकप्रायश्चित्तानुष्ठाने सतीदं कृतमिदं नेति न शक्यते वक्तुम् । अतो देशकालकर्तॄणां विशेषत्वात् तन्त्रानुष्ठानेनैव पापक्षयलक्षणकार्याणां निष्पत्ति: । न चैवं वाच्यम्, 'द्वित्रब्राह्मणवधे पापस्य गुरुत्वादेनसि गुरुणि गुरूणि लघुनि लघूनि' इति गौत्तमवचनादावृत्तमेव प्रायश्चित्तं युक्तम् । वधे प्रोत्साहकादीनामपि दण्डप्रायश्चित्ते कल्प्ये यथाह पैठिनसि: - ' हन्ता मन्त्रोपदेष्टा च तथा संप्रतिपादक:। प्रोत्साहक: सहायश्च तथा मार्गानुदेशक: ।। आश्रय: शस्त्रदात्ता च भक्तदाता विकर्मिणाम् । उपेक्षक: शक्तिमांश्चेद्दोषवक्ताऽनुमोदक: ।। अकार्यकारिणस्त्वेषां प्रायश्चित्तं प्रकल्पयेत् । यथाशक्त्यनुरूपं च दण्डमेषां प्रकल्पयेत् । अनुपनीतस्य बालस्य पादमात्रमेव प्रायश्चित्तम् । 'स्त्रीणामर्धं प्रदातव्यं वृद्धानां रोगिणां तथा । पादो बालेषु दातव्य: सर्वपापेष्वयं

विधिः इति विष्णुस्मरणात् । अतश्च यच्छङ्खेनोक्तम् ऊनैकादशवर्षस्य पञ्चवर्षात् परस्य च । प्रायश्चित्तं चरेद्भ्राता पिता वाऽन्यः सुहृज्जनः ।। इति प्रतिपादितोक्तम् - अतो बालतरस्यास्य नापराधो न पातकम् । राजदण्डो न तस्यास्ति प्रायश्चित्तं न विद्यते । प्रायश्चितानुसारं दानं कुर्यात् । तथा च दक्षः - सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे । आचार्ये शतसाहस्रं श्रोत्रिये दत्तमक्षयम् । अतः परस्परोपमर्दपरिहारार्थं विषयव्यवस्था-कल्पना एवोचिता । सा च जातिशक्तिगुणाद्यपेक्षया कल्पनीया; 'जातिशक्तिगुणापेक्षं सकृद् बुद्धिकृता तथा। अनुबन्धादिविज्ञेया प्रायश्चित्तं प्रकल्पयेत् ।।

## बोधप्रश्नाः -

१. कः द्वादशाब्दानि मितभुक्शुद्धिमाप्नुयात् ?

उत्तरं.................................................................

२. ब्राह्महा कतिवर्षाणि व्रतं पालयेत् ?

उत्तरं.................................................................

३. ब्रह्महा किं वेदयन् व्रतं चरेत् ?

उत्तरं.................................................................

४. ब्रह्महा किं कृत्वा वने वसेत् ?

उत्तरं.................................................................

## ७.४. ब्रह्महत्यादिप्रायश्चित्तस्य नैमितिकसामाप्त्यवधिः -

यथोक्तं याज्ञवल्क्येन -

ब्राह्मणस्य परित्राणाद्गवां द्वादशकस्य च ।
तथाऽश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नुयात् ।। ३.२४४

यः चौरव्याघ्रादिभिर्व्यापाद्यमानस्य ब्राह्मणस्यैकस्याप्यात्मप्राणानन्तरे कृत्वा प्राणत्राणं करोति गवां द्वादशकस्य असौ असंपूर्णेऽपि द्वादशवार्षिके शुद्ध्येत् । यद्यपि प्राणत्राणे प्रवृत्तस्तदकृत्यैव म्रियते तथापि शुद्ध्यत्येव । अत एव मनुना -

ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान्परित्यजन् ।
मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य च ।।

तथा परकीयाश्वमेधावभृथाख्यकर्माङ्गभूतस्नानसमये स्वयमपि स्नात्वा ब्रह्महत्यायाः शुद्धिमाप्नुयात्। स्नानं च स्वकल्मषं विख्याप्य कुर्यात् । अश्वमेधावभृथं गत्वा तत्रानुज्ञातः स्नातः सद्यः पूतो भवति' इति शङ्खस्मरणात् । न पुनः स्वतन्त्रं प्रायश्चित्तान्तरम् । तथाह शङ्खः-

द्वादशे वर्षे शुद्धिं प्राप्नोति अन्तरा वा ब्राह्मणं मोचायित्वा, गवां द्वादशानां परित्राणात्सद्य: एवाश्वमेधावभृथस्नानाद्वा पूतो भवति । पुनश्च 'ब्राह्मणार्थे गवार्थे वा सद्य: प्राणान्परित्यजन् । मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य च' ।। एवं दृढव्रतो नित्यं ब्रह्मचारी समाहित:। समाप्ते द्वादशे वर्षे ब्रह्महत्यां व्यपोहति ।

किञ्च, दीर्घेण बहुकालव्यापिना तीव्रेण दु:सहनेनामयेन कुष्ठादिव्याधिना ग्रस्तं ब्राह्मणं गां वा तथाविधां पथि दृष्ट्वा निरातङ्कं कृत्वा ब्रह्महा शुद्धिर्भवति ।

किञ्च, विप्रस्य अपहृतसर्वस्वतया अवसीदत: संबन्धि द्रव्यं भूहिरण्यादिकं चौरैर्हृतं साकल्येनानीय रक्षणं य: करोति स विशुद्ध्यति । आनयने प्रवृत्त: स्वयं चौरैर्घातितो वा तन्निमित्तं ब्राह्मणसर्वस्वानयनार्थं तत्र युद्ध्यमान: शस्त्रै: क्षत: मृतकल्प: जीवन्नपि विशुद्ध्यति । यथोक्तं याज्ञवल्क्येन -

आनीय विप्रसर्वस्वं हृतं घातित एव वा ।
तन्निमित्तं क्षत: शस्त्रैर्जीवन्नपि विशुद्ध्यति ।। (३.२४६)

## बोधप्रश्ना: -

१. ब्रह्महा कथं शुद्धिमाप्नुयात् ?

उत्तरं.............................................................

२. कस्य परित्राणाद्ब्रह्महा शुद्धिमाप्नुयात् ?

उत्तरं.............................................................

३. ब्रह्महा कदा कस्मिन् स्नात्वा शुद्धिमाप्नुयात् ?

उत्तरं.............................................................

## ७.५. ब्रह्महत्याया: प्रायश्चित्तान्तरम् -

यथोक्तं याज्ञवल्क्येन -

लोमभ्य: स्वाहेत्येवं हि लोमप्रभृति वै तनुम् ।
मज्जान्तां जुहुयाद्वाऽपि मन्त्रैरेभिर्यथाक्रमम् ।। ३.२४७

'लोमभ्य: स्वाहा ' इत्येवमादिभिर्मन्त्रैर्लोमप्रभृतिमज्जान्तां तनुं जुहुयात् । ते च हूयमानद्रव्याणां लोमत्वग्लोहितमांसमेद:स्नाय्वस्थिमज्जानामष्टसंख्यत्वात् अष्टौ मन्त्रा भवन्ति । पुनश्च प्राणान्तिकं यत्प्रोक्तं प्रायश्चित्तं मनीषिभि: । तत्कामकारविषयं विज्ञेयं नात्र संशय: ।।

किञ्च - संग्रामे लक्ष्यभूत: मृत: शुद्धिमाप्नुयात् । गाढमर्मप्रहारजनिततीव्रवेदन: मृतकल्प: जीवन्नपि शुद्धिमाप्नुयात् । यथोक्तं -

संग्रामे वा हतो लक्ष्यभूतः शुद्धिमाप्नुयात् ।

मृतकल्पः प्रहारार्तो जीवन्नपि विशुद्ध्यति ।। ३.२४८

किञ्च, अरण्ये नियताहारः -'जपेद्वा नियताहारः' इति मनुस्मरणात् । त्रिवारं मन्त्रब्राह्मणात्मकं वेदं जपित्वा शुद्ध्यति । यद्वा मिताशनो भूत्वा प्लाक्षात् प्रस्रवणादारभ्य पश्चिमोदधेः प्रतिस्रोतः सरस्वतीं गत्वा विशुद्ध्यति ।

किञ्च, 'न विद्यया केवलया' इत्याद्युक्तलक्षणे पात्रे गोभूहिरण्यादिकं जीवनपर्याप्तं समर्थं धनं दत्वा शुद्धिमाप्नुयात् । तद्धनं यः प्रतिगृह्णाति तस्य वैश्वानरदैवत्येष्टिः शुद्ध्यर्थं कर्तव्या । एतच्चाहिताग्निविषयम्, अनाहिताग्नेस्तु तद्दैवत्यश्चरुर्भवति य एवाहिताग्नेर्धर्मः स एव औपासनिकस्येति गृह्यकारवचनात् । यथाह मनुः - सर्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत् । धनं वा जीवनायालं गृहं वा सपरिच्छदम् ।। प्रक्रान्तप्रायश्चित्तस्य मध्ये विपत्तावपि पापक्षयो भवत्येव । यथाह हारीतः -'प्रायश्चित्ते व्यवसिते कर्त्ता यदि विपद्यते । पूतस्तदहरेवासाविह लोके परत्र च ।।

## बोधप्रश्नाः -

१. कस्मिन् स्थाने लक्ष्यभूतः शुद्धिमाप्नुयात् ?

उत्तरं.............................................................

२. ब्रह्महा विशुद्ध्यर्थं केषां लक्ष्यं स्यात् ?

उत्तरं.............................................................

३. ब्रह्महा अरण्ये कां जप्त्वा शुद्ध्यति ?

उत्तरं.............................................................

## ७.६. ब्रह्महत्याप्रायश्चित्तस्यातिदेशः -

यथोक्तं याज्ञवल्क्येन -

यागस्थक्षत्रविड्घाती चरेद् ब्रह्महणि व्रतम् ।

गर्भहा च यथावर्णं तथात्रेयीनिषूदकः ।। ३.२५१

दीक्षणीयाद्युदवसानीयापर्यन्ते सोमयागप्रयोगे वर्तमनौ क्षत्रियवैश्यौ यो व्यापादयति असौ ब्रह्महणि पुरुषे यद्ब्रह्महत्याव्रतमुपदिष्टं द्वादशवार्षिकादि तच्चरेत् । यद्यपि 'याग' शब्दः सामान्यवचनस्तथाऽपि सोमयागमभिधत्ते । अत्र च गुरुलघुभूतानां द्वादशवार्षिकादिब्रह्महत्याव्रतानां जातिशक्तिगुणाद्यपेक्षया व्यवस्था वेदितव्या । गर्भं च विन्नासु संभूतं हत्वा यथावर्णं यद्वर्णपुरुषवधे यत्प्रायश्चित्तमुक्तं तद्वर्णगर्भवधे तच्चरेत् । अतः स्त्रीपुंनपुसकत्वेनाविज्ञातेऽपि ब्राह्मणगर्भत्वमापन्नं

प्रयुक्तं ब्रह्महत्याव्रतं कुर्यात्। यश्च आत्रेय्या निषूदको व्यापदक: सोऽपि तथा व्रतं चरेत् ।

किञ्च, ब्राह्मणादिहनने कृतनिश्चयस्तद्व्यापादनार्थं सम्यगागत्य शस्त्रादिप्रहारे कृते कथंचित्प्रतिबन्धवशादसौ न मृत: तदा अहत्वाऽपि यथावर्णं ब्रह्महत्यादि व्रतं चरेत् । किञ्च यस्तु सवनसंपाद्यं सोमयानामनुतिष्ठन्तं ब्राह्मणं व्यापादयति तस्मिन्द्वादशवार्षिकादिव्रतं द्विगुणं समादिशेत् ।

## बोधप्रश्ना: -

१. अहत्वापि घातार्थं समागतश्चेत् कीदृशं व्रतं चरेत् ?

उत्तरं.............................................................

२. सवनस्थं ब्राह्मणं व्यापाद्य कतिगुणं व्रतं समादिशेत् ?

उत्तरं.............................................................

३. आत्रेय्या निषूदक: कीदृशं व्रतं चरेत् ?

उत्तरं.............................................................

४. क: ब्रह्महणि व्रतं चरेत् ?

उत्तरं.............................................................

## ७.७. सुरापानप्रायश्चित्तम् -

यथोक्तं विषयेऽस्मिन् याज्ञवल्क्येन -

सुराम्बुघृतगोमूत्रपयसामग्निसंनिभम् ।
सुरापोऽन्यतमं पीत्वा मरणाच्छुद्धिमृच्छति ।। ३.२५३

सुरादीनां मध्येऽन्यतममग्निसंनिभं क्वाथापादिताग्निस्पर्शदाहशक्तिकं कृत्वा पीत्वा सुराप: मरणाच्छुद्धिं प्राप्नोति । गोमूत्रसाहचर्याद्गव्ये एव घृतपयसी ग्राह्ये । एतच्च आर्द्रवाससा कार्यम् । 'सुराप आर्द्रवासाश्च अग्निवर्णां सुरां पिबेत्' इति पैठीनसिस्मरणात् । तथा - 'लौहेन पात्रेण सुरापोऽग्निवर्णां सुरामायसेन पात्रेण ताम्रेण वा पिबेत्' इति प्रचेतसस्मरणात् । एतत् च कामकारविषयम्; 'सुरापाने कामकृते ज्वलन्तीं तां विनिक्षिपेत् । मुखे तया विनिर्दग्धे मृत: शुद्धिमवाप्नुयात्' ।। इति बृहस्पतिस्मरणात्। इत्रेदं चिन्तनीयम् - किं 'सुरा'शब्दो मद्यमात्रे रूढ उत तिसृष्वेव गौडीमाध्वीपैष्टीष्वाहोस्वित्पैष्ट्यामेवेति। तत्र केचिन्मद्यमात्रे रूढ इति वर्णयन्ति । 'अभ्यासे तु सुराया:' इति वसिष्ठे पैष्ट्यादित्रयव्यतिरिक्तेऽपि मद्यमात्रे सुराशब्दप्रयोगदर्शनात् । न चासौ गौण: प्रयोग इति शङ्कनीयम् । पानसं द्राक्षं माधूकं खार्जूरं तालमैक्षवम् । मधूत्थं सैरमारिष्टं मैरेयं नालिकेरजम् ।। समानानि विजानीयान्मद्यान्येकादशैव तु । द्वादशं तु सुरामद्यं

सर्वेषामधमं स्मृतम् ।। मद्यविशेषत्वेन सुराया निर्दिष्टत्वेन सुराशब्दप्रयोग: गौण: । अन्ये पुन: पैष्ट्यादिषु तिसृषु सुराशब्दस्य रूढीं मन्यन्ते । तथा हि 'गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा' इति मनुवचनाद्गुडमधुपिष्टविकारेष्वनादित्वनिर्धारात्तत्रैव मुख्यत्वं युक्तम् । तया - 'सुरा वै मलमन्नानां पाप्मा च मलमुच्यते' इति मनुस्मरणात् । अन्नविकारस्यैव सुरात्वनिर्देशात् गुडमधुनोश्च रसरूपत्वात् तथा चान्नविकारे एव 'सुरा'शब्दस्य श्रुतत्वात् पैष्ट्येव सुरा मुख्य उच्यते । इतरयोस्तु सुराशब्दो गौण: । अतो गुरुप्रायश्चित्तनिमित्ततया गौडीमाध्व्योर्गौण: 'सुरा'शब्दयोग: । 'तस्मात् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्' इति मनुस्मरणात् । 'यक्षरक्ष:पिशाचान्नं मद्यं मांसं सुरासवम् । तद्ब्राह्मणेन नातव्यं देवानामश्नता हवि:' ।। इति मानवे ब्राह्मणेन इति विशेषोपादानात् । क्षत्रियवैश्ययो: दोषा भाव: बृहद्याज्ञवल्क्येन दर्शित: । एवं ब्राह्मसंबन्धित्वेन मद्यमात्रनिषेधे - गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा । यथैवैका तथा सर्वा न पातव्या द्विजोत्तमै: ।। इति मनु: । सुरापाननिषेधस्तु जात्याश्रय इति स्थिति: । अत: 'पादो बालेषु दातव्य: सर्वपापेष्वयं विधि' रिति वचनात् सुरापाने प्रायश्चित्तम् । अत: त्रैवर्णिकानां उत्पत्तिप्रभृत्येव पैष्टीप्रतिषेध: । ब्राह्मणस्य मद्यमात्रप्रतिषेधोऽप्युत्पत्तिप्रभृतिरेव । राजन्यवैश्ययोस्तु न कदाचिदपि गौड्यादिमद्यप्रतिषेध: । शूद्रस्य न सुराप्रतिषेधो नापि मद्यप्रतिषेध: ।

## बोधप्रश्ना: -

१. सुराप: किं पीत्वा मरणाच्छुद्धिमिच्छति ?

उत्तरं..........................................................

२. सुरा कतिविधा ?

उत्तरं..........................................................

३. कामकृते सुरापाने कीदृशीं सुरां पिबेत् ?

उत्तरं..........................................................

४. कै: सुरा न पातव्या ?

उत्तरं..........................................................

## ७.८. सुरापानप्रायश्चित्तान्तरम् -

बालवासा जटी वापि ब्रह्महत्याव्रतं चरेत् ।
पिण्याकं वा कणान्वाऽपि भक्षयेत्त्रिसमा निशि ।। ३.२५४

गोछागादिलोमनिर्मितवस्त्रप्रावृतो बालवासा:, 'बालवासो' गृहणं

चीरवल्कलयोरूपलक्षणार्थम्; सुरापगुरुतल्पगौ चीरवल्कलवासौ ब्रह्महत्याव्रतं चरेयाताम् । 'जटि' ग्रहणं मुण्डित्वनिराकरणार्थम् । 'ब्रह्महत्याव्रतं चरेत्' इति अनेनैव सिद्धे यद्वालवासादिग्रहणं तदन्यत्र संभवि स्वयं मारितशिर:कपालादिनिवृत्यर्थम् । इदमकामत: बालबुद्ध्या य: सुरां पिबति तद्विषयम् । सुरां पीत्वा द्वादशवार्षिकं व्रतं चरेत् । अत एव वृद्धहारीत: - द्वादशभिर्वर्षै: महापातकिन: पूयन्ते' इति । अथवा पिण्याकं वर्षत्रयपर्यन्तं रात्रौ भक्षयेत् । कणान् वाऽपि पूर्ववद्भक्षयेत् । एतच्च सकृदेव कार्यम् । 'कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि' इति मनुस्मरणात् । यत्पुनरापस्तम्बवचनम् - स्तेयं कृत्वा सुरां पीत्वा गुरुदारान्गत्वा ब्रह्महत्यां च कृत्वा चतुर्थं कालं मितभोजनोऽभ्युपेयात्सवनानुकल्पं स्थानासनाभ्यां विहरंस्त्रिभिर्वर्षै: पापं व्यपनुदति । संस्कृत: सन् न पुन: सुरां पिबेत् । यत्तु मनुवचनम् -कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि । सुरापानापनुत्यर्थं बालवासा जटी ध्वजी ।। तत्तालुमात्रसंयोगे सुराया अबुद्धिपूर्वे द्रष्टव्यम् । यत्तु बौधायनीयम् - त्रैमासिकममत्या सुरापाने कृच्छ्राद्बदपादं - चरित्वा पुनरुपनयनम् इति, यच्च याय्यम् - सुरां पीत्वा द्विजं गत्वा रुक्मं हृत्वा द्विजन्मन: । संयोगं पतितैर्गत्वा द्विजश्चान्द्रायणं चरेत् ।। यदा तु सुरासंस्पृष्टं शुष्करसमेवान्नं भक्षयति तदा पुनरुपनयनम् । ब्राह्मणस्तु सुरापस्य गन्धमाध्राय सोमप: । प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुद्ध्यति ।। इति सोमयाजिन एवामतिपूर्वे, मतिपूर्वे तु द्विगुणम् ।

## बोधप्रश्ना: -

१. ब्रह्महा निशि कतिसमा: पिण्याकं भक्षयेत् ?

उत्तरं..........................................................

२. कतिभि: वर्षै: महापातकिन: पूयन्ते ?

उत्तरं..........................................................

३. पिण्याकभक्षणं रात्रौ कतिवारं कार्यम् ?

उत्तरं..........................................................

## ७.८.१. मद्यपाने प्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

अज्ञानात्तु सुरां पीत्वा रेतोविण्मूत्रमेव च ।
पुन: संस्कारमर्हन्ति त्रयो वर्णा द्विजातय: ।। ३.२५५

य: पुनरज्ञानादुदकबुद्ध्या सुरां ब्राह्मण: पिवति, ये च ब्राह्मणादय: रेतो विण्मूत्राणि प्राश्नन्ति, ते त्रयोऽपि द्विजातय: वर्णा: तप्तकृच्छ्रपूर्वकं पुन: उपनयनं प्रायश्चित्तमर्हन्ति । मद्यपानेऽत्र योऽयं

संस्कारः स ब्राह्मणस्यैव । सुराशब्दश्चात्र मद्यपरः; प्रायश्चित्तस्यातिलघुत्वात् । अज्ञानतो मुख्यसुरापाने द्वादशवार्षिकस्य विहितत्वाच्च । अत एव मद्यशब्दः प्रयुक्तः । अमत्या मद्यपाने पयो घृतमुदकं वा त्र्यहं तप्तानि पिबेत्स तप्तकृच्छ्रस्ततोऽस्य संस्कारो मूत्रपुरीषकुणपरेतसां प्रासने च' इति । चान्द्रायणं वा शङ्खोक्तम् - असुरामद्यपायी चान्द्रायणं चरेत्' इति । अज्ञानतोऽभ्यासे तु वसिष्ठः - मद्यभाण्डस्थितं तोयं यदि कश्चित्पिबेद्द्विजः । पद्मोदुम्बरविल्वानां पलाशस्य कुशस्य च ।। एतेषामुदकं पीत्वा त्रिरात्रेण विशुद्ध्यति।

## बोधप्रश्नाः -

१. कानि पीत्वा वर्णाः पुनः संस्कारमर्हन्ति ?

उत्तरं..........................................................

२. अज्ञानात् सुरां पीत्वा के पुनः संस्कारमर्हन्ति ?

उत्तरं..........................................................

३. सुराशब्देन किं गृह्यते ?

उत्तरं..........................................................

## ७.८.२. द्विजातिभार्याणां सुरापानप्रतिषेधविचारः -

यथोक्तं याज्ञवल्क्येन -

परलोकं न सा यति ब्राह्मणी या सुरां पिबेत् ।
इहैव सा शुनी गृध्री सूकरी चोपजायते ।। ३.२५६

या द्विजातिभार्या सुरां पिवति सा कृतपुण्याऽपि सती पतिलोकं न याति किंत्विहैव लोके श्वगृध्रसूकरलक्षितां तिर्यग्योनिं क्रमेण प्राप्नोति । ब्राह्मणी गृहणं चात्र 'तिसो वर्णानुपूर्व्येण' इति न्यायेन यस्य द्विजातेः यावत्यो भार्यास्तासामुपलक्षणम् । अत एव मनुः - पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत् । पतितार्धशरीरस्य निष्कृतिर्न विधीयते ।। धर्मार्थकामेषु सहाधिकाराद्यम्पत्योरेकशरीरत्वमेव । तस्माद्द्विजातिभार्यया ब्राह्मण्याद्यया न सुरा पेया । 'ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् इति निषेधविधौ वर्णत्रयभार्याणामपि पुतिषेधे सिद्धे पुनर्वचनं द्विजातिभार्यायाः शूद्राया अपि सुराप्रतिषेधः प्राप्त्यर्थम् । अतः द्विजातिभार्याभिः सुरापाने प्रायश्चित्तस्यार्धं कार्यम् । शूद्रभार्यास्तु शूद्रयाः शूद्रवदेव न प्रतिषेधः ।

## बोधप्रश्नौ: -

१. का ब्राह्मणी पतिलोकं न याति ?

उत्तरं..........................................................

२. इह का शुनीरूपेणोपजायते ?

उत्तरं.........................................................

## ७.९. सुवर्णस्तेयप्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

ब्राह्मणस्वर्णहारी तु राज्ञे मुसलमर्पयेत् ।

स्वकर्मख्यापयंस्तेन हतो मुक्तोऽपि वा शुचिः ।। ३.२५७

ब्राह्मणस्वामिकं सुवर्णं योऽपहरति असौ सुवर्णस्तेयं मया कृतमित्येवं स्वकर्मख्यापयन् राज्ञे मुसलं समर्पयेत् । मुसलसमर्पणस्य दृष्टार्थत्वात्तेन मुसलेन राजा तं हन्यात् । तेन राज्ञा हतो मृतो वा शुद्धो भवति । 'अपहरण' शब्देन च समक्षं परोक्षं वा बलाच्चौर्येण वा क्रियादिस्वत्वहेतुं विना ग्रहणमुच्यते । शङ्खेनात्र विशेष उक्तः - सुवर्णस्तेनः प्रकीर्णकेशः आर्द्रवासा आयसं मुसलमादाय राजानमुपतिष्ठेत् 'इदं मया पापं कृतम् अनेन मुसलेन मां घातयस्व' इति स राज्ञा शिष्टः सन् पूतो भवति । अत एव मनुनोक्तम् - ततो मुसलमादाय सकृद्धन्यात्तु तं स्वयम् इति एवं सकृत्ताडनेन हतो मृतः शुद्ध्येत्, मुक्तो वा मरणाज्जीवन्नपि विशुद्ध्येदिति । 'सुवर्णस्तेयकृद्विप्रः' इति विप्रग्रहणं तन्नरमात्रोपलक्षणम् । एतच्च मरणान्तिकं मतिपूर्वसुवर्णस्तेयविषयम् । 'मरणान्तिकं हि यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः । यत्तु कामकृते पापे विज्ञेयं नात्र संशयः ।। अत्र 'सुवर्ण'शब्दः परिमाणविशिष्टहेमद्रव्यवचनो न जातिमात्रवचनः' 'जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतम् । तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते ।। गौरस्तु ते त्रयः षड्भिर्यवो माषस्तु ते त्रयः । कृष्णलः पञ्च ते माषस्ते सुवर्णस्तु षोडश' ।। इति षोडशमासपरिमिते 'सुवर्ण'शब्दस्य परिभाषितत्वात् । अतो ब्राह्मणसुवर्णापहरणं महापातकम्। अतः षोडशभाषात्मकसुवर्णपरिमितहेमहरणम् एव महापातकित्वं तन्निमित्तं मरणान्तिकादिप्रायश्चित्तविधानं च। द्वित्रादिमाषात्मकहेमहरणं तु क्षत्रियादिहेमहरणवत् उपपातकमेवेति युक्तम् । किंच, सुवर्णान्न्यूनपरिमाणहेमहरणे प्रायश्चित्तान्तरोपदेशात्तत्परिमाणस्यैव हेम्नः हरणे मरणान्तिकादिप्रायश्चित्तमिति युक्तम् । तथा च षड्त्रिंशन्मते - बालाग्रमात्रे प्राणायामम्, लिक्षमात्रे प्राणायामत्रयम्, राजसर्षपमात्रेऽपहरणे प्राणायामचतुष्टयम्, गौरसर्षपमात्रे सावित्रीं वै दिनं जयेत् । यवमात्रे सुवर्णस्य प्रायश्चित्तं दिनद्वयम् ।। सुवर्णकृष्णलं ह्येकमपहृत्य द्विजोत्तमः कुर्यात्सान्तपनं कृच्छ्रं तत्पापस्यापनुत्तये ।। अपहृत्य सुवर्णस्य माषमात्रं द्विजोत्तमः । गोमूत्रयावकाहारस्त्रिभिर्मासैर्विशुद्ध्यति ।। सुवर्णस्यापहरणे वत्सरं यावकी भवेत् । ऊर्ध्वं प्राणान्तिकं ज्ञेयमथवा ब्रह्महव्रतम् ।।

## बोधप्रश्नौ : -

१. ब्राह्मणस्वर्णहारी राज्ञे किमर्पयेत् ?

उत्तरं..........................................................

२. सुवर्णापहारी कथं शुद्ध्यति ?

उत्तरं..........................................................

## ७.१०.सूवर्णस्तेयप्रायश्चित्तान्तरम् -

यथोक्तं याज्ञवल्क्येन -

अनिवेद्य नृपे शुद्ध्येत्सुरापव्रतमाचरन् ।

आत्मतुल्यं सुवर्णं वा दद्याद्वा विप्रतुष्टिकृत् ।। ३.२५८

स्वीयं स्तेयं राजन्यनिवेद्य सुरापव्रतं द्वादशवार्षिकमाचरन् शुद्ध्येत् । एतचाकामकारविषयम् । यदा वस्त्रप्रान्तग्रथितं सुवर्णादिकमज्ञानादपहरति रजतादिद्रव्यान्तरबुद्ध्या वा हृत्वा अनन्तरमेव अन्यस्मै दत्तं नाशितं वा न पुन: स्वामिने प्रत्यर्पितं तदा संभवत्येवाकामतोऽपहार: । यद्यपि ईदृशमेवासुवर्णं सुवर्णभ्रान्त्यापहरति, तथापि नेदं प्रायश्चित्तम् । अत: नेदृशमज्ञानत: स्वर्णापहार: प्रायश्चित्तस्य निमित्तम्। अस्मिन्नेव विषये यदाऽपहर्ता अत्यन्तमहाधन: तदात्मतुलितं सुवर्णं दद्यात् । अथ तावद्धनं नास्ति तपश्चर्यायां चाशक्तस्तदा विप्रस्य यावज्जीवं कुटुम्बभरणपर्याप्ततया तुष्टिकरं धनं दद्यात् ।यदा तु निर्गुणस्वामिकं द्रव्यमपहरति, तदा एतदेव व्रतं स्तेन: पादन्यूनं समाचरेत् । यत्तूक्तं सुमन्तुना - सुवर्णस्तेयी मासं सावित्र्याऽष्टसहस्रमाज्याहुतीर्जुहुयात् । प्रत्यहं त्रिरात्रमुपवासं तप्तकृच्छ्रेण च पूतो भवति इति तत्पूर्वोक्तमाषपरिमाणसुवर्णापहारप्रायश्चित्तेन सह विकल्प्यते । यदप्यपरं तेनैवोक्तम् - सुवर्णस्तेयी द्वादशरात्रं वायुभक्ष: पूतो भवति ।अत्रापि स्त्रीबालवृद्धादिस्वधर्मेव प्रायश्चित्तं वेदितव्यम् ।

## बोधप्रश्ना : -

१. स्वीयं स्तेयं राजन्यनिवेद्य कस्य व्रतं चरन् शुद्ध्येत् ?

उत्तरं..........................................................

२. सुवर्णहारी कदा आत्मतुलितं सुवर्णं दद्यात् ?

उत्तरं..........................................................

३. सुवर्णस्तेयी कतिरात्रं वायुभक्ष: पूतो भवति ?

उत्तरं..........................................................

## ७.११. गुरुतल्पप्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

तप्तेऽय:शयने सार्धमायस्या योषिता स्वपेत् ।
गृहीत्वोत्कृत्य वृषणौ नैर्ऋत्यां चोत्सृजेत्तनुम् ।। ३.२५९

'समा वा गुरुतल्पग' इति वक्ष्यमाणश्लोकगतं गुरुतल्पगपदमत्र संबध्यते । तप्तेऽय:शयने यथा मरणक्षमं भवति तथा तप्ते अग्निवर्णे कृते कार्ष्णायासे शयने अयोमय्या स्त्रीप्रकृत्या तप्तया सह गुरुतल्पग: स्वप्यात् । एवं सुप्त्वा तनुं उत्सृजेत् म्रियेतेति यावत् । शयनं च गुर्वङ्गनागमनं मया कृतम्' इत्येवं स्वकर्म विख्याप्य कुर्यात् । तथा मुण्डितलोमकेशेन घृताभ्यक्तेन च कर्तव्यम् । अथवा वृषणौ सलिङ्गौ स्वयमुत्कृत्य अञ्जलिना गृहीत्वा नैर्ऋत्यां दिशि देहपातान्तमकुटिलगतिर्गत्वा तनुमुत्सृजेत् । यथाह मनु: - स्वयं वा शिश्नवृषणावुत्कृत्याधाय अञ्जलौ । नैर्ऋतीं दिशमातिष्ठेदानिपातादजिह्मग: ।। 'क्षुरेण शिश्नवृषणावुत्कृत्यानवेक्षमाणो व्रजेत्' । इति शङ्खलिखितस्मरणात् । एवं गच्छन् यत्र कुड्यादिना प्रतिवध्यते तत्रैव मरणान्तं तिष्ठेत् । दण्डोऽप्यत्रायमेव । इदमेव मरणान्तिकदण्डमभिप्रेत्य उक्तं मनुना- राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवा: । निर्मला: स्वर्गमायान्ति सन्त: सुकृतिनो यथा ।। प्रायश्चित्तं तु कुर्वाणा सर्वे वर्णा यथोदितम् । नाङ्क्या राज्ञा ललाटे स्युर्दाप्यास्तूत्तमसाहसम्।। गुरुशब्दश्च मुख्यया पितरि वर्तते । निषेकादीनि कर्माणि य: करोति यथाविधि । सम्भावयति चान्नेन स विप्रो गुरुरुच्यते ।। योगीश्वरेण निषेकादिकर्माभिप्रायेण उक्तम् । स गुरु: य: क्रियां कृत्वा वेदमस्मै प्रयच्छति' । गुरुशब्दस्य अन्यत्रापि प्रयोगो दृश्यते । 'उपनीय गुरु: शिष्यम्' इत्यादिना आचार्ये । स्वल्पं वा बहु वा यस्य श्रुतस्योपकरोति य: । तमपीह गुरुं विद्यात्तं इत्युपाध्याये । व्यासेनाप्यत्र प्रयोगो दर्शित: गुरवो मातृपितृपत्याचार्यविद्यादातृज्येष्ठभातर ऋत्विजो भयत्रातान्नदाता च' इति । 'आचार्य: श्रेष्ठोगुरुणाम्' इति । किञ्च यद्यतिशयितत्वमात्रेण मुख्यत्वं उच्यते तर्हि सहस्रमिति वचनान्मातुरेव गुरुत्वं स्यात् । तस्मात्सर्वे गुरवस्तत्पत्नीगमनं गुर्वङ्गनागमनमिति युक्तम् । अत एव वसिष्ठेन - 'आचार्यपुत्रशिष्यभार्यासु चैवम्' इत्याचार्यदारेष्वातिदेशिकं गुरुतल्पप्रायश्चित्तमुक्तम् । किञ्च, पितृभार्यां तु विज्ञाय सवर्णां योऽधि गच्छति । जननीं चाप्यविज्ञाय नामृत: शुद्धिमाप्नुयात् ।। इति षडत्रिंन्मतेऽभिधानात् । ननु च 'मातु: सपत्नीं भगिनीमाचार्यतनयां तथा । आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पग: ।। तत्समवर्णोत्तमवर्णपितृदारगमने अकामकृते वा द्रष्टव्यम् । तत्रैव कामत: प्रवृतस्य रेत:सेकात् प्राङ्निवृत्तौ षड्वार्षिकम्, अकामतस्तु त्रैवार्षिकम्। जनन्यां तु कामत: प्रवृत्तस्य रेत:सेकात्प्राङ्निवृत्तौ द्वादशवार्षिकम्। अकामत: षड्वार्षिकमिति कल्पितम्

।

## बोधप्रश्नौ: -

१. गुरुलक्षणं किम् ?

उत्तरं..........................................................

२. गुरुतल्पग: वृषणौ उत्कृत्य गृहीत्वा कस्यां दिशि उत्सृजेत् ?

उत्तरं..........................................................

## ७.१२. गुरुतल्पप्रायश्चित्तान्तरम् -

यथोक्तं याज्ञवल्क्येन -

प्राजापत्यं चरेत्कृच्छ्रं समा वा गुरुतल्पग: ।

चान्द्रायणं वा त्रीन्मासानभ्यसेद्वेदसंहिताम् ।। ३.२८०.

प्राजापत्यकृच्छ्रं वक्षमाणलक्षणं समा: वर्षत्रयं चरेत् । एतच्च ब्राह्मणीपुत्रस्य शूद्रजातीयगुरुभार्यागमने मतिपूर्वे द्रष्टव्यम् । यदा तु गुरुपत्नीं सवर्णां व्यभिचारिणीमबुद्धिपूर्वं गच्छति तदा वेदजपसहितं चान्द्रायणत्रयं कुर्यात् । तत्रैव कामत: प्रवृत्तौ औसनस: - गुरुतल्पाभिगामी संवत्सरं ब्रह्महव्रतं षण्मासान्वा तत्पकृच्छ्रं चरेत्। तत्रैव कामतोऽभ्यासे मरणान्तिकं, 'मत्या गत्वा पुनर्भार्यां गुरो:क्षत्रसुतां द्विज: । अण्डाभ्यां रहितं लिङ्गमुत्कृत्य स मृत: शुचि । वैश्यायां गुरुभार्यायां गमने कामत: षड्वार्षिकम् । अत एव स्मृत्यन्तरम् ब्राह्मणीपुत्रस्य क्षत्रियायां कामतो गमने पादहान्या द्वादशवार्षिकम् । तस्यैव तथाभूतायां वैश्यायां षड्वार्षिकम्। शूद्रायां तु त्रैवार्षिकं प्रायश्चित्तमुक्तम् । एवं क्षत्रियापुत्रस्य वैश्यायां मातरि नववार्षिकं, शूद्रायां षड्वार्षिकम् । एवमेव वैश्यापुत्रस्यापीति, वैश्यायां तु कामत: अभ्यासे मरणान्तिकमेव, 'गुरोर्भार्यां तु यो वैश्यां मत्या गच्छेत् पुन: पुन: । लिङ्गाग्रं छेदयित्वा तु शुद्ध्येत्स किल्विषात्तत: ।। तथा च वृद्धमनु: - गमने गुरुभार्याया: पितृभार्यागमे तथा। अब्दत्रयमकामात्तु कृच्छ्रं नित्यं समाचरेत् । तत्रैव कामत: रेत:सकपूर्वकं द्रष्टव्यम् - 'चान्द्रायणं तप्तकृच्छ्रमतिकृच्छ्रं तथैव च । सकृद्गत्वा गुरो भार्यामज्ञानात्क्षत्रियां द्विज: ।। जनन्यां सकृद्गमने भगिन्यादिषु चासकृद्गमने अग्निप्रवेश इति द्रष्टव्यम् । महापातकस्य जननीगमनस्य तदतिदेशविषयभूतातिपातकस्य भगिन्यादिगमनस्य च तुल्यत्वायोगात् । यचाङ्गिरोवचनम् - 'पतितान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च । मासोपवासं कुर्वीत चान्द्रायणमथापि वा ।।

## बोधप्रश्ना: -

१. गुरुतल्पग: कीदृशं व्रतं चरेत् ?

उत्तरं.........................................................................

२. गुरुतल्पग: कतिवर्षाणि प्राजापत्यं कृच्छ्रं चरेत् ?

उत्तरं.........................................................................

३. पतितान्त्यस्त्रिय: गत्वा कति दिनान्युपवसेत् ?

उत्तरं.........................................................................

## ७.१३. संसर्गप्रायश्चितम् -

यथोक्तं याज्ञवल्क्येन -

एभि: संवसेद्यो वै वत्सरं सोऽपि तत्समः । एभिः पूर्वोक्तैः ब्रह्महादिभि एकं संवत्सरं योऽत्यन्तं संवसति सोऽपि तत्समः । यो येन सहाचरति सोऽपि तदीयमेव प्रायश्चित्तं कुर्यादिति तदीयप्रायश्चित्तातिदेशार्थं तत्समग्रहणम्, न पुनः पातकत्वातिदेशार्थम् । अत्र सत्यपि अतिदेशत्वे द्वादशवार्षिकं कार्यम्, साक्षात् महापातकित्वात्संसर्गिणः । अपि शब्दान्न केवलं महापातकिसंयोगी तत्समः किन्त्वतिपातकी पातक्युपपातकीनां मध्ये यो येन सह संसर्गं करोति, सोऽपि तत्सम इति तदीयमेव प्रायश्चित्तं कुर्यादिति दर्शयति । अत एव मनुना सकलं प्रायश्चित्तमभिधायान्तेऽभिहितम् - यो येन पतितेनैषां संसर्गं याति मानवः । स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये ।। एतच्च द्वादशवार्षिकादिपतितप्रायश्चित्तं बुद्धिपूर्वसंसर्गविषयम्, 'पतितेन सहोषित्वा जानन्संवत्सरं नरः । मिश्रितस्तेन सोऽब्दान्ते स्वयं च पतितो भवेत् ।। तथा 'ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः। एते महापातकिनो यश्च तैः सह संवसेत् ।। अतोऽत्र ब्रह्महादिसंसर्गिसंसर्गिणोऽपि महापातकिसंसर्गे विद्यत इति तस्यापि महापातकित्वं स्यान्न च प्रतिषेधः । अतः संसर्गिसंसर्गिणां द्विजातिकर्मभ्यो हानिः न भवति, प्रायश्चित्तं तु भवत्येव । अत्र ब्रह्महादिषु यद्यपि कामतो मरणान्तिकं उपदिष्टं तथापि संसर्गिणः तन्नातिदिश्यते । 'स तस्यैव व्रतं कुर्यात्' इति व्रतस्यैवातिदेशात् । मरणस्य च व्रतशब्दवाच्यत्वाभावात् । यथाह वृद्धबृहस्पतिः - एकशय्यासनं पङ्क्ति भाण्डंपङ्क्त्यन्नमिश्रणम् । याजनाध्यापने योनिस्तथा च सहभोजनम् ।। नबधा संस्कारः प्रोक्तः न कर्तव्योऽधमैः सह । देबलोऽपि - संलापस्पर्शनिःश्वाससहयानासनाशनम् । याजनाध्यापनाद्यौनात्पापं संक्रमते नृणाम् ।। अतः संलापादिरहिते सहयानादिचतुष्टये कृते पञ्चमभागोनं द्वादशवार्षिकं प्रायश्चित्तं कुर्यात् । अत एव मनुना - संवत्सरेण पतति पतितेन सहाचरन् । याजनाध्यापनाद्यौनान्न तु यानासनाशनम्।। इति यानादिचतुष्टयस्यैव संवत्सरेण पातित्यहेतुत्वमुक्तम् । अतः यानादिचतुष्टयेन सद्यः पतन्ति यानादिचतुष्टयेन तु संवत्सरं निरन्तराभ्यासनेति युक्तम् । सुमन्तुः - 'पञ्चाहे तु चरेत्कृच्छ्रं दशाहे तप्तकृच्छ्रकम्। पराकृस्त्वर्धमासे

स्यान्मासे चान्द्रायणं चरेत् ।। मासत्रये प्रकुर्वीत कृच्छ्रं चान्द्रायणोत्तरम्। षण्मासिके तु संसर्गे कृच्छ्रं त्वब्दार्धमाचरेत्।। संसर्गे त्वाब्दिकं कुर्यादब्दं चान्द्रायणं नरः । यथाह शौनकः - 'पुरुषस्य यानि पतननिमित्तानि स्त्रीणामपि तान्येव ।

एषां पतितानां कन्यां पतितावस्थायामुत्पन्नां सोपवासां कृततत्संसर्गकालोचित्तप्रायश्चित्ताम् अकिंचनाम् अगृहीतवस्त्रालंकारादिपितृधनामुद्वहेत् । एवं च सति पतितयौनसंसर्गप्रतिषेधो विरोधोऽपि परिहृतो भवति । अयं चार्थः बृहद्धारीतेन स्पष्टीकृतः । पतितस्य तु कुमारीं विवस्त्रामहोरात्रमुषितां प्रातः शुक्लेनाहतेन वाससाच्छादितां नाहमेतेषां न ममैते इति त्रिरुच्चैरभिदधानां तीर्थे स्वगृहे वोद्वहेत् । तथा 'एषां कन्यां समुद्वहेदिति' वचनात् स्त्रीव्यतिरिक्ततदीयापत्यस्य संसर्गानर्हा दर्शयति । यथोक्तं याज्ञवल्क्येन-

कन्यां समुद्वहेदेषां सोपवासामकिंचनाम् ।। ३.२६१

## बोधप्रश्नाः -

१. केषां सोपवासामकिचनां कन्यां समुद्वहेत् ?

उत्तरं.............................................................

२. संसर्गी कदा कृच्छ्रं चरेत् ?

उत्तरं.............................................................

३. कैः सह नवधा संस्कारप्राप्तः न कर्तव्यः ?

उत्तरं.............................................................

## ७.१३.१. निवद्धसंसर्गोत्पन्नप्रतिलोमवधे प्रायश्चित्तम् -

अवकृष्टाः सूतमागधादयः प्रतिलोमोत्पन्नास्तेषां प्रत्येकं हनने चान्द्रायणम् । तथा च शङ्खः - सर्वेषामवकृष्टानां वधे प्रत्येकं चान्द्रायणम्' इति । यद्वाङ्गिरसोक्तम् - 'सर्वान्त्यजानां गमने भोजने संप्रमाणे, पराकेण विशुद्धिः स्यादित्यङ्गिरसभाषितम् ।। तत्र कामतः सूतादिवधे चान्द्रायणम्, अकामतस्तु सूतवधे परकाः, वैदेहकवधे पादोनम्, चण्डालवधे द्विपादः, मागधवधे पादोनः पराकः, क्षतरि द्विपादः, आयोगवे च पादद्वयम्। अनेनैव दिशा चान्द्रायणस्यापि तारतम्यं कल्पनीयम् । प्रतिलोमप्रसूनानां स्त्रीणां मासावधिः स्मृतः । यद्यपि शूद्रो आपद्यधिकारिहीनस्तथाप्यनेन द्वादशवार्षिकादिकालसंपाद्येन शुद्ध्यति । शूद्रगहणं स्त्रीणां प्रतिलोमजानां चोपलक्षणम् । यद्यपि तस्य गायत्र्यादिजपासंभवस्तथापि नमस्कारमन्त्रजपो भवति । तथा - शूद्रः कालेन शुद्ध्येत गोब्राह्मणहिते रतः । दानैर्वाप्युपवासैर्वा द्विजशुश्रूषया तथा । अतः स्त्रीशूद्रयोः प्रतिलोमजानां च त्रैवर्णिकवद् व्रताधिकार इति सिद्धम् । यथा याज्ञवल्क्येन -

चान्द्रायणं चरेत्सर्वानवकृष्टान्निहत्य तु ।
शूद्रोऽधिकारहीनोऽपि कालेनानेन शुद्ध्यति ।। ३.२६२

## बोधप्रश्ना: -

१. अवकृष्टान्निहत्य कीदृशं व्रतं चरेत् ?

उत्तरं.................................................................

२. अन्त्यजानां गमने भोजने संप्रमापणे केन विशुद्धिः ?

उत्तरं.................................................................

३. अधिकारहीनोऽपि शूद्रः केन शुद्ध्यति ?

उत्तरं.................................................................

४. स्त्रीशूद्रयोः कस्माद् व्रताधिकारः सिद्धः ?

उत्तरं.................................................................

## ७.१४. सारंश: -

प्रियपाठकाः ! अस्मिन् खण्डे सप्तमभागे ब्रह्महत्याप्रायश्चित्तं निरूपितम् । ब्रह्महत्याप्रायश्चित्तस्य नैमित्तिकसमाप्त्यवधिरालोचिता । ब्रह्महत्यायाः प्रायश्चित्तान्तरमालोचितम् । ब्रह्महत्याप्रायश्चित्तस्यातिदेशः विवेचितः । सुरापानप्रायश्चित्तं निरूपितम् । सुरापानप्रायश्चित्तान्तरं विशदीकृतम् । मद्यमाने प्रायश्चित्तं विचारितम्। द्विजातिभार्याणां सुरापाननिषिद्धचर्चा विहिता । सुवर्णस्तेयप्रायश्चित्तं विचारितम् । सुवर्णस्तेयप्रायश्चित्तान्तरं विवेचितम्। गुरुतल्पप्रायश्चित्तं निरूपितम् । गुरुतल्पप्रायश्चित्तान्तरं विचारितम्। संसर्गप्रायश्चित्तं निरूपितम् । प्रतिलोमवधे प्रायश्चित्तमपि आलोचितम् ।

## ७.१५. पारिभाषिकशब्दा: -

| | | |
|---|---|---|
| पतनम् | - | द्विजातिकर्मभ्यो हानिः |
| निषूदकः | - | व्यापादकः |
| बालवासाः | - | गोच्छागादिलोभनिर्मितवस्त्रावृतः |
| कणाः | - | तण्डुललवाः |
| सुरा | - | मद्यम् |
| पुनःसंस्कारः | - | पुनरुपनयनम् |
| सुवर्णः | - | परिमाणविशिष्टहेमद्रव्यवचनः न जातिमात्रवचनः |
| वृषली | - | चण्डाली |

बन्धकी - स्वैरिणी

स्पर्श: - गात्रसंमर्द:

## ७.१५. आदर्शप्रश्ना: -

### निबन्धात्मकप्रश्ना: (प्रत्येकं २०/१५ अङ्का:)

१. ब्रह्महत्याप्रायश्चित्तं विज्ञानेश्वरदिशा वर्णयत ।

२. सुरापानप्रायश्चित्तं ग्रन्थोक्तदिशा आलोचयत ।

३. सुवणस्तेयप्रायश्चित्तं मिताक्षरानुसारं विशदयत ।

४. गुरुतल्पप्रायश्चितं विज्ञानेश्वरमतानुसारं विवेचयत ।

५. संसर्गप्रायश्चित्तं विज्ञानेश्वदिशा विशदयत ।

### विश्लेषणात्मकप्रश्ना: - (प्रत्येकं १२/१० अङ्का:)

१. ब्रह्महत्याया: प्रायश्चितान्तरं लिखत ।

२. सुरापानप्रायश्चित्तान्तरं विवेचयत ।

३. द्विजातिभार्याणां कृते सुरापानं विधेयं न वेत्यालोचयत ।

४. गुरुतल्पप्रायश्चित्तान्तरं निर्दिशत ।

### लघुप्रश्ना: - (प्रत्येकं ५ अङ्का:)

१. द्विजातय: वर्णा: किं पीत्वा पुन: संस्कारमर्हन्ति लिखत ।

२. शूद्रोऽधिकारहीनोऽपि केन शुद्ध्यति ?

३. कषां कन्याम् उद्वहेत् ?

४. महापातकिन: के ?

५. गुरुतल्पग: कीदृशं व्रतं कियत्कालं चरेत् ?

६. सुवर्णस्तेयी वृषणौ उत्कृत्य धृत्वा कस्यां दिशि उत्सृजेत् ?

७. सुवर्णशब्द: परिमाणवाचक उत जातिवाचक: ?

### एकाङ्कप्रश्ना: - (प्रत्येकं १ अङ्क:)

१. ब्रह्महा कति अब्दानि मित्‌भुक् शुद्धिमाप्नुयात् ?

२. ब्रह्महा कत्यागाराणि गत्वा इष्टमन्नं लभेत ?

३. ब्रह्महा पथि कीदृशं बाह्मणं गां वा दृष्ट्वानिरातङ्कं कृत्वा शुचि: भवेत् ?

४. क: संग्रामे निहत: शुद्धिमाप्नुयात् ?

५. महापातकिन: कति ?

६. यागस्थक्षत्रियविट्घाती कीदृशं व्रतं चरेत् ?

७. सुरापः कीदृशीं सुरां पिबेत् ?

८. सुरा कति विधा ?

९. पतितैः संयोगं गत्वा द्विजः कीदृशं व्रतं चरेत् ?

१०. किं पीत्वा द्विजाः पुनः संस्कारमर्हन्ति ?

११. सुरापिनी ब्राह्मणी कं लोकं न याति ?

१२. कः राज्ञे मुसलमर्पयेत् ?

१३. गुरुतल्पगः कीदृशं व्रतं चरेत् ?

## ७.१६. एकाङ्कप्रश्नानामुत्तराणि -

१. द्वादशाब्दानि, २. सप्त, ३. दीर्घतीव्रामयग्रस्थम्, ४. ब्रह्महत्याकारी, ५. पञ्च, ६. ब्रह्महत्याव्रतम्, ७. अग्निवर्णाम्, ८. त्रिविधा, ९. चान्द्रायणम्, १०. सुराम्, ११. पतिलोकम्, १२. ब्राह्मणस्वर्णहारी, १३. प्राजापत्यम् ।

# षष्ठपत्रम्

# द्वितीयखण्ड:, अष्टमभाग: ( Unit - VIII)

# (प्रायश्चित्तप्रकरणस्य गोवधप्रायश्चित्तादारभ्य सकलहिंसाप्रायश्चित्तापवादं यावत्)

## ८.१. प्रस्तावना -

अस्मिन् खण्डे अष्टमभागे गोवधप्रायश्चित्तम्, अन्येषामुपपातकानां प्रायश्चित्तम्, स्त्रीवधप्रायश्चित्तम्, ईषद्व्यभिचारितब्राह्मण्यादिवधे प्रायश्चित्तम्, अनुपातकप्राणिवधेप्रायश्चित्तम्, सामान्यं प्रायश्चित्तम्, वृक्षादिच्छेदने प्रायश्चित्तम्, पुंश्चलीवानरादीनां दंशनिमित्तं प्रायश्चित्तम्, शरीरचरमधातुविच्छेदकस्कन्दने प्रायश्चित्तम्, अवकीर्णस्य लक्षणकथनपूर्वकं प्रायश्चित्तम्, ब्रह्मचारिप्रायश्चित्तप्रसंगादन्यदप्यनुपातक- प्रायश्चित्तम्, ब्रह्मचारिप्रायश्चित्तप्रसंगे गुरोरपि प्रायश्चित्तम्, सकलहिंसाप्रायश्चित्तापवादश्चैते विषया आलोचिता:।

## ८.२. उदेश्यम् -

प्रियपाठका: ! अस्मिन् खण्डे अष्टमभागे भवन्त: अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- गोवधप्रायश्चित्तं निरूपयिष्यन्ति ।
- अन्येषामुपपातकानां प्रायश्चित्तं निर्णेतुं प्रभवन्ति ।
- स्त्रीवधप्रायश्चित्तं विवेचयिष्यन्ति ।
- अनुपातकप्राणिवधे प्रायश्चित्तमालोचयिष्यन्ति ।
- सामान्यं प्रायश्चित्तं प्रतिपादयिष्यन्ति ।
- वृक्षदिच्छेदने प्रायश्चित्तं प्रतिपादयितुं शक्नुवन्ति ।
- पुश्चलीवानरादीनां दंशनिमित्तं प्रायश्चित्तं निरूपयितुं शक्नुवन्ति ।
- शरीरचरमधातुविच्छेदस्कन्दने प्रायश्चित्तं निरूपयिष्यन्ति ।
- अवकीर्णस्य लक्षणकथनपूर्वकं प्रायश्चित्तं निर्णेतुं प्रभवन्ति ।
- ब्रह्मचारिप्रायश्चित्तप्रसंगादन्यदप्यनुपातकप्रायश्चित्तं निर्णेतुमर्हन्ति ।
- ब्रह्मचारिप्रायश्चित्तप्रसंगे गुरोरपि प्रायश्चित्तं निरूपयिष्यन्ति ।
- सकलहिंसाप्रायश्चितापवादं विवेचयिष्यन्ति ।

## ८.३. गोवधप्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

पञ्चगव्यं पिबेद्गोघ्नो मासमासीत संयतः ।
गोष्ठेशयो गोऽनुगामी गोप्रदानेन शुद्ध्यति ।। ३.२६३
कृच्छ्रं चैवातिकृच्छ्रं च चरेद्वापि समाहितः ।
दद्यात्त्रिरात्रं चोपोष्य वृषभैकादशास्तु गाः ।। ३.२६४

गां हन्तीति गोघ्नः, असौ मासं समाहित आसीत । पञ्चगव्यानि गोमूत्रगोमयक्षीरदधिघृतानि यथाविधि मिश्रितानि पिबन्, आहारान्तरपरित्यागेन भोजनकाले तस्य विधानात् । तथा गोष्ठेशयः । प्राप्तशयनानुवादेन गोष्ठविधानाद्दिवा च स्वापप्रतिषेधाद्रात्रौ गोशालायां शयानः । गा अनुगच्छत्ति तदस्य व्रतमिति गोऽनुगामी । अतश्च यासां गोष्ठे शेते सन्निधानात्ता एव गाः प्रातः वनं प्रतिगच्छन्तीरनुगच्छेत् । अनुगच्छेदिति वचनाद्यदा ता गच्छन्ति तदैव स्वयमनुगच्छेत् । यदा तु तिष्ठन्त्यासते वा तदा पश्चाद्गमनस्याशक्यकरणत्वात्स्वयमपि तिष्ठेदासीत वेति गम्यते । एवं कुर्वन् मासान्ते गोप्रदानेन एकां गां तत्त्वा तावता शास्त्रार्थस्य संपतेर्गोहत्यायाः शुद्ध्यतीति एकं व्रतम् । मासं गोष्टेशयः गोऽनुगामीति चानुवर्तते । पञ्चगव्याहारस्य तु निवृत्तिः कृच्छ्रविधानादेव । अतश्च मासं निरन्तरं कृच्छ्रं समाहितश्चरेदित्यपरम्। अत एव जावालेन मासं प्राजापत्यस्य पृथक्प्रायश्चित्तत्वमुक्तम्। पाजापत्यं चरेन्मासं गोहन्ता चेदकामतः । गोहितो गोऽनुगामी स्याद् गोप्रदानेन शुद्ध्यति ।। अतिकृच्छ्रं वा तथैव चरेदित्यन्यत् । अथवा त्रिरात्रमुपावासं कृत्वा वृषभ एकादशो यासां गवां ता दद्यादिति व्रतचतुष्टयम् । तत्राकामकृते जातिमात्रब्राह्मणस्वामिकगोमात्रवधे उपवासं कृत्वा वृषभैकादशगोदानसहितस्त्रिरात्रोपवासः द्रष्टव्यः। विशिष्टगुणवत्याः गोः वधे गुरुप्रायश्चित्तम् । क्षत्रियसंबन्धिन्याः तादृग्विधे व्यापादने मासं पञ्चगव्याशित्वं प्रथमं प्रायश्चित्तम् । वैश्यसंबन्धिन्यास्तु तादृग्विधे व्यापादने मासमतिकृच्छ्रं कुर्यात् । अतिकृच्छ्रे त्वाद्ये त्रिरात्रत्रये पाणिपूरान्नभोजनमुक्तम् । अन्त्ये त्रिरात्रेऽनशनम् । शूद्रस्वामिकगोहत्यायां मासं प्राजापत्यव्रतम् । यत्तु वैष्णवं व्रतत्रयम् - 'गोघ्नस्य पञ्चगव्येन मासमेकं पलत्रयम् । प्रत्यहं स्यात्पराको वा चान्द्रायणमथापि वा' ।। यत्तु सौमन्तम् - 'गोघ्नस्य गोप्रदानं गोष्ठे शयनं द्वादशरात्रं पञ्चगव्याशनं गवानुगमनं च' इति एतानि क्रमशः अश्नीयान्मासार्धं सुसमाहितः । ब्राह्मणान् भोजयित्वा आत्मशुद्धये गां दद्यात् । यदा कामतः गां प्रमापयति तदा मनुः -'उपपातकसंयुक्तो गोघ्नो मासं यवान्पिबेत् । कृतवापो वसेद्गोष्ठे चर्मणार्द्रेण संवृत्तः ।। चतुर्थकालमश्नीयादक्षारलवणं मितम् । गोमूत्रेण चरेत्स्नानं दौ मासौ नियतेन्द्रियः ।। दिवानुगच्छेत्ता गास्तु तिष्ठन्नूर्ध्वं रजः पिबेत् ।

शुश्रूषित्वा नमस्कृत्य रात्रौ वीरसनं वसेत् । तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वनुव्रजेत् । आसीनासु तथासीनो नियतो वितमत्सरः।। आतुरामभिसस्तां वा चौरव्याघ्रादिभिर्भयैः । पतितां पङ्कलग्नां वा सर्वोपयैर्विमोचयेत् ।। उष्णे वर्षति शीते वा मारुते वाति वा भृशम् । न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः ।।आत्मनो यदि वाऽन्येषां गृहे क्षेत्रेऽथवा खले । भक्षयन्तीं न कथयेत्पिबन्तं चैव वत्सकम् ।। अनेन विधिना यस्तु गोघ्नो गा अनुगच्छति । स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति ।। वृषभैकादशा गाश्च दद्यात्सुचरितव्रतः । अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत् । एतत्त्रितयं याज्ञवल्कीयमासप्राजापत्यमासपञ्चगाव्याशनवृषभैकादश-गोदानयुक्तत्रिरात्रोपवासरूपव्रतत्रितयविषयं यथा क्रमेण द्रष्टव्यम् ।

तत्रैव गर्भरहितायाः कामतो वधे कात्यायनीयमेव त्रैवार्षिकं कल्प्यम् । यमेनोक्तम् - 'काष्टलोष्टाश्मभिर्गावः शस्त्रैर्वा निहता यदि । प्रायश्चित्तं कथं तत्र शस्त्रेऽशस्त्रे विधीयते ।। काष्ठे सान्तापनं कुर्यात् प्राजापत्यं तुलोष्टके। तप्तकृच्छ्रंतु पाषाणे शस्त्रे चाप्यतिकृच्छ्रकम् ।। प्रायश्चित्ते ततोत्तीर्णे कुर्याद् ब्राह्मणभोजनम् । त्रिंशद्वा वृषभं चैकं दद्यात्तेभ्यश्च दक्षिणाम् ।।

वयोविशेषादपि प्रायश्चित्तविशेषः - 'अतिवृद्धामतिकृशामतिबालां च रोगिणीम् । हत्वा पूर्वविधानेन चरेदर्धव्रतं द्विजः ।। ब्राह्मणान्भोजयेच्छक्त्या दद्याद्धेमतिलांस्तथा ।। इति । नीरोगावधे यद्विहितं तस्यार्धम्। अत्र पुनः विशेषः - एकवर्षे हते वत्से कृच्छ्रपादो विधीयते । अबुद्धिपूर्वे पुंसः स्याद् द्विपादस्तु द्विहायने। त्रिहायने त्रिपादः स्यात्प्राजापत्यमतः परम् ।। गर्भिण्याः वधे यदा गार्भोऽपि निहतो भवति तदा प्रतिनिमित्तं नैमित्तिकमावर्तते । किञ्च, व्यापन्नानां बहूनां तु रोधने बन्धनेऽपि वा । भिषङ्मिथ्योपचारे च द्विगुणं गोव्रतं चरेत् ।। पाषाणखण्डादिभिः येऽङ्गानि पातयन्ति ते साक्षाद्धन्तारस्तेष्वेव कृत्स्नं प्रायश्चित्तम् । प्रायश्चित्तानन्तरं ब्राह्मणभोजनपूर्वकं दक्षिणां दद्यात् । तथा च औषधं स्नेहमाहारं ददद्गोब्राह्मणे द्विजः । दीयमाने विपत्तिश्चेन्न स पापेन लिप्यते ।। प्रायश्चित्ताभावप्रसंगे उच्यते - ग्रामघाते शरौघेण वेश्मभङ्गान्निपातने। अतिवृष्टिहतानां च प्रायश्चित्तं न विद्यते ।। तथा कूपखाते च धर्मार्थे गृहदाहे च या मृता । ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते ।। पुनश्च - यो यस्य हिंसाद्द्रव्याणि ज्ञानतोऽज्ञानतोऽपि वा । स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्समम् ।। स्त्रीणां विषये पराशरेण विशेषेणोक्तम् - 'वपनं नैव नारीणां नानुव्रज्या जपादिकम् । न गोष्ठे शयनं तासां न वसीरन्गवाजिनम्, सर्वान्केशान्समुद्घृत्य छेदयेदङ्गुलद्वयम् ।। सर्वत्रैव हि नारीणां शिरसो मुण्डनं स्मृतम् ।। पुरुषेषु विशेषः संवर्तेन दर्शितः - 'पादेऽङ्गरोमवपनं द्विपादे श्मश्रुणोऽपि च । त्रिपादे तु शिखावर्णं सशिखं तु निपातने ।।

## बोधप्रश्नाः -

१. गोघ्न: किं पिबेत् ?

उत्तरं.........................................................................

२. गोघ्न: संयत: सन् कतिकालमासीत ?

उत्तरं.........................................................................

३. गोघ्न: केन शुद्ध्यति ?

उत्तरं.........................................................................

४. गोघ्न: शुद्ध्यर्थं कति गा: दद्यात् ?

उत्तरं.........................................................................

५. गोहन्ता प्राजापत्यं कतिकालं चरेत् ?

उत्तरं.........................................................................

६. गोघ्न: कान् भोजयत्वा गां दद्यात् ?

उत्तरं.........................................................................

## ३.४. अन्येषामुपपातकानां प्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

उपपातकशुद्धि: स्यादेवं चान्द्रायणेन वा ।
पयसा वापि मासेन पराकेणाथवा पुन: ।। ३.२६५

एवमुक्तेन गोवधव्रतेन मासं पञ्चगव्याशनादिना अन्येषां व्रात्यतादीनामुपपातकानां शुद्धिर्भवेत्। चान्द्रायणेन वा वक्ष्यमाणलक्षणेन मासं पयोव्रतेन वा पराकेण वा शुद्धिर्भवेत् । अत्र व्रतचतुष्टयमकामकारे शक्त्यपेक्षया द्रष्टव्यम् । कामकारे तु एतदेव व्रतं कुर्युरुपपातकिनो द्विजा: ।। 'अवकीर्णिवर्ज्यं शुद्ध्यर्थं चान्द्रायणमथापि वा' इति मनुस्मरणात् । उपपातकमध्ये सामान्यत: पठितस्य यथा अयाज्यानां च याजनं त्रीन्कृच्छ्रानाचरेद् व्रात्ययाजकोऽविचरन्नपि ।। व्रात्यता विषये मनु: - येषां द्विजानां सावित्री नानूच्यते यथाविधि । तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेत् ।। यमेनोक्तम् सावित्री पतिता यस्य दशवर्षाणि पञ्च च । सशिखं वपनं कृत्वा व्रतं कुर्यात्समाहित: ।। एकविंशतिरात्रं च पिबेत्प्रसृतियावकम्। हविषा भोजयेच्चैव ब्राह्मणान् सप्त पञ्च च।। ततो यावकशुद्धस्य तस्योपनयनं स्मृतम् । अनापद्यतिक्रमे तु मानवं त्रैमासिकम् । यस्य पितापितामहावनुपेतौ स्यातां तस्य संवत्सरं त्रैविद्यकं ब्रह्मचर्यम् । यस्य प्रपितामहादे: नानुस्मर्यत उपनयनं तस्य द्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्यम् । स्तेयेऽपि साधारणव्रतचतुष्टयापवादकं प्रायश्चित्तं मनुनोक्तम् । धान्यान्नधनचौर्याणि कृत्वा कामाद्विजोत्तम: । सजातीयगृहादेव कृच्छ्रार्धेन विशुद्ध्यति ।। क्षत्रियादे: अल्पं कल्प्यम् । अष्टापाद्यं स्तेयं किल्विषं शूद्रस्य द्विगुणोत्तराणीतरेषां प्रतिवर्णं विदुषोऽतिक्रमे दण्डभूयस्त्वम् । वैश्यपरिग्रहे त्रैमासिकं गोवधव्रतम्। शूद्रपरिग्रहे चान्द्रायणं कल्प्यम्

। तथा 'मनुष्याणां च हरणे स्त्रीणां क्षेत्रगृहस्य च । कूपवापीजलानां च शुद्धिश्चान्द्रायणेन तु ।। द्रव्यविशेषेणापि उपपातकप्रायश्चित्तम् । भक्ष्यभोज्यापहरणे यानशय्यासनस्य च । पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम् ।। सर्वत्रापि ह्रियमाणद्रव्यन्यूनाधिकभावेन प्रायश्चित्तस्यापि लघुगुरुभावः कल्पनीयः। यथा 'तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च । तैलचर्मामिषानाञ्च त्रिरात्रं स्यादभोजनम् ।।

ऋणस्यानपाकरणे उपपातकशुद्धिः स्यादेव । यथोक्तं मनुना - 'इष्टिं वैश्वानरीं चैव निर्वपेदब्दपर्यये। लुप्तानां पशुसोमानां निष्कृत्यर्थमसंभव इति ऋणानपाकरणम् ।

अनाहिताग्नेः कृते एतदेव व्रतचतुष्टयं वत्सरादूर्ध्वमापदि शक्त्यपेक्षया योज्यम् । अनापदि तु मानवं त्रैमासिकम्।

विक्रये यद्व्रतं प्रोक्तं हरणे द्विगुणं हि तत् । सुराविक्रये सोम्ये चतुष्टयं लाक्षालवणमांसमध्वाज्यति- लहोमानां चान्द्रायणत्रयं पयःपायसापूपदधीक्षुरसगुडखण्डादिस्नेहपक्वादिषु पराकः । सिद्धान्नविक्रये प्राजापत्यम् । पनसस्य त्रिदिनम् । कदलीनारिकेरजम्बीरबीजपूरकनारङ्गानां पादकृच्छ्रम् । खराश्वतरकरभाणां पराकः । अङ्गानां पराकः । स्मृतीनां कृच्छ्रम् । इतिहासपुराणानां सांतपनम् । रहस्यानां कृच्छ्रम् । आपदि याज्ञवल्कीयं व्रतचतुष्टयं शक्त्यपेक्षया योज्यम् इत्यपण्यविक्रयः ।

परिवेतरि वसिष्ठेन प्रायश्चित्तविशेष उक्तः - 'परिविविदानः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्त्वा पुनर्निविशेत तां चैवोपयच्छेत् इति । परिविविदानः परिवत्तोच्यते । यत्तु हारीतेनोक्तम् - ज्येष्ठेऽनिविष्टे कनीयान्निविशमानः परिवेत्ता भवति, परिवित्तिर्ज्येष्ठः, परिवेदनी कन्या, परिदायी दात्ता, परियष्टा याजकस्ते सर्वे पतिताः संवत्सरं प्राजापत्येन कृच्छ्रेण पावयेयुरिति । दिधिषूपतेः लक्षणं स्मृत्यन्तरे - ज्येष्ठायां यद्यनूदायां कन्यायामूह्यतेऽनुजा । या साऽग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूः स्मृता ।। तत्रागेदिधिषूपतिः प्राजापत्यं कृत्वा तामेव ज्येष्ठां पश्चादन्येनोढामुद्वहेत् । दिधिषूपतिरन्यामुद्वहेदिति परिवेदनम् ।

पारदार्येऽपि उपपातकसामान्यप्राप्तमानवत्रैमासिकस्य याज्ञवल्कीयव्रतचतुष्टयस्यापि गुरुदारादावपवाद उक्तः।

ऋतुकाले कामतः जातिमात्रब्राह्मणीगमने वार्षिकं प्राकृतं ब्रह्मचर्यम् । तादृश्या एव श्रोत्रियभार्यायाः गमने त्रीणि वर्षाणि प्रकृतं ब्रह्मचर्यम् । यद्वा श्रोत्रियपत्न्यां ब्राह्मण्यां त्रैवार्षिकम् । तादृग्विधायां क्षत्रियायां द्विवार्षिकम् । वैश्यायां वार्षिकमिति व्यवस्था । एतत्समानदृष्ट्या शूद्रायां षाण्मासिकं प्राकृतं ब्रह्मचर्यं कल्पनीयम्। कामतस्तु -राज्ञीं प्रव्रजितां धात्रीं साध्वीं वर्णोत्तमामपि

। कृच्छ्रद्वयं प्रकुर्वीत सगोत्रामभिगम्य च ।। अन्त्यजागमने प्रायश्चित्तम् - म्लेच्छी नटी चर्मकारी रजकी बुरुडी तथा । एतास्तु गमनं कृत्वा चरेच्चान्द्रायणद्वयम् ।। अन्त्यजाश्च - रजकश्चर्मकारश्च नटो बरूड एव च । कैवर्तमेदभिल्लाश्च सप्तैते अन्त्यजा: स्मृता: ।। एतासां अन्त्यजस्त्रीणां यदेकस्यां प्रायश्चित्तमभिहितं तत्सर्वासु भवति ।

ब्राह्मण्या: प्रातिलोम्येन द्विजातिव्यवाये प्रायश्चित्तान्तरं संवर्तेन - 'ब्राह्मण्यकामा गच्छेच्चेत्क्षत्रियं वैश्यमेव वा । गोमूत्रयावकैर्मासात्तदर्धाच्च विशुद्ध्यति ।। कामतस्तु द्विगुणं कर्तव्यम् । अन्त्यजादिगमनेऽपि स्त्रीणां स्मृत्यन्तरे प्रायश्चित्तम् - 'रजकव्याधशैलूषवेणुचर्मोपजीविन: । ब्राह्मण्येतान्यदा गच्छेदकामादन्दैवत्रयम् ।। चाण्डालाद्यन्त्यावसायिगमनेऽपि - चाण्डालं पुल्कसं म्लेच्छं श्वपाकं पतितं तथा । ब्राह्मण्यकामतो गत्वा चान्द्रायणचतुष्टयम् ।।

वार्धुष्यलवणक्रययोस्तु मनुयोगीश्वरोक्तसामान्योपपातकप्रायश्चित्तानि जातिशक्तिगुणाद्यपेक्षया योज्यानि।

## बोधप्रश्ना: -

१. साधारणतया उपपातकशुद्धि: केन स्यात् ?

उत्तरं.............................................................

२. अयाज्ययाजी कतिकृच्छ्रान् चरेत् ?

उत्तरं.............................................................

३. व्रात्य: कतिकृच्छ्रान् चरित्वा पुनरुपनाययेत् ?

उत्तरं.............................................................

४. व्रात्य: कतिरात्रं प्रसृतियावकं पिबेत् ?

उत्तरं.............................................................

५. स्त्रीणां हरणे केन शुद्धि: स्यात् ?

उत्तरं.............................................................

## ८.४.१. शूद्रविट्क्षत्रवधे प्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

ऋषभैकसहस्रा गा दद्यात्क्षत्रवधे पुमान् ।
ब्रह्महत्याव्रतं वापि वत्सरत्रित्रयं चरेत् ।। ३.२६६
वैश्यहाब्दं चरेदेतद्दद्याद्वैकशतं गवाम् ।
षण्मासाच्छूद्रहाप्येतद्धेनूर्दद्याद् दशाथवा ।। ३.२६७

एकमधिकं यस्मिन् सहस्रे तदेकसहस्रम्, तस्य पूरण एकसहस्रः, ऋषभ एकसहस्रो यासां गवां ताः ऋषभैकसहस्रास्ताः क्षत्रवधे दद्यात् । अथवा बृहत्प्रायश्चित्तं ब्रह्महत्याव्रतं वर्षत्रयं कुर्यात् । वैश्यघाती पुनरेतत् ब्रह्महत्याव्रतमेकवर्षं चरेत् । गवामृषभैकशतं वा दद्यात् । शूद्रघाती तु ब्रह्महत्याव्रतं षण्मासं चरेत् । यद्वा दशधेनूरचिरप्रसृताः सवत्सा दद्यात् । इदमकामतः द्विजमात्रक्षत्रियादिवधविषयम् । कामतस्तु मनुनोक्तम् - तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः । वैश्येऽष्टमांशो वृतःस्थे शूद्रे ज्ञेयस्तु षोडश ।। वृत्तस्थे क्षत्रिये तु सार्धचतुर्वार्षिकं कल्प्यम् । वृत्तशब्देन गुणादिकमुच्यते । 'गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रहः । प्रवर्तनं हितानां च तत्सर्वं वृत्तमुच्यते ।।

## बोधप्रश्नाः -

१. क्षत्रियवधे कतिसंख्यकाः गाः दद्यात् ?

उत्तरं.............................................................

२. वैश्यघाती कतिकालं यावद् ब्रह्महत्याव्रतं चरेत् ?

उत्तरं.............................................................

३. शूद्रघाती कतिमासान् ब्रह्महत्याव्रतं चरेत् ?

उत्तरं.............................................................

# ८.५. स्त्रीवधे प्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

दुर्वृत्तब्रह्मविट्क्षत्रशूद्रयोषाः प्रमाप्य तु ।
दृतिं धनुर्बस्तमविं क्रमाद्दद्याद्विशुद्धये ।। ३.२६८

ब्राह्मणादिभार्या दुर्वृत्ताः स्वरिणीः प्रमाप्य क्रमेण दृतिं जलाधारचर्मकेशं, धनुः कार्मुकं, बस्तं छागं, अविं मेषं च विशुद्धये दद्यात् । इदं च प्रातिलोम्येन अन्त्यजातिप्रसूतानां ब्राह्मण्यादीनाम् अकामतो वधविषयम्। कामतस्तु ब्रह्मगर्भ आह - 'प्रतिलोमप्रसूतानां स्त्रीणां मासावधिः स्मृतः । अन्तरप्रभवानां च सूतादीनां चतुर्द्विषट् ।। ब्रह्महत्यादिवधे षण्मासाः क्षत्रियायाश्चत्वारो वैश्याया द्वावित्येवं यथार्हतयान्वयः। यदा वैश्यकर्मणा जीवन्तीं व्यापादयति तदा किञ्चिद्देयम् । 'वैशिकेन किञ्चिदि'ति गौतमस्मरणात् । वैशिकेन वैश्यकर्मणा जीवन्त्यां व्यापादितायां किञ्चिदेव देयं तच्च जलम् । 'कोशं कूपेऽथ विप्रे वा ब्राह्मण्याः प्रतिपादयेत् । वधे धेनुः क्षत्रियायाः बस्तो वैश्यावधे स्मृतः ।। शूद्रायामाविकं वैश्यां हत्वा दद्याज्जलं नरः इत्यापस्तम्बस्मरणात् । यदा

पुनः क्षत्रियादिभिः प्रातिलोम्येन व्यभिचरिता ब्राह्मणाद्या व्यापाद्यन्ते तदा गोवधप्रायश्चित्तानि यथार्हं योज्यानि।

## बोधप्रश्नाः -

१. व्यभिचारिण्या ब्राह्मण्याः वधे किं दद्यात् ?

उत्तरं...........................................................

२. क्षत्रियायाः वधे विशुद्धये किं दद्यात् ?

उत्तरं...........................................................

३. वैश्यायाः वधे किं दद्यात् ?

उत्तरं...........................................................

४. शूद्रायाः वधे किं दद्यात् ?

उत्तरं...........................................................

## ८.५.१. ईषद्व्यभिचारितब्राह्मण्यादिवधे विशेषप्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन - अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेत् ।

यदा त्वपकर्षेण दुष्टामीषद्व्यभिचारिणीं ब्राह्मण्यादिकां व्यापादयति तदा शूद्रहत्याव्रतं षाण्मासिकं कुर्यात् । यद्वा, दशधेनूर्दद्यात् । इदं च षाण्मासिकमकामतो ब्राह्मण्या व्यापदने, क्षत्रियावधे च कामकृते द्रष्टव्यम् । कामतो वैश्यावधे दशधेनूः दद्यात् । कामतः शूद्रावधे तु उपपातकसाधारणप्राप्तं मासं पञ्चगव्याशनम्। यदा कामतो ब्राह्मणीं व्यापादयति तदा द्वादशमासिकम् । क्षत्रियादीनां त्वकामतो व्यापदने त्रैमासिकं सार्धमासं सार्धद्विविंशत्यहानि । यत्तु हारीतेन - 'षड्वर्षाणि राजन्ये प्राकृतं ब्रह्मचर्यं त्रीणि वैश्ये, सार्धं शूद्रे' इति प्रतिपाद्योक्तं क्षत्रियवद् ब्राह्मणीषु वैश्यवद्क्षत्रियायां शूद्रवद्वैश्यायां शूद्रां हत्वा नव मासान्' इत्युक्तम् ।

## बोधप्रश्नाः -

१. अकामतः ब्राह्मण्याः वधे कतिमासिकं व्रतं चरेत् ?

उत्तरं...........................................................

२. कामतः वैश्यावधे कतिधेनूः दद्यात् ?

उत्तरं...........................................................

३. कामतः शूद्रावधे कतिदिनानि पञ्चगव्याशनं स्यात् ?

उत्तरं...........................................................

४. कामतः ब्राह्मणीवधे कतिमासात्मकं व्रतं चरेत् ?

उत्तरं..............................................................

## ८.६. अनुपातकप्राणिवधे प्रायश्चित्तम् -

अस्थिमतां प्राणिनां कृकलासप्रभृतीनामनुक्तनिष्कृतीनां सहस्रं हत्वा अनस्थिमतां च युकामत्कुणदंशमशकप्रभृतीनां अन: शकटं तत्परिपूर्णमात्रं हत्वा शूद्रहत्यावृतं षाण्मासिकं ब्रह्मचर्यं चरेत् दशधनू: वा दद्यात् । यथोक्तं याज्ञवल्क्येन - 'अस्थिमतां सहस्रं तु तथाऽनस्थिमतामन:' ।। ३.२६९

किञ्च, मार्जारादय: प्रसिद्धा:, पतत्रिणश्चाषकाकोलूका:,तान् हत्वा त्रिरात्रं पय: विबेत् पादकृच्छ्रं वा चरेत् । यथोक्तं मनुना - मार्जरनकुलौ हत्वा चाषं मण्डूकमेव च । श्वगोधोलूककाकांश्च शूद्रहत्यावृतं चरेत्। ११.१३१

किञ्च, दन्तिनि व्यापादने पञ्च नीलवृषा: देया: । शुके पक्षिणि द्विवर्षो वत्स: । रासभच्छागैडकेषु व्यापादितेषु प्रत्येकमेको वृषभ: । क्रौञ्चे पक्षिणि त्रिहायन: वत्स: देय: ।

किञ्च, क्रव्यमपक्वं मांसमश्नातीति क्रव्याद् व्याघ्रसृगालादिमृगविशेष: वानरसाहचर्यात्, तथा हंसश्येनसमभिव्याहरात् कङ्कगृध्रादि: पक्षिविशेषश्च गृह्यते, 'जल' शब्देन जलचरा बकादयो गृह्यन्ते । शिखण्डी मयूर:, भास: पक्षिविशेष:, शेषा: प्रसिद्धा:, एषां प्रत्येकं वधे गामेकां दद्यात् ।

किञ्च, सरीसृपेषु व्यापादितेषु अयोमय: दण्ड: देय: । पण्डके व्यापादिते सीसकं माषपरिमितं दद्यात्, पलालभारो वा । पक्षिसमभिव्याहाराच्च कोले सूकरे व्यापादिते घृतकुम्भो देय: । उष्ट्रे गुञ्जा देया। वाजिनि विनिपातिते वस्त्रं देयम् ।

किञ्च, तितिरौ पतन्त्रिणि व्यापादिते तिलद्रोणं दद्यात् । 'द्रोण' शब्द: परिमाणवेशेषवचन: । गजादीनां व्यापादने निर्धनत्वेन नीलवृषपञ्चकादिदानं कर्त्तुमशक्नुवन् प्रत्येकं कृच्छ्रं चरेद्विशुद्ध्यर्थम् । एवमन्यत्रापि दानानुसारं द्रष्टव्यम् । उदुम्बरादौ फले मधूकादौ च कुसुमे चिरस्थितभक्तासक्त्वाद्यन्ने च रसे शुडादौ च यानि सत्त्वानि जायन्ते तेषां घाते घृतप्राशनं शुद्धिसाधनम् ।

### बोधप्रश्ना: -

१. अस्थिमतां अनस्थिमतां च हत्यां कृत्वा कीदृशं वृतं चरेत् ?

उत्तरं..............................................................

२. मार्जारादीन् हत्वा कतिरात्रं पय: पिबेत् ?

उत्तरं..............................................................

३. दन्तिनि व्यापादने कतिनीलवृषा: देया: ?

उत्तरं..............................................................

४. केषां वधे गामेकां दद्यात् ?

उत्तरं..........................................................

५. सरीसृपेषु व्यापादितेषु किं दद्यात् ?

उत्तरं..........................................................

६. कस्मिन् व्यापादिते तिलद्रोणं दद्यात् ?

उत्तरं..........................................................

७. केषां घाते घृतप्राशनं शुद्धिसाधनम् ?

उत्तरं..........................................................

## ८.७. सामान्येन प्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन – किंचित्सास्थिवधे देयं प्राणायामस्त्वनस्थिके ।

अनस्थिमतां कृकलसादिप्राणिनां न्यूनसहस्रसंख्यानां प्रत्येकं वधे किञ्चित्स्वल्पं धान्यहिरण्यादि देयम्। अनस्थिके त्वेक: प्राणायाम: । तत्र किञ्चिदिति यदा हिरण्यं दीयते तदा पणमात्रम् । 'अस्थिमतां वधे पणो देय:' इति सुमन्तुस्मरणात् । एतच्चानुक्तनिष्कृतिप्राणिवधविषयम् । तत्र च प्रायश्चित्तविशेष: श्रूयते हंससारसचक्राह्वक्रौञ्चकुक्कुटघातक: । मयूरमेषौ हत्वा च एकभक्तेन शुद्ध्यति ।। मद्गुं च टिट्टिभं चैव शुकं पारावतं तथा । आडिकां च बकं हत्वा शुद्ध्येद्वै नक्तभोजनात् ।। चाषकाककपोतानां सारीतितिरघातक: । अन्तर्जले उभे सन्ध्ये प्राणायामेन शुद्ध्यति ।। गृध्रश्येनविहङ्गानामुलूकस्य च घातक: । अपक्वाशी दिनं तिष्ठेद् द्वौ कालौ मारुताशन: ।। हत्वा मूषिकमार्जारसर्पाजगरडुण्डुभान् । प्रत्येकं भोजयेद्विप्रांल्लोहढण्डश्च दक्षिणा ।। सेधाकच्छपगोधानां शशशल्यकघातक: । वृन्ताकफलगुञ्जाशी अहोरात्रेण शुद्ध्यति ।। मृगरोहिवराहाणामविकाबस्तघातने । वृकजम्बूकऋक्षाणां तरक्षूणां च घातक: ।। तिलप्रस्थं त्वसौ दद्यात् वायुभक्ष: दिनत्रयम् । खरवानरसिंहानां चित्रकव्याघ्रघातक: । शुद्धिमेति त्रिरात्रेण ब्राह्मणानां च भोजनै: ।।

## बोधप्रश्ना: -

१. केषां वधे किञ्चित्स्वल्पं धान्यहिरण्यादि देयम् ?

उत्तरं..........................................................

२. केषां घातक: एकभक्तेन शुद्ध्यति ?

उत्तरं..........................................................

३. चषकानां वधे केन शुद्ध्यति ?

उत्तरं..........................................................

४. क: त्रिरात्रेण ब्राह्मणानां च भोजनै: शुद्ध्यति ?

उत्तरं.........................................................

## ८.८. बृक्षगुल्मादीनां छेदने प्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

वृक्षगुल्मलतावीरुच्छेदने जप्यमृक्शतम् ।
स्यादोषधिवृथाच्छेदे क्षीराशी गोऽनुगो दिनम् ।। ३.२७६

फलादीनां आम्रपनसादीनां च वृक्षाणां गुल्पादीनां च यज्ञाद्यदृष्टार्थं विना छेदने ऋचां गायत्र्यादीनां शतं जप्यम् । ओषधीनां तु ग्राम्यारण्यानां वृथैव छेदने दिनं कृत्स्नमहर्गवां परिचर्यानुगम्यान्ते क्षीरं पिबेदाहारान्तरपरित्यागेन । यथोक्तं मनुना - 'फलदानां तु वृक्षाणां छेदने जप्यमृक्शतम् । गुल्मवल्लीलतानां च पुष्पितानां च विरुधाम् ।। 'फलपुष्पोपगान्पादपान् न हिंस्यात्कर्षणाद्यर्थं चोपहन्यात्' इति वसिष्ठस्मरणात्। यत्र तु स्थानविशेषाद्दण्डाधिक्यं तत्र प्रायश्चित्ताधिक्यमपि कल्पनीयम् । तदुक्तम् - 'चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये' जातद्रुमाणां द्विगुणो दमो वृक्षेऽथ विश्रुते ।। अयं ऋक्शतजपो द्विजातिविषयः, न तु पुनः शूद्रादिविषयः, तेषां जपेऽनधिकारात् । यतः तेषां दण्डानुसारेण द्विरात्रिकं कल्पनीयम् ।

### बोधप्रश्नौ : -

१. वृक्षगुल्मलतादीनां छेदने ऋग्वेदं कतिवारान् जपेत् ?

उत्तरं.........................................................

२. ओषधीनां वृथाच्छेदने किं पिबेत् ?

उत्तरं.........................................................

## ८.९. पुंश्चलीवानरादिवधप्रायश्चित्तप्रसङ्गात्तद्दंशनिमित्तं प्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

पुंश्चलीवानरखरैर्दष्टश्वोष्ट्रादिवायसैः ।
प्राणायमं जले कृत्वा घृतं प्राश्यं विशुध्यति ।। ३.२७७

पुंश्चल्यादयः प्रसिद्धाः, एतैर्दष्टः पुमानन्तर्जले प्राणायामं कृत्वा घृतं प्राश्य विशुध्यति । यथाह मनुः - 'श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च । नराश्वोष्ट्रवराहैश्च प्राणायामेन शुध्यति । 'श्वसृगालमृगमहिषाजाविकखरकरभनकुलमार्जरमूषकप्लवबककाकपुरुषदष्टानामापोहिष्टेत्यादिभिः स्नानं प्राणायमत्रयं च ' । यत्त्वाङ्गिरसवचनम् - ब्रह्मचारी शुना दष्टो नदीं गत्वा समुद्रयाम् । प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति । स्त्रीणां तु शुना दष्टा जम्बुकेन वृकेण वा । उदित्तं

ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत् । रजस्वलायामपि विशेषः पुलस्त्येन दर्शितः - 'रजस्वला यदा दष्टा शुना जम्बुकरासभैः । पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति ।। अरजस्वलायाः कृते शाततपेन विशेष उक्तः - 'शुना घ्रातावलीढस्य नखैर्विलिखितस्य च । अद्भिः प्रक्षालनं शौचमग्निना चोपकूलनम् ।। यदा दंशनद्वारा कृमय उत्पद्यन्ते तदा मनुना विशेष उक्तः - ब्राह्मणस्य व्रणद्वारे पयशोणितसंभवे । कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत् ।। गवां मूत्रपुरीषेण त्रिसंध्यं स्नानमाचरेत् । त्रिरात्रं पञ्चगव्याशी त्वधोनाभ्या विशुध्यति ।। निभिकण्टान्तरोद्भूते व्रणे चोत्पद्यते कृमिः । षड्रात्रं तु त्र्यहं पञ्चगव्याशनमिति स्मृतम् । क्षत्रियादिषु तु प्रतिवर्णं पादपादह्रासः कल्पनीयः ।

## बोधप्रश्नाः -

१. पुंश्चलीवानरखरैः दष्टः केन विशुध्यति ?

उत्तरं.............................................................

२. ब्रह्मचारी शुना दष्टः कतिदिनानि पयः पिबेत् ?

उत्तरं.............................................................

३. ब्राह्मणः शुना दष्टः किं कृत्वा विशुध्यति ?

उत्तरं.............................................................

## ८.१०. शरीरचरमधातुविच्छेदकस्कन्दने प्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

यन्मेऽद्य रेत इत्याभ्यां स्कन्नं रेतोऽभिमन्त्रयेत् ।
स्नानान्तरं भ्रुवोर्मध्यं तेनाऽनामिकया स्पृशेत् ।। ३.२७८

यदि कथंचित्स्त्रीसंभोगमन्तरेणापि हठाच्चरमधातुविसृष्टस्तदा तत्स्कन्नं रेतो 'यन्मेऽद्य रेतः पृथिवीं,' 'पुनर्मामैत्विन्द्रियम्' इत्याभ्यां मन्त्राभ्याम् अभिमन्त्रयेत् । तेन चाभिमन्त्रितेन रेतसा स्तनयोर्भ्रुवयोश्च मध्यमुपकनिष्ठिकया स्पृशेत् । अन्ते तु स्कन्नस्य रेतसोऽशुचित्वेन स्पर्शकर्मण्ययोग्यत्वात्तेन इत्यनामिकासाहचर्यात्स्वबुद्धिस्थाङ्गुष्ठपरत्वेन व्याचक्षते । न च रेतस अशुचित्वेन स्पर्शायोग्यत्वम् । विधानादेव प्रायश्चित्तार्थरूपस्पर्शे योग्यत्वमवगम्यते प्रायश्चित्तरूपपान इव सुरायाः इदं प्रायश्चित्तं गृहस्थस्यैवाकामतः स्कन्नविषयम् । ब्रह्मचारिणः स्पप्ने जागरणावस्थायां च गुरुप्रायश्चित्तस्य दर्शनात् ।

किञ्च, स्वियं प्रतिबिम्बमम्बुगतं दृष्टं चेत् तदा 'मयि तेज इन्द्रियम्' इतीमं मन्त्रं जपेत् । अशुचिद्रव्यदर्शने पुनः सावित्रीं जपेत् । तथा वाक्पाणिपादादिचापल्यकरणे तामेव जपेत् अनृतवचने

च। यथोक्तं याज्ञवल्क्येन-

मयि तेज इति च्छायां स्वां दृष्ट्वाऽम्बुगतां जपेत् ।
सावित्रमशुचौ दृष्टे चापल्ये चानृतेऽपि च ।। ३.२७९

**बोधप्रश्ना: -**

१. संभोगं विना रेतस्कन्दने काभ्यामभिमन्त्रयेत् ?

उत्तरं.........................................................

२. अशुचिद्रव्यदर्शने कं जपेत् ?

उत्तरं.........................................................

३. अनृते कां जपेत् ?

उत्तरं.........................................................

## ८.११. अवकीर्णस्य अप्रसिद्धत्वात्तलक्षणकथनपूर्वकं प्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

अवकीर्णी भवेद् गत्वा ब्रह्मचारी तु योषितम् ।
गर्दभं पशुमालभ्य नैर्ऋतं स विशुध्यति ।। ३.२८०

ब्रह्मचारी उपकुर्वाणक: नैष्ठिकश्चासौ योषितं गत्वाऽवकीर्णी भवति । चरमधातोर्विसर्गोऽवकीर्णं तद्यस्यास्ति सोऽवकीर्णी, स नैर्ऋतिदैवत्येन गर्दभपशुना यागं कृत्वा विशुध्याति । एतच्चारण्ये चतुष्पथे लौकिकेऽग्नौ कार्यम् । 'ब्रह्मचारी चेत्स्त्रियमुपेयात् अरण्ये चतुष्पथे लौकिकेऽनौ रक्षोदैवतं गर्दभं पशुमालभेत इति वसिष्ठस्मरणात् । तथा रात्रौ एकाक्षिविकलेन यष्टव्यम् । तथा च मनु: - अवकीर्णी तु काणेन रासभेन चतुष्पथे । पाकयज्ञविधानेन यजेत निर्ऋतिं निशि ।। इति । पशोरभावे चरुणा यष्टव्यम् । निरुतिं वा चरुं निर्वपेत् तस्य जुहुयात् - कामाय स्वाहा, कामकामाय स्वाहा, निर्ऋत्यै स्वाहा, रक्षोदेवताभ्य: स्वाहा' इति वसिष्ठस्मरणात् । तस्य अजिनमूर्ध्वबालं परिधाय लोहितपात्र: सप्तगृहान् भैक्षं चरेत्कर्माचक्षण: संवत्सरेण शुध्यति इति गौतमोक्तवार्षिकतप: समुचित: पशुयागश्चरुर्वा द्रष्टव्य: । तथा त्रिसवणस्नानमेककालभोजनञ्च द्रष्टव्यम् । यदा तु गुणवत्यो: ब्रह्मणीक्षत्रिययो: श्रोत्रियभार्ययोरवकिरति तदा त्रिवार्षिकं द्विवार्षिकं च क्रमेण योज्यम् । यथा आहतु: शङ्खलिखितौ - शुप्तायां त्रीणि वर्षाणि' इति। स्वप्नस्कन्दने मनूक्तं द्रष्टव्यम् - स्वप्ने सिक्त्वा ब्रह्मचारी द्विज: शुक्रमकामत: । स्नात्वार्कमर्चयित्वा त्रि: पुनर्मामित्यृचं जपेत् । वानप्रस्थादीनां चेदमेव ब्रह्मचर्यखण्डने अवकीर्णिव्रतं कृच्छ्रत्रयाधिकं

भवति। वानप्रस्थो यतिश्चैव स्कन्दने सति कामतः । पराकत्रयसंयुक्तमवकीर्णी व्रतं चरेत् ।। इति शाण्डिल्यस्मरणात्' इदं चावकीर्णिप्रायश्चित्तं गुरुदारतत्समव्यतिरिक्तागम्यागमनविषयम् । न च ब्रह्मचारित्वोपाधिकं लघुप्रायश्चित्तविधानमिति युक्तम्, आश्रमान्तराणां द्विगुण्यात् । नैमितिकानि यथा - यदा पर्वणि परभार्यां रजस्वालां तैलाभ्यक्तः दिवा जले गच्छति' इति । ननु ब्रह्मचारिणो योषिति ब्रह्मचर्यस्खलनस्यागमनीयान्तरीयकत्वं नास्त्येव । तस्मात्पृथक् नैमितिकं प्रयोक्तव्यमिति सुष्ठूक्तम् ।

## बोधप्रश्नाः -

१. ब्रह्मचारी कथमवकीर्णी भवति ?

उत्तरं........................................................................

२. अवकीर्णी केन पशुना यागं कृत्वा विशुध्यति ?

उत्तरं........................................................................

३. अवकीर्णी कुत्र पशुमालभेत ?

उत्तरं........................................................................

४. अवकीर्णी कस्मिन्नग्नौ पशुमालभेत ?

उत्तरं........................................................................

५. रात्रौ केन कुत्र यष्टव्यम् ?

उत्तरं........................................................................

# ८.१२. अनुपातकप्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

भैक्षाग्निकार्ये त्यक्त्वा तु सप्तरात्रमनातुरः ।<br>कामावकीर्ण इत्याभ्यां जुहुयादाहुतिद्वयम् ।।<br>उपस्थानं ततः कुर्यात्सं मा सिंचन्त्वनेन तु ।

यस्त्वनातुर एव ब्रह्मचारी निरन्तरं सप्तरात्रं भैक्षमग्निकार्यं वा त्यजति असौ 'कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामायस्वाह । कामावपन्नोऽस्म्यवपन्नोऽस्मि कामकामाय स्वाह' इत्येताभ्यां मन्त्राभ्यामाहुती हुत्वा 'सं मा सिंचन्तु मरुतः समिन्द्रः सं बृहस्पतिः । समायमग्नि सिंचन्तां यशसा ब्रह्मवर्चसेन।।' इत्यनेन मन्त्रेणाग्निम् उपतिष्ठेत् । एतच्च गुरुपरिचर्यादिगुरुतरकार्यव्यग्रतया अकरणे द्रष्टव्यम् । अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् इति मानवं द्रष्टव्यम् ।

किञ्च, ब्रह्मचारिणा अमत्या मधुमांसभक्षणे कृच्छ्रः कार्यः । तदनन्तरमवशिष्टानि व्रतानि समापयेत्। एतच्च शिष्टभोजनार्हशशादिमांसभक्षणविषयम् । 'ब्रह्मचारी चेन्मांसमश्नीयोच्छिष्टभोजनीयं कृच्छ्रं द्वादशरात्रं चरित्वा व्रतशेषं समापयेत्। यदा तु मांसैकापनोद्य व्याध्याभिभूतस्तदा मांसं गुरोरुच्छिष्टं कृत्वा भक्षणीयम्। अकामत मधुभक्षणेऽदोषः ।

## बोधप्रश्नाः -

१. मधुमांसाशने शुद्ध्यर्थं कः कार्यः ?

उत्तरं..........................................................

२. ब्रह्मचारी मांसमश्नीय कतिरात्रं व्रतं चरेत् ?

उत्तरं..........................................................

३. कदा गुरोरुच्छिष्टं भक्षणीयम् ?

उत्तरं..........................................................

# ८.१३. ब्रह्मचारिप्रायश्चित्तप्रसंगाद् गुरोः प्रायश्चित्तम् -

यस्तु गुरुश्चौरोरगव्याघ्रादिभयव्याकुलप्रदेशे सान्द्रतरान्धकाराकुलितनिशीथावसरे कार्यार्थं शिष्यं प्रेरयति, स च गुरुणा प्रेरितो दैवान्मृतस्तदा स गुरुः कृच्छ्राणां प्राजापत्यादीनां त्रयं कुर्यात्, न पुनस्त्रयः प्राजापत्याः, तथा सति पृथङ्निवेशिनी संख्यानुपपन्ना स्यात् ।

## ८.१३.१. सकलहिंसाप्रायश्चित्तापवादः -

यथोक्तं याज्ञवल्क्येन -

'क्रियमाणोपकारे तु मृते विप्रे न पातकम् ।'

## बोधप्रश्नः -

१. गुरुणा प्रेरितः शिष्यः म्रियते चेत्कतिकृच्छान् कुर्यात् ?

उत्तरं..........................................................

# ८.१४. सारांशः

प्रियपाठकाः ! अस्मिन् खण्डे अष्टमभागे गोवधप्रायश्चित्तं निरूपितम् । उपपातकानां प्रायश्चित्तमालोचितम्। शूद्रविट्क्षगवधे प्रायश्चित्तं विवेचितम् । स्त्रीवधे प्रायश्चित्तं प्रतिपादितम् । व्यभिचारितब्राह्मण्यादिवधे प्रायश्चित्तं निर्णितम् । अनुपातकप्राणिवधे प्रायश्चित्तं निगदितम् । सामान्यं प्रायश्चितम् आलोचितम् । वृक्षगुल्मादीनां छेदने प्रायश्चित्तं विचारितम् । पुंश्चलीवानरादिवधे प्रायश्चित्तं निरूपितम् । शरीरचरमधातुविच्छेदकस्कन्दने प्रायश्चित्तं प्रतिपादितम् । अवकीर्णिप्रायश्चित्तं प्रतिपादितम्। अनुपातकप्रायश्चित्तं निरूपितम् । ब्रह्मचारिप्रायश्चित्तप्रसङ्गे गुरोः प्रायश्चित्तञ्चालोचितम्

।

## ८.१५. पारिभाषिकशब्दाः -

परिविविदानः - परिवेत्ता

दृतिः - जलधारचर्मकोशः

अनः - शकटम्

शिखण्डी - मयूरः

पण्डकः - नपुंसकः

उपकूलनम् - तापनम्

अवकीर्णम् - चरमधातोर्विसर्गः

## ८.१६. आदर्शप्रश्नाः

### निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः)

१. गोवधप्रायश्चित्तं विज्ञानेश्वरमतानुसारमुल्लिखत ।

२. उपपातकानां प्रायश्चित्तं प्रतिपादयत ।

३. अवकीर्णस्य लक्षणमुल्लिख्य तस्य प्रायश्चित्तं मिताक्षरादिशा निरूपयत ।

### विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः)

१. स्त्रीवधप्रायश्चित्तं ग्रन्थोक्तदिशा विवेचयत ।

२. अनुपातकप्राणिवधे प्रायश्चित्तं निरूपयत ।

३. पुंश्चलीवानरादीनां दंशनिमित्तं प्रायश्चित्तं लिखत ।

### लघुप्रश्नाः - (प्रत्येकं ५ अङ्काः)

१. शरीरचरमधातुविच्छेदस्कन्दने प्रायश्चित्तमुल्लिखत ।

२. वृक्षादिच्छेदने प्रायश्चित्तमालोचयत ।

३. ब्रह्मचारिप्रायश्चित्तप्रसंगे गुरोः प्रायश्चित्तं लिखत ।

### एकाङ्कप्रश्नाः - (प्रत्येकं १ अङ्कः)

१. उपपातकशुद्धिः केन स्यात् ?

२. क्षत्रियवधे पुमान् कति गाःदद्यात् ?

३. अप्रदुष्टां स्त्रियं हत्वा कीदृश व्रतं चरेत् ?

४. मार्जारं निहत्य कति दिनानि क्षीरं पिबेत् ?

५.	दन्तिनि व्यापादने कति नीलवृषाः देयाः ?

६.	पुश्चलीवधं कृत्वा किं प्राश्य विशुध्यति ?

## ८.१७. एकाङ्कप्रश्नानामुत्तराणि -

१. चान्द्रायणेन, २. ऋषभैहकसहस्रा, ३. शूद्रहत्यावतम्, ४. त्र्यहम्, ५. पञ्च, ६. घृतम् ।

# षष्ठपत्रम्

# द्वितीयखण्डः, नवमभागः ( Unit - IX)

# (प्रायश्चित्तप्रकरणस्य मिथ्याभिशंसिनः प्रायश्चित्तादारभ्य देशविशेषगमनप्रायश्चित्तं यावत्)

## ९.१. प्रस्तावना -

अस्मिन् खण्डे नवमभागे मिथ्याभिशंसिनः प्रायश्चित्तविवक्षा तदुपयोग्यार्थवादः, अभिशस्तप्रायश्चित्तम्, अयाज्ययाजनप्रायश्चित्तम्, असत्प्रतिग्रहे प्रायश्चित्तम्, जातिदुष्टसंधिन्यादिक्षीरपाने प्रायश्चित्तम्, स्वभावदुष्टमांसादिभक्षणे प्रायश्चित्तम्, अशुद्धिसंस्पृष्टभक्षणे प्रायश्चित्तम्, अशुचिद्रव्यसंस्पृष्टभक्षणे प्रायश्चित्तम्, भावदुष्टभक्षणे प्रायश्चित्तम्, कालदुष्टभक्षणे प्रायश्चित्तम्, गुणदुष्टशुक्तादिभक्षणे प्रायश्चित्तम्, हस्तदानादिक्रियादुष्टाभोज्यभक्षणे प्रायश्चित्तम् । परिग्रहाभोज्यभोजने प्रायश्चित्तम्, जातिभ्रंशकरादीनां प्रायश्चित्तम्, प्रकर्णकं प्रायश्चित्तं चैते विषया आलोचिताः ।

## ९.२. उद्देश्यम् -

प्रियपाठकाः ! अस्मिन् खण्डे नवमभागे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- मिथ्याभिशंसिनः प्रायश्चित्तविवक्षया तदुपयोग्यार्थवादं निर्णेतुं शक्नुवन्ति ।
- अभिशस्तप्रायश्चित्तं निर्णेतुं प्रभवन्ति ।
- अयाज्ययाजनप्रायश्चित्तं प्रतिपादयितुं समर्थाः भविष्यन्ति ।
- असत्प्रतिग्रहे प्रायश्चित्तमालोचयिष्यन्ति ।
- जातिदुष्टसंधिन्यादिक्षीरपाने प्रायश्चित्तं लिखितुं प्रभवन्ति ।
- स्वभावदुष्टमांसादिभक्षणे प्रायश्चित्तं निर्णेष्यन्ति ।
- अशुद्धिसंस्पृष्टभक्षणे प्रायश्चित्तं निरूपयिष्यन्ति ।
- अशुचिद्रव्यसंस्पृष्टभक्षणे प्रायश्चित्तं प्रतिपादयितुमर्हन्ति ।
- भावदुष्टभक्षणे प्रायश्चित्तं लिखितुमर्हन्ति ।
- कालदुष्ट-भक्षणे प्रायश्चित्तं निर्णेतुं शक्नुवन्ति ।

- गुणदुष्टशुक्तादिभक्षणे प्रायश्चित्तं निरूपयितुं शक्नुवन्ति ।
- हस्तदानादिक्रियादुष्टाभोज्यभक्षणे प्रायश्चित्तं प्रतिपादयितुं शक्नुवन्ति ।
- परिग्रहाभोज्यभोजने प्रायश्चित्तं निरूपयिष्यन्ति ।
- जातिभ्रंशकरादीनां प्रायश्चित्तं निरूपयितुं शक्नुवन्ति ।
- प्रकीर्णकप्रायश्चित्तं स्पष्टयितुं प्रभवन्ति ।

## ९.३. मिथ्याभिशंसिनः प्रायश्चित्तविवक्षया तदुपयोग्यार्थवादविचारः -

यथोक्तं याज्ञवल्क्येन -

मिथ्याभिशंसिनो दोषो द्विः समो भूतवादिनः ।
मिथ्याभिशस्तदोषं च समादत्ते मृषा वदन् ।। ३.२८४

यस्तु परोत्कर्षेर्ष्याजनितरोषकलुषितान्तःकरणः जनसमक्षं मिथ्यैवाभिशापं 'ब्रह्महत्यादिकमनेन कृतम्' इति आरोपयति, तस्य तदेव द्विगुणं भवति । यस्तु विद्यमानमेव दोषमलोकविदितं जनसमक्षं प्रकाशयति, तस्यापि तत्पातकिसमदोषभाक्त्वम्, तथा चापस्तम्बः - 'दोषं बुद्ध्वा न पूर्वः परेभ्यः पतितस्य समाख्याता स्यात् परिहरेच्चैनं धर्मेषु' इति न केवलं मिथ्याभिशंसा द्विगुणदोषभाक्, अपि तु मिथ्याभिशस्तस्य यदन्यद् दुरितजातं तदपि समादत्त इति वक्षमाणप्रायश्चित्तेऽर्थवादः । न पुनः पापद्विगुण्यादिप्रतिपादनमत्र विवक्षितम्, निमित्तस्य लघुत्वाल्लघुप्रायश्चित्तस्य उपदेक्ष्यमाणत्वात् कृतनाशाकृताभ्यागमप्रसङ्गाच्च, तत्र प्रायश्चित्तम् - यथोक्तं याज्ञवल्क्येन -

महापापोपपापाभ्यां योऽभिशंसेन्मृषा परम् ।
अब्भक्षो मासमासीत स जापी नियतेन्द्रियः ।। ३.२८५

यस्तु महापापेन ब्रह्महत्यादिना गोवधाद्युपपापेन वा मृषैव परमभिशंसति स मासं यावज्जलाशनो जपशीलो जितेन्द्रियश्च भवेत् । तपश्च शुद्धवतीनां कार्यः । 'ब्राह्मणमनृतेनाभिशस्य पतनीयेनोपातकेन वा मासमब्भक्षः शुद्धवतीरावर्तयेदश्वमेधावभृथं वा गच्छेत् इति वसिष्ठस्मरणात् । 'महापापोपपाप' ग्रहणमन्येषामप्यतिपातकादीनाम् उपलक्षणम् । एतच्च ब्राह्मणस्यैव ब्राह्मणेनाभिशंसने कृते द्रष्टव्यम्, यदा तु ब्राह्मणः क्षत्रियादेरभिशंसनं करोति, क्षत्रियादिर्वा ब्राह्मणस्य तदा - प्रतिलोमापवादेषु द्विगुणस्त्रिगुणो दमः । वर्णानामानुलोम्यने तस्मादर्धार्धहानितः ।। इति दण्डानुसारेण प्रायश्चित्तस्य वृद्धिह्रासौ कल्पनीयौ। एवं प्रकीर्णाभिशंसिनोऽपि उपपातकान्न्यूनं कल्पनीयम् । 'शिक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत्' इति स्मरणात् । यत्तु

शङ्खलिखिताभ्याम् - 'नास्तिकः कृतघ्नः कूटव्यवहारी ब्राह्मणवृत्तिघ्नो मिथ्याभिशंसी चेत्येते षड्वर्षाणि ब्राह्मणगृहेषु भैक्षं चरेयुः, संवत्सरं धौतभैक्षमश्नीयुः, षण्मासान्वा गा अनुगच्छेयुः' ।

**बोधप्रश्नौ -**

१. कस्य दोषः द्विगुणितो भवति ?

उत्तरं............................................................................

२. कः अब्भक्षः जापी नियतेद्रियश्च सन् मासमासीत ?

उत्तरं............................................................................

## ९.४. अभिशस्तप्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

अभिशस्तो मृषाकृच्छ्रं चरेदाग्नेयमेव वा ।
निर्वपेत्तु पुरोडाशं वायव्यं पशुमेव वा ।। ३.२८६

यः पुनः मिथ्याभिशस्तः स कृच्छ्रं प्राजापत्यं चरेत् । अग्निदैवत्येन वा पुरोडाशेन यजेत । वायुदैवत्येन वा पुरोडाशेन यजेत । वायुदैवत्येन वा पशुना । एषां च पक्षाणां शक्तिसंभवापेक्षया व्यवस्था । 'संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः' इति दण्डातिरेकदर्शनात् । यत्तु पैठिनसिनोक्तम् - 'अनृतेनाभिशस्यमानः कृच्छ्रं चेरेन्मासं पातकेषु महापातकेषु द्विमासमि'ति, यत्तु वौधायनेनोक्तं पातकाभिशंसिने कृच्छ्रस्तदर्धस्तदर्धमभिशस्तस्य' कालशक्त्याद्यपेक्षया व्यवस्था ज्ञेया ।

किञ्च, यस्तु नियोगं विना भ्रातुर्ज्येष्ठस्य कनिष्ठस्य वा भार्यां गच्छति स चान्द्रायणं चरेत् । एतच्च सकृन्मतिपूर्वविषयम् । यथोक्तं याज्ञवल्क्येन -

'अनियुक्तो भ्रातृभार्यां गच्छंश्चान्द्रायणं चरेत् ।
त्रिरात्रन्ते घृतं प्राश्य गत्वोदक्यां विशुद्धयति ।। ३.२८६

यः पुनरुदक्यां रजस्वलां स्वभार्यामपि गच्छति स त्रिरात्रमुपोष्यान्ते घृतं प्राश्य विशुद्धयति । एतदकामतः सकृद्गमनविषयम् । तत्रैवाभ्यासे 'रजस्वलागमने सप्तरात्रम्' इति शातातपेनोक्तं द्रष्टव्यम् । कामतः सकृद्गमनेऽपि एतदेव । यत्तु बृहत्संवर्तेनोक्तम् - रजस्वलां तु यो गच्छेद्गर्भिणीं पतितां तथा । तस्य पापविशुध्यर्थमतिकृच्छ्रविशोधनम् ।। इति तत्कामतोऽभ्यासविषयम् । यत्पुनः शङ्खेन त्रिरात्रमुक्तम् – 'पादस्तु शूद्रहत्यायां उदक्यागमने तथा' । असपत्न्योस्तु कामतः स्नानमात्रम् । यत्तु कश्यपवचनम् - रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि । एकरात्रं निराहारा पञ्चगव्येन शुध्यति ।। असवर्णास्पर्शे तु बृहद्वसिष्ठेन विशेष उक्तः - स्पृष्ट्वा

रजस्वलाऽन्योन्यं ब्राह्मणी शूद्रजापि च । कृच्छ्रेण शुध्यते पूर्वा शूद्री पादेन शुध्यति ।। चाण्डालादिस्पर्शे तु बृहद्वसिष्ठेन - पतितान्त्यश्वपाकेन संस्पृष्टा चेद्रजस्वला । तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत् । यत्पुनरुक्तम् - रजस्वला तु संस्पृष्टा चाण्डालान्त्यश्ववायसैः। तावत्तिष्ठेन्निराहारा यावत्कालेन शुध्यति ।। स्मृत्यन्तरे विशेष उक्तः - रजस्वला तु भुञ्जाना श्वान्त्यजादीन्स्पृशेद्यदि । गोमूत्रयावकाहारा षड्रात्रेण विशुध्यति । अशक्तौ काञ्चनं दद्याद्विप्रेभ्यो वापि भोजनम् । उच्छिष्टयोः परस्परस्पर्शने उच्छिष्टोच्छिष्टया स्पृष्टा कदाचित्स्त्री रजस्वला । कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानैरुपोषिता ।

## बोधप्रश्नाः -

१. मिथ्याभिशस्तः कीदृशं कृच्छ्रं चरेत् ?

उत्तरं........................................................

२. मिथ्याभिशस्तः केन यजेत ?

उत्तरं........................................................

३. अनियुक्तः भ्रातृजायां गच्छन् कीदृशं व्रतं चरेत् ?

उत्तरं........................................................

४. उदक्यां गत्वा कतिरात्रान्ते घृतं प्राश्य विशुध्यति ?

उत्तरं........................................................

# ९.५. अयाज्ययाजनप्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

त्रीन्कृच्छ्रानाचरेद् व्रात्ययाजकोऽभिचरन्नपि ।
वेदप्लावी यवाश्यब्दं त्यक्त्वा च शरणागतम् ।। ३.२८८

यस्तु सावित्रीपतितानां याजनं करोति स प्राजापत्यप्रभृतीं स्त्रीन्कृच्छ्रानाचरेत् । एतेषां च गुरुलघुभूतानां कृच्छ्राणां निमित्तगुरुलघुभावेन कल्पनीयम् । तथा अभिचरन्नपीदमेव प्रायश्चित्तं कुर्यात् । एत एवोक्तं मनुना व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च । अभिचारमहीनं च त्रिभिः कृच्छ्रैः व्यपोहति । अहीनो द्विरात्रादिर्द्वादशाहपर्यन्तोऽहर्गणयागः । यच्च पैठिनसिनोक्तम् - शूद्रयाजकः सर्वद्रव्यपरित्यागात्पूतो भवति प्राणायामसहस्रेषु दशकृत्वोभ्यस्तेषु इति । यः स्ववेदं विप्लावयति यश्च, रक्षणक्षमोऽपि तस्करव्यतिरिक्तं शरणागतमुपेक्षते । सोऽपि संवत्सरं यवोदनं भुञ्जानः शुध्यति । तत्र विप्लवो नाम पर्वचाण्डालश्रोत्रावकाशाद्यनध्यायेष्वध्ययनम् । उत्कर्षहेतोरधीयानस्य किं पठसि नाशितं त्वयेत्येवं पर्ययोगदानं वा विप्लवनमुच्यते । अत

एवोक्तं स्मृत्यन्तरे दत्तानुयोगानध्येतुः पतितान्मनुरब्रवीत्' इति । यत्तु वसिष्ठेनोक्तम् 'पतितचाण्डालशवश्रावणे त्रिरात्रं वाग्यता अनशनन्त आसीरन् सहस्रपरमं वा तदभ्यस्यन्तः पूता भवन्तीति विज्ञायते' इति । पितृमातृसुतत्यागतडागारमविक्रयेषु मनुयोगीश्वरोक्तोपपातकसाधारणप्रायश्चित्तानि पूर्ववज्जातिशक्तिगुणाद्यपेक्षया योज्यानि । ययोक्तं हारीतेन-कन्यादूषी सामविक्रयी वृषलीपतिः कौमारदारत्यागी सुरामद्यपः शूद्रयाजकः गुरोः प्रतिहन्ता नास्तिको कृतघ्नः कूटव्यवहारी ब्राह्मणवृत्तिघ्नो मिथ्याभिशंसी पतितसव्यवहारी मित्रधृक् शरणागतघाती प्रतिरूपकवृत्तिरित्येते पञ्चतपोऽभ्रावकाशजलशयनान्यनुतिष्ठेयुः, ग्रीष्मवर्षाहिमन्तेषु मासं गोमूत्रयावकमश्नीयुः । तदुभयमपि क्षत्रियवैश्ययोः प्रातिलोम्येन दूषणे योज्यम् । शूद्रस्य तु वध एव । तत्र व्यसनाशक्त्या त्यागे अधीतस्य च नाशनमिति ब्रह्महत्यासमप्रायश्चित्तम् । शास्त्रश्रवणाद्याकुलतया त्यागे तु त्रैमासिकाद्युपपातकप्रायश्चित्तानि जातिशक्त्यपेक्षया योज्यानि । अग्नित्यागे विशेषः - 'योऽग्निनपविध्येत्स कृच्छ्रं द्वादशरात्रं चरित्वा पुनराधेयं कारयेत्' । तत्र मासद्वये प्राजापत्यं, मासचतुष्टयेऽतिकृच्छ्रम्, षण्मासोऽच्छिन्ने पराकः षण्मासादूर्ध्वं योगीश्वरोक्तानि प्रायश्चित्तानि योज्यनि । अग्नित्यागे - योऽग्निं त्यजति नास्तिक्यात्प्राजापत्यं चरेदिति व्याघ्रः । स्त्रीप्राणिवधवशीकरणादिभिर्जीवने तिलेक्षुयन्त्रप्रवर्तने च तान्येव व्रतानि तथैव योज्यानि । हीनसख्यभेदने उपपातकसामान्यप्रायश्चित्तानि योज्यानि । 'साधारणस्त्रीसंभोगः हीनयोनिनिषेवणम्' इत्युक्तम् । तत्रापि पशुवेश्याभिगमने प्राजापत्यं विधीयते' इति संवर्तोक्तमकामतो द्रष्टव्यम्। कामतस्तु यमेनोक्तम् - 'वैश्यागमनजं पापं व्यपोहन्ति द्विजातयः । पीत्वा सकृत्सकृत्तप्तं सप्तरात्रं कुशोदकम्। अत्र उपपातकसामान्यप्रायश्चित्तानि च कामाकामतोऽभ्यासापेक्षया योज्यानि । तत्र मत्याभ्यासे तु 'प्रतिनिमित्तं नैमित्तिकमावर्तते' । अनाश्रमी संवत्सरं प्राजापत्यं कृच्छ्रं चरित्वा आश्रममुपेयात् । द्वितीयेऽतिकृच्छ्रं तृतीये कृच्छ्रातिकृच्छ्रमत ऊर्ध्वं चान्द्रायणम्' इति । एतदसंभवविषयम् । संभवे तु सामान्येनोपपातकप्रायश्चित्तानि कामाकामतो व्यवस्थापनीयानि ।

## बोधप्रश्नाः -

१. व्रात्ययाजकः कतिकृच्छ्रानाचरेत् ?

उत्तरं.........................................................................

२. वेदप्लावी केन शुध्यति ?

उत्तरं.........................................................................

३. शरणागतं त्यक्त्वा केन शुध्यति ?

उत्तरं..........................................................................

## ९.६. असत्प्रतिग्रहे प्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

गोष्ठे वसन्ब्रह्मचारी मासमेकं प्रयोव्रतः ।

गायत्रीजाप्यनिरतः शुद्ध्यतेऽसत्प्रतिग्रहात् ।। ३.२८९

यस्त्वसत्प्रतिग्रहं करोति स ब्रह्मचर्ययुक्तो गोष्ठे वसन् गायत्रीजाप्यनिरतो मासं पयोव्रतेन शुद्धयतीति। प्रतिग्रहश्चासत्त्वं दातुर्जातिकर्मनिबन्धनं यथा चाण्डालादेः पतितादेश्च । तथा देशकालनिबन्धनं च यथा कुरुक्षेत्रोपरागादौ तथा प्रतिग्राह्यद्रव्यनिबन्धनं च यथा सुरामेषीमृतशय्योभयतो मुख्यादेः । यदा पातितादेर्मेष्यादिकं प्रतिगृहणाति, तदेतद्गुरुप्रायश्चित्तं द्रष्टव्यम् । जपे मनुना संख्याविशेष उक्त - जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः । मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात् । षड्त्रिंशन्मतानुसारम् -'पवित्र्येष्ट्या विशुद्धयन्ति सर्वे घोरा प्रतिग्रहाः । ऐन्दवेन मृगारेष्ट्या कदाचिन्मित्रविन्दया ।। देव्या लक्षजपेनैव शुद्धयन्ते दुष्प्रतिग्रहाः ।। यत्तु बृहद्धारीतवचनम् - 'राज्ञः प्रतिग्रहं कृत्वा मासमत्सु सदा वसेत् । षष्ठे काले पयोभक्षः पूर्णे मासे विशुद्ध्यति ।। तर्पयित्वा द्विजान्कामैः सततं नियतव्रतः । तथाह हारीतः - 'मणिवासोगवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत्' । पुनश्च - यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम् । तस्योत्सर्गेण शुद्धयन्ति जप्येन तपसैव च ।। इति मनुस्मरणात् ।

### बोधप्रश्नाः -

१. असत्प्रतिग्रहात् कथं शुद्ध्यते ?

उत्तरं..........................................................................

२. राज्ञः प्रतिग्रहं कृत्वा कथं विशुद्ध्यति ?

उत्तरं..........................................................................

३. मणिवासोगवादीनां प्रतिग्रहे सावित्रीं कतिवारान् जपेत् ?

उत्तरं..........................................................................

### ९.६.१. व्रतव्रातः –

तत्र जातिदुष्टपलाण्ड्वादिभक्षणे कामतः सकृत्कृते 'पलाण्डुंविड्वराहं च' इत्यादिना चान्द्रायणमुक्तम्। कामतोऽभ्यासे तु 'निषिधभक्षणं जैह्मयं' इत्यादिनोक्तं सुरापानसमप्रायश्चित्तम् । तत्रैवाभ्यासे यतिचान्द्रायणम्। 'अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सान्तपनं चरेत् । यतिचान्द्रायणं वापि शेषेषूपवसेदहः ।। इति मनुस्मरणात्। यत्तु बृहद्यमेनोक्तम् -

खट्ववार्ताककुम्भीकब्रश्चनप्रभवाणि च । भूतृणं शिगुकं चैव खुखुण्डं कवकानि च ।। एतेषां भक्षणं कृत्वा प्राजापत्यं चरेद्विजः ।। 'मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं क्षिपेत्' । इति योगीश्वरेण कामतः सकृद्भक्षणे त्र्यहस्योक्तत्वात् । अत्यन्ताभ्यासे तु - संसर्गदुष्टं यच्चान्नं क्रियादुष्टमकामतः । भुक्त्वा स्वाभावदुष्टं च तप्तकृच्छ्रं समाचरेत् ।। कामतः त्वभ्यासे आवृत्तिः कल्प्या । अत एवानन्तरं तेनैवोक्तम् - एतान्येव व्याधितस्य भिषक्क्रियायामप्रतिषिद्धानि भवन्ति । यानि चैवं प्रकाराणि तेष्वपि न दोष इति ।

## बोधप्रश्नाः -

१. जातिदुष्टपलाण्ड्वादिभक्षणे कीदृशं व्रतं चरेत् ?

उत्तरं.........................................................................

२. खट्ववार्ताकादीनां भक्षणं कृत्वा कीदृशं व्रतं द्विजः चरेत् ?

उत्तरं.........................................................................

३. कान् कामतो जग्ध्वा सोपवासस्त्र्यहं क्षिपेत् ?

उत्तरं.........................................................................

# ९.७. जातिदुष्टसंधिन्यादिक्षीरपाने प्रायश्चित्तम् -

तत्र चाकामतः सकृत्पाने - 'अनिर्दशाया गोः क्षीरमौष्ट्रमेकशफं तथा । आविकं संधिनीक्षीरं विवत्सायाश्च गोःपयः ।। आरण्यानां च सर्वेषां मृगाणां महिषीं विना । स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि ।। दधि भक्ष्यं च शुक्तेषु सर्वं च दधिसंभवम् इत्युक्त्वा 'शेषेषूपवसेदहः' इति मनूक्त उपवासो द्रष्टव्यः । कामतस्तु योगीश्वरोक्तस्त्रिरात्रोपवासो द्रष्टव्यः । यत्तु पैठिनसिनोक्तम् - 'अविखरोष्ट्रमानुषीक्षीरप्राशने तप्तकृच्छ्रः पुनरुपनयनं च । अनिर्दशाहगोमहिषीक्षीरप्राशने षडात्रमभोजनम्।। 'सर्वासां द्विस्तनीनां क्षीरपानेऽप्यजावर्जमेतदेव' अनिर्दशाहं तान्यपि संधिनीयमसूस्यन्दिनीविवत्साक्षीरं चामेध्यभुजश्च' इति विष्णुनोपवासस्योक्तत्वात् । तथा वर्णनिबन्धनश्च प्रतिषेधः - 'क्षत्रियश्चापि वृत्तस्थो वैश्यः शूद्रोऽथवा पुनः । यः पिबेत्कपिलाक्षीरं न ततोऽन्योऽस्त्यपुण्यकृत् ।। इत्येवमादौ' च यत्र प्रतिपदोक्तं प्रायश्चित्तं न दृश्यते तत्र 'शेषेषूपवसेदहः' इति साधारणप्रायश्चित्तं मनूक्तं द्रष्टव्यम्।

## बोधप्रश्नाः -

१. जातिदुष्टक्षीरपाने किं तावद्द्रष्टव्यम् ?

उत्तरं.........................................................................

२. कानि पाने भोजने च वर्ज्यानि ?

उत्तरं...........................................................

३. अभक्षभक्षणे कतिरात्रात्मकं व्रतं कुर्यात् ?

उत्तरं...........................................................

४. कानि सकृत्प्राश्य उपवसेत् ?

उत्तरं...........................................................

## ९.८. स्वभावदुष्टमांसादिभक्षणे प्रायश्चित्तम् -

कामत: सकृद्भक्षणे 'शेषेषूपवसेदह:' इति मनूक्तसाधारणप्रायश्चित्तं द्रष्टव्यम् । कामतस्तु - 'चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च । मात्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ।।' इति योगीश्वरोक्तं द्रष्टव्यम् । कामतोऽभ्यासे तु - 'जग्ध्वा मांसमभक्ष्यं तु सप्तरात्रं यवान्पिवेत् इति मनूक्तं द्रष्टव्यम् । इदं च विट्सूकरादिमांसव्यतिरिक्तविषयम् । 'क्रव्याद्विट्सूकरोष्ट्राणां कुक्कुटानां च भक्षणे । नरकाकखराश्वानां तप्तकृच्छ्रविशोधनम् ।। इति मनुना जातिविशेषेण प्रायश्चित्तविशेषस्योक्तत्वात् । मूत्रपुरीषप्राशनेऽप्येतदेव । उपोष्य वा द्वादशाहं कूष्माण्डैर्जुहुयाद्घृतम् इति बृहद्यमस्मरणात् । तत्र कामत: तप्तकृच्छ्र:, अभ्यासे तु कूष्माण्डसहित: पराक इति व्यवस्था । तथा प्रचेतसाप्युक्तम् - 'श्वसृगालकाककुक्कुटपार्षतवानरचित्रकचाषक्रव्यादखरोष्ट्र-गजवाजिविड्वराहगोमानुषमांसभक्षणे तप्तकृच्छ्रमादिशेदेषां मूत्रपुरीषभक्षणे त्वतिकृच्छ्रम्' इति । इदं च कामकारविषयम् । अङ्गिरसमतानुसारं 'वलाकाभासगृध्राखुखरवानरसूकरान् । दृष्ट्वा चैषाममेध्यानि स्पृष्ट्वाचम्य विशुद्ध्यति ।। इच्छया एषाममेध्यानि भक्षयित्वा द्विजातय: । कुर्यु: सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छया ।। यच्च बृहद्यमेनोक्तम् - 'शुष्कमांसाशने विप्रो व्रतं चान्द्रायणं चरेत्' । यत्पुन: शङ्खेनोक्तम् - भुक्त्वा चोभयतो दंतांस्तथा चैकसफानपि। औष्ट्रं गव्यं तथा जग्ध्वा षण्मासान्व्रतमाचरेत् ।। यत्तु स्मृत्यन्तरोक्तम् - जग्ध्वा मांसं नराणां च विड्वराहं खरं तथा । गवाश्वकुञ्जरोष्ट्राणां सर्वं पाञ्चनखं तथा । क्रव्यादं कुक्कुटं ग्राम्यं कुर्यात्संवत्सरव्रतम् ।।

केशादिषु पुन: षट्त्रिंशन्मते विशेष उक्त: - 'अजाविमहिषमृगाणां आममांसभक्षणे केशनखरुधिरप्राशने बुद्धिपूर्वे त्रिरात्रमज्ञानादुपवास:' इति । यत्तु प्रचेतसोक्तम् - नखकेशमृल्लोष्टभक्षणेऽहोरात्रमभोजनादशुद्धि' इति । स्मृत्यन्तरवचनम् - 'केशकीटनखं प्राश्य मत्स्यकण्डकमेव च । हेमतप्तघृतं पीत्वा तत्क्षणादेव शुद्ध्यति।। तन्मुखमात्र प्रवेशविषयम् । यदा भोजनस्थमन्नं केशादिदूषितं भवति तदा - अन्ने भोजनकाले तु मक्षिकाकेशदूषिते। अनन्तरं स्पृशेदापस्तच्चान्नं भस्मना स्पृशेत्' ।। इति प्रचेतसस्मरणात् ।

## बोधप्रश्नाः -

१. कान् कामतो जग्ध्वा सोपवसस्त्र्यहं वसेत् ?

उत्तरं.........................................................

२. केषां भक्षणे तप्तकृच्छ्रविशोधनं स्यात् ?

उत्तरं.........................................................

३. केषां भक्षणे उपोष्य द्वादशाहं कूष्माण्डैः घृतं जुहुयात् ?

उत्तरं.........................................................

४. केषाममेध्यानि स्पृष्ट्वा आचम्य विशुद्ध्यति ?

उत्तरं.........................................................

५. कानि इच्छया भक्षयित्वा द्विजातयः सान्तपनं कृच्छ्रं कुर्युः ?

उत्तरं.........................................................

६. केषां बुद्धिपूर्वप्राशने त्रिरात्रमुपवासः ?

उत्तरं.........................................................

## ९.९. अशुचिसंस्पृष्टभक्षणे प्रायश्चित्तम् -

तत्र मनुः - विडालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च । केशकीटावपन्नं च पिबेत् ब्राह्मी सुवर्चलाम्।। इति कालविशेषानुपादानादेकरात्रम् । इदं च कामतो द्रष्टव्यम् । यत्तु विष्णुनोक्तम् - 'पक्षिश्वापदजग्धस्य रसस्यान्नस्य भूयसः । संसाररहितस्यापि भोजने कृच्छ्रपादकम् ।। इति तत्कामकारितविषयम् । यत्तु शातातपेनोक्तम् - 'श्वकाकाद्यवलीढशूद्रोच्छिष्टभोजने त्वतिकृच्छ्रम्' इति तदकामतोऽभ्यासविषयम् । यत्तु शङ्खेन - 'शुनामुच्छिष्टकं भुक्त्वा मासमेकं व्रती भवेत् । काकोच्छिष्टं गवाघ्रातं भुक्त्वा पक्षं व्रती भवेत् ।' बृहद्विष्णुनोक्तम् - ब्राह्मणः शूद्रोच्छिष्टान्ने सप्तरात्रं पञ्चगव्यं पिबेत्', वैश्योच्छिष्टाशने पञ्चरात्रं राजन्योच्छिष्टाशने त्रिरात्रं ब्राह्मणोच्छिष्टाशने त्वेकाहम्' इति । अभ्यासे द्विगुण्यादिकं कल्प्यम् । सहभोजनविषये बृहद्व्यासवचनम् - 'माता वा भगिनी वापि भार्या वाऽन्याश्च योषितः । न ताभिः सह भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत्' ।। उच्छिष्टमात्रभोजने तु 'शूद्रोच्छिष्टभोजने सप्तरात्रमभोजनं स्त्रीणां च' इत्यापस्तम्बोक्तं द्रष्टव्यम् । ब्राह्मण्या सह योऽश्नीयादुच्छिष्टं वा कदाचन । तत्र दोषं न मन्यन्ते सर्व एव मनीषिणः ।। इति तद्विवाहविषय आपद्विषयो वा। अन्त्योच्छिष्टभोजने तु - 'अन्त्यानां भुक्तशेषं तु भक्षयित्वा द्विजातयः । चान्द्रं कृच्छ्रं तदर्धं च ब्रह्मक्षत्रविशां विधिः।। अन्तेवसाय्युच्छिष्टभोजने तु - 'चाण्डालपतितादीनामुच्छिष्टान्नस्य भक्षणे । चान्द्रायणं चरेद्विप्रः

क्षात्र: सान्तपनं चरेत् । षड्रात्रं च त्रिरात्रं च वर्णयोरनुपूर्वश: ।। आपदि तु - आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि । मनस्तापेन शुद्ध्येत्तु द्रुपदानां शतं जपेत् ।। इति पराशरोक्तं वेदितव्यम् । यत्तु बृहच्छातातपेनोक्तम् - 'पीतशेषं तु यत्किंचिद्भाजने मुखनि:सृतम् । अभोज्यं तद्विजानीयाद् भुक्त्वा चान्द्रायणं चरेत् ।।

## बोधप्रश्ना: -

१. केषामुच्छिष्टं जग्ध्वा ब्राह्मीं सुवर्चलां पिबेत् ?

उत्तरं.............................................................

२. केषां भोजने कृच्छ्रपादकम् ?

उत्तरं.............................................................

३. केषामुच्छिष्टकं भुक्त्वा मासमेकं व्रती भवेत् ?

उत्तरं.............................................................

४. ब्राह्मण: शूद्रोच्छिष्टान्ने कतिरात्रं पञ्चगव्यं पिबेत् ?

उत्तरं.............................................................

५. काभि: सह न भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत् ?

उत्तरं.............................................................

६. कस्योच्छिष्टभोजने सप्तरात्रमभोजनम् ?

उत्तरं.............................................................

७. आपदि विप्रेण शूद्रगृहे भुक्तं केन शुद्धयति ?

उत्तरं.............................................................

## ९.१०. अशुचिद्रव्यसंस्पृष्टभक्षणे प्रायश्चित्तम् -

तत्राह संवर्त: - 'केशकीटावपन्नं च नीलीलाक्षोपघातितम् । स्नाय्वस्थिचर्मसंस्पृष्टं भुक्त्वा तूपवसेदह:।।' इति । तथाह शातातप: - केशकीटावपन्नं च रुधिरमांसास्पृश्यास्पृष्टभ्रूणघ्नावेक्षितपतितत्र्या-वलीढश्वसूकरशवाघ्रातशुक्तपर्युषितवृथापक्वदेवान्नहविषां भोजने उपवास: पञ्चगव्याशनं च ।।

एतच्चोभयमपि अकामविषयम् । कामतस्तु - मृद्वारिकुसुमादींश्च फलकन्देक्षुमूलकान् । विण्मूत्रदूषितान्प्राश्य कृच्छ्रपादं समाचरेत् ।। संनिकृष्टेऽर्धमेव स्यात्कृच्छ्र: स्याच्छुचिशोधनम् । इति विष्णूक्तं वेदितव्यम् । अल्पसंसर्गे पादे महासंसर्गेऽर्धकृच्छ्र इति व्यवस्था । यत्तु व्यासेनोक्तम् - संसर्गदुष्टं यच्चान्नं क्रियादुष्टं च कामत: । भुक्त्वा स्वाभावदुष्टं च तप्तकृच्छ्रं समाचरेत् ।

रजस्वलादिस्पर्शे तु शङ्खः - अमेध्यपतितचाण्डालपुल्कसरजस्वलावधूतकुणिकुष्ठिनखिसंस्पृष्टानि भुक्त्वा कृच्छ्रं चरेत् । एतत्कामकारविषयम् अकामतोऽर्धम् । 'भुक्त्वा स्पृश्यैस्तथाशैचिकेशकीटैश्च दूषितम् । कुशोदुम्बरविल्वाद्यैः पनसाम्बुजपत्रकैः ।। शङ्खपुष्पीसवर्चादिक्वाथं पीत्वा विशुद्ध्यति । पुनश्च यदा शवमुच्छूनतयोद्भिन्नं भवति तदा हारीतेनोक्तम् - 'क्लिन्ने भिन्ने शवे तोयं ततस्थं यदि चेत्पिबेत् । शुद्ध्यै चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा ।। यदा चाण्डालकूपादिगतं जलं पिवति तदा आपस्तम्बोक्तं द्रष्टव्यम् - 'चण्डालकूपभाण्डस्थं नरः कामाज्जलं पिवेत्। प्रायश्चित्तं कथं तत्र वर्णे वर्णे विनिर्दिशेत् । इदं च कामकारविषयं चरेत्सान्तपनं विप्रः प्राजापत्यं च भूमिपः। तदर्धन्तु चरेद्वैश्यः शूद्रे पादं विनिर्दिशेत् ।। कामतस्तु द्विगुणम् - 'अन्त्यजैः खानिताः कूपास्तडागा वाप्य एव वा । एषु स्नात्वा च पीत्वा च प्राजापत्येन शुद्ध्यति ।। इत्यापस्तम्बोक्तमभ्यासविषयं वेदितव्यम् । यत्वापस्तम्बेन चण्डालकूपादिजलपाने पञ्चगव्यमात्रमुक्तम् । तथैव 'सुराघटप्रपातये पीत्वा नाव्यं जलं तथा । अहोरात्रोषितो भूत्वा पञ्चगव्यं जलं पिबेत् ।।

## बोधप्रश्नाः -

१. केषां भोजने उपवासः पञ्चगव्याशनं च ?

उत्तरं.............................................................

२. कान् प्राश्य कृच्छ्रपादं समाचरेत् ?

उत्तरं.............................................................

३. किं भुक्त्वा तप्तकृच्छ्रं समाचरेत् ?

उत्तरं.............................................................

४. कुत्रस्थं तोयं पीत्वा शुद्ध्यै चान्द्रायणं तप्तकृच्छ्रमपि वा कुर्यात् ।

उत्तरं.............................................................

५. चण्डालकूपभाण्डस्थं जलं पीत्वा ब्राह्मणः कीदृशं व्रतं चरेत् ?

उत्तरं.............................................................

## ९.११. भावदुष्टभक्षणे प्रायश्चित्तम् -

भावदुष्टं च यद्वर्णत आकारतो वा विसदृशतया जुगुप्सितशारीरमलादिवासनां जनयति तदुच्यते। अरिप्रयुक्तगरलादिशङ्कायां वा । तत्र च पराशरः - 'वागदुष्टं भावदुष्टं च भोजने भावदूषिते । भुक्त्वान्नं ब्राह्मणः पश्चात्त्रिरात्रेण विशुद्ध्यति ।। इति । एतत्कामकारविषयम् । यतु गौतमेन भावदुष्टं केवलः इत्यादि प्राक्पञ्चनखेभ्यः पठित्वा प्रायश्चित्तमुक्तम् - 'प्राक् पञ्चनखेभ्यश्छर्दनं

घृतप्राशनं च' इति तदकामविषयम् । शङ्कास्थाने समुत्पन्ने - 'अक्षारलवणां रूक्षां पिबेद्ब्राह्मीं सुवर्चलाम् । त्रिरात्रं शङ्खपुष्पीं वा ब्राह्मणः पयसा सह ।। पलाशविल्वपत्राणि कुशान्पद्ममुदुम्बरम् । अपः पिबेत्क्वाथयित्वा त्रिरात्रेण विशुद्ध्यति । इति वसिष्ठोक्तं द्रष्टव्यम् । मनुनाप्यभोज्यभोजनशङ्कायामुक्तम्-संवत्सरस्यैकमपि चेरत्कृच्छ्रं द्विजोत्तमः । अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः ।।

## बोधप्रश्नाः -

१. वाग्दुष्टं भावदुष्टं वा ब्राह्मणो भुक्त्वा पश्चात्कतिरात्रेण विशुद्धयति ?

उत्तरं.........................................................

२. अक्षरालवणां रूक्षां पीत्वा ब्राह्मणः कतिरात्रेण विशुद्धयति ?

उत्तरं.........................................................

३. अभोज्यभोजनशङ्कायां द्विजोतमः किं चरेत् ?

उत्तरं.........................................................

## ९.१२. कालदुष्टभक्षणे प्रायश्चित्तम् -

'कालदुष्टं च पर्युषितानिर्दशगोक्षीरादि । तत्र चाकामतः 'शेषेषूपवसेदहः' इति मनूक्तं वेदितव्यम्। 'कामतस्तु - 'केवलानि च शुक्तानि तथा पर्युषितं च यत् । ऋजीषपक्वं भुक्त्वा च त्रिरात्रं तु व्रती भवेत्।।' इति शङ्खोक्तं वेदितव्यम् । केवलान्यस्नेहोक्तानि । नवोदकपाने पञ्चगव्याशनम् - 'शृङ्गास्थिदन्तजैः पात्रैः शङ्खशुक्तिकपर्दकैः । पीत्वा नवोदकं चैव पञ्चगव्येन शुद्ध्यति' ।। इति बृहद्याज्ञवल्क्यस्मरणात्।

कामतस्तूपवासः कर्तव्यः - 'काले नवोदकं शुद्धं न पिबेच्च त्र्यहं च तत् । अकाले तु दशाहं स्यात्पीत्वा नाद्यादहर्निशम् ।। गृहणकाले भोजने तु चान्द्रायणम् - नवश्राद्धग्रामयाजकान्नसगृहभोजने । नारीणां प्रथमेगर्भे भुक्त्वा चान्द्रायणं चरेत् ।। यदा संगृहादन्यत्र निषिद्धकाले भुङ्क्ते - तदाह मार्कण्डेयः - चन्द्रस्य यदि वा भानोर्यस्मिन्नहनि भार्गव । ग्रहणं तु भवेत्तस्मिन् पूर्वं तु भोजनक्रियाम् ।। नाचरेत्सगृहे चैव तथैवास्तमुपागते । यावत्स्यान्नोदयस्तस्य नाश्नीयात्तावदेव तु । तथा 'ग्रहणं तु भवेदिन्दोः प्रथमादधियामतः । भुञ्जीतावर्तनात्पूर्वं प्रथमे प्रथमादधः ।।' तथा - अपराह्णे न मध्याह्ने सायाह्ने न तु सङ्गवे । भुञ्जीत सङ्गवे चेत्स्यान्न पूर्वं भोजनक्रिया ।। यच्च मनुनोक्तं - 'नाश्नीयात्संधिवेलायां नातिप्रगे नाति सायमित्येवमादि' । यच्च बृहच्छातातपेनोक्तम् - 'धाना दधि च सक्तूंश्च श्रीकामो वर्जयेन्निशि । भोजनं तिलसंबन्धं स्नानं चैव विचक्षणः।। अनादिष्टप्रायश्चित्तेषु योगीश्वरोक्तप्राणायमशतं द्रष्टव्यम् ।

## बोधप्रश्ना: -

१. कानि भुक्त्वा त्रिरात्रं व्रती भवेत् ?

उत्तरं.........................................................................

२. कै: नवोदकं पीत्वा पञ्चगव्येन शुद्धयति ?

उत्तरं.........................................................................

३. कासां प्रथमगर्भे भुक्त्वा चान्द्रायणं चरेत् ?

उत्तरं.........................................................................

४. कदा नाश्नीयात् ?

उत्तरं.........................................................................

## ९.१३. गुणदुष्टशुक्तादिभक्षणे प्रायश्चित्तम् -

तत्रादौ मनु: शुक्तानि च कषायांश्च पीत्वाऽमेध्यान्यपि द्विज: । तावद्भवत्यप्रयतो यावत्तन्न व्रजत्यध:।। इति अत्राकामत: 'शेषेषूपवसेदह:' इत्युवासो द्रष्टव्य: । एतच्चामलकादिफलयुक्तकाञ्जिकादिव्यतिरेकेण द्रष्टव्यम्। उद्धृतस्नेहादिषु भक्षे घृतप्राशनम् । अनाहुताद्यन्नभोजने तु लिखित आह - तस्य चाग्नौ न क्रियते यस्य चान्नं न दीयते । न तद्भोज्यं द्विजातीनां भुक्त्वा चोपवसेदह: ।। वृथा कृसरसंयावपायसापूपशष्कुली: । आहिताग्निर्द्विजो भुक्त्वा प्राजापत्यं समाचरेत् ।। अनाहिताग्नेस्तूपवासो द्रष्टव्य: । भिन्नभाजनादिषु भोजने - शूद्राणां भाजने भुक्त्वा भुक्तवा वा भिन्नभाजने । अहोरात्रोषितो भुक्त्वा पञ्चगव्येन शुद्धयति । तथा स्मृत्यन्तरेऽप्युक्तम् - वटार्काश्वत्थपत्रेषु कुम्भीतिन्दुकपत्रयो: कोविदारकरञ्जेषु भुक्त्वा चान्द्रायणं चरेत् ।। तथो च - 'पलाशपद्मपत्रेषु गृही भुक्त्वैन्दवं चरेत् । वानप्रस्थो यतिश्चैव लभते चान्द्रिकं फलम् ।।

## बोधप्रश्ना: -

१. उद्धृतस्नेहादीनां भक्षणे किं कार्यम् ?

उत्तरं.........................................................................

२. भिन्नभाजनेषु भुक्त्वा केन शुद्धयति ?

उत्तरं.........................................................................

३. क: पलाशपत्रेषु भुक्त्वा ऐन्दवं चरेत् ?

उत्तरं.........................................................................

## ९.१४. हस्तदानादिक्रियादुष्टभोज्यभक्षणे प्रायश्चित्तम् -

तत्र पराशरः -

माक्षिकं फाणितं शाकं गोरसं लवणं घृतम् ।

हस्तदत्तानि भुक्त्वा तु दिनमेकमभोजनम् ।।

इति कामतस्तु - 'हस्तदत्तभोजने अब्राह्मणसमीपे भोजने दुष्टपङ्क्तिभोजने भोजनेऽभ्यक्तमूत्रपुरीषकरणे मृतसूतकशूद्रान्नभोजने शूद्रैः सह स्वप्ने त्रिरात्रमभोजनम्' इति हारीतोक्तं विज्ञेयम् । पर्यायान्नदानदुष्टे तु - ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत् । द्वयमेतदभोज्यं स्याद्भुक्त्वा तूपवसेदहः ।। शूद्रहस्तेन भोजने तु - 'शूद्रहस्तेन यो भुङ्क्ते पानीयं वा पिबेत् क्वचित् । अहोरात्रोपषितो भूत्वा पञ्चगव्येन शुद्ध्यति । इति कृतूक्तं विज्ञेयम् । धमनदुष्टेऽपि - 'आसनारूढपादो वा वस्त्रार्धप्रावृतोऽपि वा । मुखेन धमितं भुक्त्वा कृच्छ्रं सान्तपनं चरेत् ।। अनापदि तु - प्राजापत्यं नवश्राद्धे पादोनं चाद्यमासके। त्रैपक्षिके तदर्धं स्यात्पादो द्वैमासिके तथा ।। इदं चापद्विषयम् । अनापदि तु - 'चान्द्रायणं नवश्राद्धे प्राजापत्यं तु मिश्रके । एकाहस्तु पुराणेषु प्राजापत्यं विधीयते ।। क्षत्रियादिश्राद्धभोजने - चान्द्रायणं नवश्राद्धे परको मासिके स्मृतः । त्रैपक्षिके सान्तपनं कृच्छ्रं मासद्वये स्मृतम् ।। आब्दिके पादकृच्छ्रः स्यात् । तथा - 'आपाङ्क्तेयान्यदुद्दिश्य श्राद्धमेकादशेऽहनि। ब्राह्मणस्तत्र भुक्त्वान्नं शिशुचान्द्रायणं चरेत्' । इति आमश्राद्धे तथा भुक्त्वा तप्तकृच्छ्रेण शुद्ध्यति ।

### बोधप्रश्नाः -

१. कानि भुक्त्वा दिनमेकमभोजनम् ?

उत्तरं..............................................................

२. कैः सह स्वप्ने त्रिरात्रमभोजनम् ?

उत्तरं..............................................................

३. शूद्रहस्तेन यो भुङ्क्ते, स केन शुद्ध्यति ?

उत्तरं..............................................................

४. एकादशेऽहनि श्राद्धे ब्राह्मणो भुक्त्वा कीदृशं चान्द्रायणं चरेत् ?

उत्तरं..............................................................

## ९.१५. परिग्रहाभोज्यभोजने प्रायश्चित्तम् -

'यत्स्वरूपतोऽनिषिद्धोऽपि विशिष्टपुरुषस्वामिकतयाऽभोज्यं भण्यते तत्परिग्रहाशुचि ।' तत्र योगीश्वरेण- अदत्तान्यग्निहीनस्य नान्नमद्यादनापदि' इत्यारभ्य सार्धपञ्चभिः श्लोकैरभोज्यान्नाः

प्रतिपादिता:। मनुनापि त एव किञ्चिदधिका: प्रतिपादिता: 'नाश्रोत्रियतते यज्ञे ग्रामयाजिहुते तथा । स्त्रिया क्लीवेन च हुते भुञ्जीत ब्राह्मण: क्वचित् ।। मत्तक्रुद्धातुराणां च न भुञ्जीत कदाचन । गणान्नं गणिकान्नं च विदुषां च जुगुप्सितम् ।। स्तेनगायकयोश्चान्नं तक्ष्णो वार्धुषिकस्य च ।। दीक्षितस्य कदर्यस्य बद्धस्य निगिडस्य च । अभिशस्तस्य षण्ढस्य पुंश्चल्या दाम्भिकस्य च ।। चिकित्सकस्य मृगयो: क्रूरस्योच्छिष्टभोजिन: ।। उग्रान्नं सूतिकान्नं च पर्यायान्नमनिर्दशम् ।। अनर्चित्तं वृथामांसमवीरायाश्च योषित: । द्विषदन्नं नगर्यन्नं पतितान्नमवक्षुतम् ।। पिशुनानृतिनोश्चैव क्रतुविक्रयिणस्तथा ।। शैलूषतन्तुवायान्नं कृतघ्नस्यान्नमेव च ।। अत्र प्रायश्चित्तमाह - 'भुक्त्वातोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहम् । मत्या भुक्त्वा चरेत्कृच्छ्रं रेतो विण्मूत्रमेव च ।। गौतमेन पुन: 'उच्छिष्टपुंश्चल्यभिशस्ता' इत्यादिना अभोज्यान्पठित्वा 'प्राक्पञ्चनखेभ्यश्छर्दनं घृतप्राशनं च' इति प्रायश्चित्तमुक्तम्, तदापद्विषयम् । बलत्कारेण भोजने प्राजापत्येन विशोधनमेव । चान्द्रायणं त्वाहिताग्ने: पराकस्त्वथवा भवेत् । चान्द्रायणं पराकं च चरेत्संवत्सरोषित: । संवत्सरोषित: शूद्र: मासार्धं यावकं पिबेत् । मासमात्रोषित: शूद्र: कृच्छ्रपादेन शुद्ध्यति । ऊर्ध्वं संवत्सरात्कल्प्यं प्रायश्चित्तं द्विजोत्तमै: ।

## बोधप्रश्ना: -

१. अनापदि कस्यान्नं नाद्यात् ?

उत्तरं..........................................................

२. केषामन्नं कदाचन न भुञ्जीत ?

उत्तरं..........................................................

३. बलत्कारेण भोजने केन विशोधनम् ?

उत्तरं..........................................................

# ९.१६. जातिभ्रंशकरादीनां प्रायश्चित्तम् -

तत्र प्रायश्चित्तान्युच्यन्ते - तत्रादौ मनु: - जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया । चरेत्सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छया ।। संकरापात्रकृत्यासु मासं शोधनमैन्दवम् । मलिनीकरणीयेषु तप्त: स्याद्यावकस्त्र्यहम्।।' यमेनाप्यत्र विशेष: - संकरीकरणं कृत्वा मासमश्नाति यावकम् । कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं समाचरेत्।। अपात्रीकरणं कृत्वा सप्तकृच्छ्रेण शुद्ध्यति । शीतकृच्छ्रेण वा शुद्धिर्महासान्तपनेन च ।। मलिनीकरणीयेषु तप्तकृच्छ्रविशोधनम् ।

## बोधप्रश्ना: -

१. जातिभ्रंशकरं कर्म कृत्वा कीदृशं व्रतं चरेत् ?

उत्तरं.............................................................

२. संकरीकरणं कृत्वा कतिदिनानि यावकमश्नीयात् ?

उत्तरं.............................................................

३. अपात्रीकरणं कृत्वा कतिरात्रेण शुद्ध्यति ?

उत्तरं.............................................................

## ९.१७. प्रकीर्णकं प्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

प्राणायामी जले स्नात्वा खरयानोष्ट्रयानगः ।
नग्नः स्नात्वा च भुक्त्वा च गत्वा चैव दिवा स्त्रियम् ।। ३.२९०
गुरुं हुंकृत्य त्वंकृत्य विप्रं निर्जित्य वादतः ।
बध्वा वा वाससा क्षिप्रं प्रसाद्योपवसेद्दिनम् ।। ३.२९१

अर्थः सुष्पष्टः । अत पूर्वोक्तानि कर्माणि कृत्वा क्रोधत्यागपूर्वकं दिनमुपवसेत् । यत्तु यमेनोक्तम्- 'वादेन ब्राह्मणं जित्वा प्रायश्चित्तविधित्सया । त्रिरात्रोपषितः स्नात्वा प्रणिपत्य प्रसादयेत् ।।

किञ्च, याज्ञवल्क्येनोक्तम् -

विप्रदण्डोद्यमे कृच्छ्रत्वतिकृच्छ्रो निपातने ।
कृच्छ्रातिकृच्छ्रोऽसृक्पाते कृच्छ्रोऽभ्यन्तरशोणिते ।। ३.२९२

विप्रजिंघासया दण्डाद्युद्यमे कृच्छ्रः शुद्धिहेतुः, निपातने ताडनेऽतिकृच्छ्रः, असृक्पाते पुनः कृच्छ्रतिकृच्छ्रः, अभ्यन्तरशोणितेऽपि कृच्छ्रः शुद्धिहेतुः । बृहस्पतिनात्र विशेष उक्तः - 'काष्ठादिना ताडयित्वा त्वग्भेदे कृच्छ्रमाचरेत् । अस्थिभेदेऽतिकृच्छ्रः स्यात्पराकस्त्वङ्गकर्तने ।। मनुना त्वन्यानि प्रकीर्णप्रायश्चित्तानि उक्तानि - 'विनाद्भिरप्सु वाप्यार्तः शारीरं संनिषेव्य तु । सचैलो बर्हिराप्लुत्य गामलभ्य विशुद्ध्यति ।। इदमकामविषयम्। कामतस्तु - आपद्गतो विना तोयं शरीरं यो निषेवते । एकाहं क्षपणं कृत्वा सचैलो जलमाविशेत् ।। नित्यश्रौत्रादिकर्मलोपे मनुराह - वेदोदितानां नित्यानां कर्मणां समतिक्रमे। स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्।। स्नातकव्रतमधिकृत्य क्रतुनापि उक्तम् - 'एतेषामाचाराणामेकैकस्य व्यतिक्रमे गायत्र्यष्टशतं जपं कृत्वा पूतो भवति । पञ्चमहायज्ञाकरणे तु बृहस्पतिराह - अनिर्वर्त्य महायज्ञान् यो भुङ्क्ते प्रत्यहं गृही । अनातुरः सति धने कृच्छ्रार्धेन विशुद्ध्यति।। आहिताग्निरुपस्थानं न कुर्याद्यस्तु पर्वणि । ऋतौ न गच्छेद्भार्यां सोऽपि कृच्छ्रार्धमाचरेत् ।। अस्नानभोजनादौ हारीतः - 'बहन्कमण्डलुं रिक्तमस्नातोऽश्नंश्च भोजनम् । अहोरात्रेण शुद्धिः स्याद्दिनजप्येन चैव हि ।। पतितादिसंभाषणे

गौतमः - 'न म्लेच्छाशुच्यधार्मिकैः सह संभाषेत ।संभाष्य पुण्यकृतो मनसा ध्यायेत्।। नीलीविषये त्वापस्तम्ब आह - 'नीलीरक्तं यदा वस्त्रं ब्राह्मणोऽङ्गेषु धारयेत् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ।। रोमकूपैर्यदा गच्छेद्रसो नील्यास्तु कर्हिचित् । त्रिषु वर्णेषु सामान्यं तप्तकृच्छं विशोधनम्। क्वचिद्देशविशेषे गमनेऽपि देवल आह - 'सिन्धुसौवीरसौराष्ट्रांस्तथा प्रत्यन्तवासिनः । अङ्गवङ्गकलिङ्गान्ध्रान् गत्वा संस्कारमर्हति ।। समित्पुष्पादिहस्तस्याभिवादनेऽप्येतदेव - 'समित्पुष्पकुशाज्याम्बुमृदन्नाक्षतपाणिकम् । जपं होमं च कुर्वाणं नाभिवादेत वै द्विजम् ।। अभिवादकस्येदमेव प्रायश्चित्तम् - 'नोदकुम्भहस्तोऽभिवादयेत् न भैक्षं चरन्न पुष्पाज्यादिहस्तः नाशुचिर्न जपन्नदेवपितृकार्यं कुर्वन्न शयानः' इति ।

## बोधप्रश्नाः -

१. कानि कर्माणि कृत्वा क्रोधत्यागपूर्वकं दिनमुपवसेत् ?

उत्तरं..........................................................

२. विप्रजिंघासया दण्डाद्युद्यमे कः शुद्धिहेतुः ?

उत्तरं..........................................................

३. निपातने ताडेने च कः शुद्धिहेतुः ?

उत्तरं..........................................................

४. असृक्पाते कः शुद्धिहेतुः ?

उत्तरं..........................................................

## ९.१८. सारांशः -

प्रियपाठकाः ! अस्मिन् खण्डे नवमभागे मिथ्याभिशंसिनः अर्थवादो निर्णितः। । अभिशस्तप्रायश्चित्तं प्रतिपादितम् । अयाज्ययाजनप्रायश्चित्तमालोचितम् । असत्प्रतिग्रहे प्रायश्चित्तं निरूपितम् । जातिदुष्टसंधिन्यादिक्षीरपाने प्रायश्चित्तं निरूपितम् । स्वभावदुष्टमांसादिभक्षणे प्रायश्चित्तं प्रतिपादितम् । अशुद्धिसंस्पृष्टभक्षणे प्रायश्चित्तं निगदितम् ।अशुचिद्रव्यसंस्पृष्टभक्षणे प्रायश्चित्तमालोचितम् । भावदुष्टभक्षक्षे प्रायश्चित्तं विचारितम् । कालदुष्टभक्षणे प्रायश्चित्तं प्रतिपादितम् । गुणदुष्टशुक्तादिभक्षणे प्रायश्चित्तं निरूपितम्। हस्तदानादिक्रियादुष्टाभोज्यभक्षणे प्रायश्चित्तं उल्लिखितम् । परिग्रहाभोज्यभोजने प्रायश्चित्तं निरूपितम्। जातिभ्रंशकरादीनां प्रायश्चित्तमालोचितम् । प्रकीर्णकप्रायश्चित्तञ्चापि निरूपितम् ।

## ९.१९. पारिभाषिकशब्दाः -

विप्लवः - पर्वचाण्डालश्रोत्रावकाशाद्यनध्यायेष्वध्ययनम्

| | | |
|---|---|---|
| अहीनः | - | द्विरात्रादिर्द्वादशाहपर्यन्तोऽहर्गणयागः |
| कवकम् | - | राजसर्षपाख्यं शाकम् |
| नालिका नारिकाली च | - | शाकविशेषौ |
| कुणिः | - | हस्तविकलः |
| चान्द्रम् | - | चान्द्रायणम् |
| विलपनम् | - | घृतादिमलम् |

## ९.२०. आदर्शप्रश्नाः -

### निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः)

१. अभिशस्तप्रायश्चित्तं मिताक्षरादिशा प्रतिपादयत ।

२. आयाज्ययाजनप्रायश्चित्तं विज्ञानेश्वरमतानुसारमुल्लिखत ।

३. असत्प्रतिग्रहे प्रायश्चित्तं ग्रन्थोक्तदिशा निरूपयत ।

### विश्लेषणात्मकप्रश्नाः - (प्रत्येकं १२/१० अङ्काः)

१. जातिदुष्टसंधिन्यादिक्षीरपाने प्रायश्चित्तं लिखत ।

२. स्वभावदुष्टमांसादिभक्षणे प्रायश्चित्तमालोचयत ।

३. अशुद्धिसंस्पृष्टभक्षणे प्रायश्चित्तं विवेचयत ।

४. अशुचिद्रव्यसंस्पृष्टभक्षणे प्रायश्चित्तं लिखत ।

### लघुप्रश्नाः - (प्रत्येकं ५ अङ्काः)

१. भावदुष्टभक्षणे प्रायश्चित्तं संक्षेपेणोल्लिखत ।

२. कालदुष्टभक्षणे प्रायश्चित्तं लिखत ।

### एकाङ्कप्रश्नाः - (प्रत्येकं १ अङ्कः)

१. क्रियमाणे उपकारे कस्मिन् मृते न पातकम् ?

२. मिथ्याभिशंसिनः दोषः कतिगुणं भवति ?

३. अनियुक्तः भ्रातृजायां गच्छन् कीदृशं व्रतं चरेत् ?

४. उदक्यां गत्वा किं प्राश्य विशुध्यति ?

५. व्रात्ययाजकः कतिकृच्छ्रान् चरेत् ?

६. वेदप्लावी कतिकालं यवाशी स्यात् ?

७. असत्प्रतिग्रहकारी कुत्र वसन् पयोव्रतं कुर्यात् ?

## ९.२१. एकाङ्कप्रश्नानामुत्तराणि -

१. विप्रे, २. द्विगुणं, ३. चान्द्रायणम्, ४. घृतम्, ५. त्रीन्, ६. अब्दम्, ७. गोष्ठे

# द्वितीयखण्ड:

## दशमभाग:, ( Unit - X)

## (प्रायश्चित्तप्रकरणस्य प्रायश्चित्तविषये देशकालादिविषयमारभ्य ग्रन्थसमाप्तिं यावत्)

### १०.१. प्रस्तावना -

अस्मिन् खण्डे दशमभागे सामान्यतयोपदिष्टानुपदिष्टविषये प्रायश्चित्तम्, पतितपरित्यागादि-विधेरतिदेश:, पतितापरित्यागविधि:, चरित्रव्रतविधि, सकलव्रतसाधारणधर्म:, सकलरहस्यव्रतसाधारणधर्म:, ब्रह्महत्यादिक्रमेण रहस्यप्रायश्चित्तानि, गोबधादिषटपञ्चाशदुपपातकप्रायश्चित्तम्, अज्ञानकृते प्रकीर्णके मानसे चोपपातके प्रायश्चित्तम्, सकलमहापातकादिसाधरणपवित्रमन्त्रा:, सकलप्रकाशरहस्यव्रताङ्गभूतधर्मा:, सान्तपनाख्यं व्रतम्, महासान्तपनाख्यं कृच्छ्रम्, पर्णकृच्छ्रख्यं व्रतम्, तत्पकृच्छ्रम्, पादकृच्छ्रम्, प्राजापत्यं कृच्छ्रम्, अतिकृच्छ्रम्, कृच्छ्रातिकृच्छ्रम्, पराककृच्छ्रम्, सौम्यकृच्छम्, तुलापुरुषख्यं कृच्छम्, चान्द्रायणञ्चैते विषया आलोचिता: ।

### १०.२. उद्देश्यम् -

प्रियपाठका: ! अस्मिन् खण्डे दशमभागे भवन्त: अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- सामान्यतयोपदिष्टानुपदिष्टविषये प्रायश्चित्तं निरूपयिष्यन्ति ।
- पतितपरित्यागादिविधेरतिदेशमालोचयिष्यन्ति ।
- पतितापरित्यागविधिं प्रतिपादयिष्यन्ति ।
- चरितव्रतविधिविषयेऽऽलोचयिष्यन्ति ।
- सकलव्रतसाधारणधर्मं प्रतिपादयिष्यन्ति ।
- सकलरहस्यव्रतसाधरणधर्मं निरूपयिष्यन्ति ।
- ब्रह्महत्यादिक्रमेण रहस्यप्रायश्चित्तानि निरूपयिष्यन्ति ।
- गोवधादिषट्पञ्चाशदुपपातकप्रायश्चित्तं विवेचयिष्यन्ति ।
- अज्ञानकृते प्रकीर्णके मानसे चोपपातके प्रायश्चित्तं निरूपयिष्यन्ति ।
- सकलमहापातकादिसाधारणपवित्रमन्त्रान् निरूपयिष्यन्ति ।

- सकलप्रकाशरहस्यव्रताङ्गभूतधर्मान् प्रतिपादयिष्यन्ति ।
- सान्तपनाख्यं व्रतं निर्णेष्यन्ति ।
- महासान्तपनाख्यं कृच्छ्रमालोचयिष्यन्ति ।
- पर्णकृच्छ्राख्यं व्रतं लेखिष्यन्ति ।
- तप्तकृच्छ्रं निरूपयिष्यन्ति ।
- पादकृच्छ्रमालोचयिष्यन्ति ।
- प्राजापत्यं कृच्छ्रं प्रतिपादयिष्यन्ति ।
- अतिकृच्छ्रं निरूपयिष्यन्ति ।
- कृच्छ्रातिकृच्छ्रं विवेचयिष्यन्ति ।
- पराककृच्छ्रमालोचयिष्यन्ति ।
- सौम्यकृच्छ्रं निरूपयिष्यन्ति ।
- तुलापुरुषाख्यं कृच्छ्रं निरूपयिष्यन्ति ।
- चान्द्रायणं प्रतिपादयिष्यन्ति ।

## १०.३. सामान्यतयोपदिष्टानुपदिष्टविषये प्रायश्चित्तम् -

यथोक्तम् -

देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः ।
प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिः ।। ३.२९३

यदुक्तं प्रायश्चित्तजातं वक्ष्यमाणं वा तद्देशादिकमवेक्ष्य यथा कर्तुः प्राणविपत्तिर्न भवति तथा विषयविशेषे कल्पनीयम्; इतरथा प्रधाननिवृत्तिप्रसङ्गात् । तथा च वक्ष्यति - 'वायुभक्षो दिवा तिष्ठन् रात्रिं नीत्वाप्सु सूर्यदृक्' इति, तत्र यदि हिमवद्गिरिनिकटवर्त्तिनामुदकवास उपदिश्यते अतिशीताकुलिते वा द्वादशाब्दिकं प्रायश्चित्तमुपदिश्यते तदा 'प्राणा विपद्येरन्' इति ततोऽन्यवयस्के तत्प्रायश्चित्तं कल्प्यम्। तथा धनदानतपश्चरणादिशक्त्यपेक्षया च न हि निर्धनस्य पात्रे धनं वा पर्याप्तमित्युपपद्यते । तथोद्रिक्तपित्तादेर्वा पराकादिकं नापि स्त्रीशूद्रादेर्जपादिकम् । पापं च महापातकादिरूपेण सप्रत्ययाप्रत्ययसकृदभ्यासादिरूपेण चावेक्ष्य यत्नतः सकलधर्मशास्त्रपर्यालोचनया प्रायश्चित्तं कल्पनीयम् । सर्वत्र देशकालाद्यपेक्षया प्रायश्चित्तं कल्प्यम् । ननु किंचिदपि निमित्तजातमनूक्तनिष्कृतिकमुपलभ्यते, प्राणायामशतं कार्यं सर्वपापापनुत्तये। उपपातकजातानामनादिष्टस्य चैव हि ।। गौतमेनाप्युच्यते - सत्यमस्त्येव सामान्यतः प्रायश्चित्तोपदेशस्तथापि सर्वत्र देशकालादीनामपेक्षितत्वादस्त्येव कल्पनावसरः । न च सर्वत्र

प्राणायामशतं युक्तम्, निमित्तस्य लघुत्वात्। अतः पापापेक्षया ह्रासः कल्पनीयः प्रायश्चित्तान्तरं वा ।

एवं महापातकादिभिः पतितस्य प्रायश्चित्तमुक्त्वा यस्तु औद्धत्यादेतत् न चिकीर्षति तस्य किं कार्यमित्युक्ते याज्ञवल्क्य आह -

दासीकुम्भं बहिर्ग्रामान्निनयेरन्स्वबान्धवाः ।
पतितस्य बहिः कुर्युः सर्वकार्येषु चैव तम् ।। ३.२९४

जीवत एव पतितस्य ये स्वा ज्ञातय पितृमातृपक्षाः ते सर्वे संनिपत्य दासी प्रेष्या तया सपिण्डादिप्रेषितया आनीतम् अपां पूर्णं घटं ग्रामाद्बहिर्निनयेयुः । एतच्चतुर्थ्यादिरिक्तातिथिष्वह्नः पञ्चमे भागे गुर्वादिसंनिधौ कार्यम्। 'पतितस्योदकं कार्यं सपिण्डैर्बान्धिवैर्बहिः । निन्दितेऽहनि सायाह्ने ज्ञात्यृत्यिगुरुसन्निधौ ।। इति मनुस्मरणात् । एतच्च निनयनं उदकपिण्डदानादिप्रेतक्रियोत्तरकालं द्रष्टव्यम्। 'तस्य विद्यागुरुयोनिसंबन्धाश्च संनिपात्य सर्वाप्युदकादीनि प्रेतकर्माणि कुर्युः, पात्रं चास्य विपर्यस्येयुः । दासः अवकरात् पात्रमानीय दासीघटान् पूरयित्वा दक्षिणाभिमुखः पदा विपर्यस्येदिदम् । अमुमनुदकं करोमि इति नामग्राहं तं सर्वेऽन्वालभेरन् प्राचीनावीतिनो मुक्तशिखा विद्यागुरवो योनिसंबन्धाश्च अप उपस्पृश्य ग्रामं प्रविशेयुः । अयं च त्याग यदि बन्धुभिः प्रेर्यमाणोऽपि प्रायश्चित्तं न करोति तदा द्रष्टव्यः । तं लब्धोदकं पतितं सर्वकार्येषु बर्हिः कुर्युः ।

कृतप्रायश्चिते बन्धुसमीपं पुनरायते तत्सपिण्डाद्यास्तेन सहिता नवम् अनुपहतं घटं निनयेयुः । एतच्च निनयनं पुण्यह्रदादिस्नानोत्तरकालं द्रष्टव्यम् । गौतमेन तु विशेष उक्तः - 'यस्तु प्रायश्चित्तेन शुद्ध्येत्तस्मिन्शुद्धे शातकुम्भमयं पात्रं पुण्यतमाद् ह्रदात्पूरयित्वा स्रवन्तीभ्यो वा, तत एनमप उपस्पृशेयुः, अथ अस्मै तत्पात्रं दद्युस्तत्संप्रतिगृह्य जपेत् 'शान्ता द्यौः शान्ता पृथिवी शान्तं शिवमन्तरिक्षं वो रोचनस्तमिह गृह्णामि' इत्येतैः यजुर्भिः कुष्माण्डैः श्चाज्यैः जुहुयाद्धिरण्यं दद्याद्गां चाचार्याय । यस्य तु प्राणान्तिकं प्रायश्चित्तं स मृतः शुद्ध्येदेतदेव शान्त्युदकं सर्वेषूपपातकेषु । ततः एनं कृतप्रायश्चित्तं ते नैव कुत्सयेयुः । तथा सर्वकार्ये तेन सह संव्यवहरेयुः।

## बोधप्रश्नाः -

१. कथं प्रायश्चित्तं प्रकल्प्यम् ?

उत्तरं.............................................................

२. किं चावेक्ष्य यत्नतः प्रायश्चित्तं कल्पनीयम् ?

उत्तरं.............................................................

३. पतितस्य प्रायश्चित्तकर्म कुत्र कुर्युः ?

उत्तरं.............................................................

४. यस्य प्राणान्तिकं प्रायश्चित्तं सः कथं शुद्ध्येत् ?

उत्तरं.............................................................

## १०.४. पतितपरित्यागादिविधेरतिदेशविचारः -

यथोक्तं याज्ञवल्क्येन -

पतितानामेष एव विधिः स्त्रीणां प्रकर्तितः ।
वासो गृहान्तिके देयमन्तं वासः सरक्षणम् ।। ३.२९६

एष एव पुरुषाणां परित्यागे पिण्डोदकदानादिविधिः कृतप्रायश्चित्तानां परिगृहविधिश्च स एव पतितानां स्त्रीणामपि वेदितव्यः । इयांस्तु विशेषः - पतिताभ्योऽपि ताभ्यः कृतोदकादिकृतकर्मभ्यो वासस्तृणपर्णमयं कुटीगृहकं प्रधानगृहसमीपे देयम् । तथा प्राणधारणमात्रमन्नं मलिनं च वस्त्रं पुनः पुरुषान्तरोपभोगनिवारणसहितं सतिरस्कारं देयम् ।

## बोधप्रश्नौ: -

१. पतितानां स्त्रीणां क एव विधिः वेदितव्यः ?

उत्तरं.............................................................

२. पतितानां कृते गृहं कुत्र देयम् ?

उत्तरं.............................................................

## १०.५. पतितापरित्यागविधिः -

यथोक्तं याज्ञवल्क्येन -

नीचाभिगमनं गर्भपातनं भर्तृहिंसनम् ।
विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवम् ।। ३.२९७

हीनवर्णगमनं गर्भपातनमब्राह्मण्या अपि भर्तुः अब्राह्मणस्यापि हिंसनमित्येतानि स्त्रीणामसाधारणानि पतननिमित्तानि । 'अपि' शब्दात्पुरुषस्य यानि पतननिमितानि महापातकातिपातकानुपातकान्यभ्यस्तानि चोपपातकादीनि तान्यपि स्त्रीणां पतनकारणानि भवन्ति । यत्तु वसिष्ठेनोक्तम् - त्रीणि स्त्रियाः पातकानि लोके धर्मविदो विदुः । भर्तुर्वधो भ्रुणहत्या स्वस्य गर्भस्य पातनम् ।। यद्यपि तेनैव - चतस्रस्तु परित्याज्याः शिष्यगा गुरगा च या । पतिघ्नी च विशेषेण जुङ्गितोपगता च या ।। इति । अतश्चान्यासां पतितानां प्रायश्चित्तमकुर्वतीनामपि 'वासो गृहान्तिके देय' मित्यादिकं कर्तव्यमित्यवगम्यते ।

'जुगुप्सेरन्न चाप्येनं संविशेयुश्च सर्वशः' इत्यस्यापवादमाह -

शरणागतबालस्त्रीहिंसकान् संवसेन्न तु ।
चीर्णव्रतानपि सतः कृतघ्नसहितानिमान् ।। ३.२९८

शरणागतादिव्यापादनकारिणः कृतघ्नसहितान् प्रायश्चित्तेन क्षीणदोषानपि न संव्यवहरेदिति वाचनिकोऽयं प्रतिषेधः । अतः यद्यपि व्यभिचारिणीनां वधेऽल्पीय एव प्रायश्चित्तं, तथापि वाचनिकोऽयं संव्यवहारप्रतिषेधः ।

## बोधप्रश्नाः -

१. स्त्रीणां पतनीयानि कानि ?

उत्तरं.........................................................

२. स्त्रीणां पतनीयानि कति ?

उत्तरं.........................................................

३. कति स्त्रियः परित्याज्याः ?

उत्तरं.........................................................

४. प्रायश्चित्तमकुर्वतीनां पतितानां वासः कुत्र देयम् ?

उत्तरं.........................................................

# १०.६. चरितव्रतविविधौ विशेषविचारः -

यथोक्तं याज्ञवल्क्येन -

घटेऽपवर्जिते ज्ञातिमध्यस्थो यवसं गवाम् ।
स दद्यात्प्रथमं गोभिः सत्कृतस्य हि सत्क्रिया ।। ३.२९९

घटेऽपवर्जिते ह्रदादुद्धृत्य पूर्णे कुम्भेऽवनिनीते असौ चरितव्रतः सपिण्डादिमध्यस्थो गोभ्यो यवसं दद्यात्। ताभिः प्रथमं सत्कृतस्य पूजितस्य पश्चाज्ज्ञातिभिः सत्क्रिया कार्या । गोभिश्च तस्य सत्कारस्तद्दत्तयवसभक्षणमेव। यदि गावस्तद्दत्तं यवसो न गृह्णीयुः तर्हि: पुनः प्रायश्चित्तमनुतिष्ठेत् । यदाह हारीतः - स्वशिरसा यवसमादाय गोभ्यो दद्याद्यदि ताः प्रतिगृह्णीयुरथैनं प्रवर्तयेयुः' इति ।

## बोधप्रश्नाः -

१. चरितव्रतः काभ्यः यवसं दद्यात् ?

उत्तरं.........................................................

२. चरितवतस्य सत्कारः काभिः सह विधेयः ?

उत्तरं..........................................................

३. चरितव्रतस्य सत्कारः किम् ?

उत्तरं..........................................................

## १०.७. सकलव्रतसाधारणधर्मः -

यथोक्तं विषयेऽस्मिन् याज्ञवल्क्येन -

'विख्यातदोषः कुर्वीत पर्षदोऽनुमतं व्रतम्' । अर्थाद् यो दोषो यावत्कर्तृसंपाद्यस्ततोऽन्यैर्विख्यातः विज्ञातो दोषो यस्यासौ पर्षदुपदिष्टव्रतं कुर्यात् । यद्यपि स्वयं सकलशास्त्रार्थविचारचतुरः तथापि पर्षत्समीपमुपगम्य तया सह विचार्य तदनुमतमेव कुर्यात् । तदुपगमने चाङ्गिरसा विशेष उक्तः - 'कृते निःसंशये पापे न भुञ्जीतानुपस्थितः । भुञ्जानो वर्धयेत्पापं यावन्नाख्याति पर्षदि ।। सचैलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः। पर्षद्नुमतस्तत्त्वं सर्वं विख्यापयेन्नरः ।। व्रतमादाय भूयोऽपि तथा स्नात्वा व्रतं चरेत् ।। इति। विख्यापनञ्च पर्षदक्षिणादानानन्तरं कार्यम् । यथाह पराशरः - 'पापं विख्यापयेत्पापी दत्त्वा धेनुं तथा वृषम्' इति । एतच्चोपपातकविषयम् । महापातकादिषु अधिकं कल्प्यम् । यत्तूक्तम् - 'तस्माद् द्विजः प्राप्तपापः सकृदाप्लुत्य वारिणि । विख्याप्य पापं पर्षद्भ्यः किञ्चिद्दत्त्वा व्रतं चरेत् ।। इति तत्प्रकीर्णकविषयम् । पर्षत्स्वरूपं च मनुना दर्शितम् - 'त्रैविद्यो हेतुकस्तर्की नैरूक्ते धर्मपाठकः । त्रयश्चाश्रमिणः पूर्वे पर्षदेषा दशावरा ।। तथा च मनुः - 'एकोऽपि धर्मविद्धर्मं यं व्यवस्येत्समाहितः । स ज्ञेयः परमो धर्मो नाज्ञानामुदितोऽयुतैः ।। आसां च पर्षदां संभवापेक्षया व्यवस्था महापातकाद्यपेक्षया । यत्तु स्मृत्यन्तरे - 'पातकेषु शतं पर्षत्सहस्रं महदादिषु । उपपापेषु पञ्चाशत्स्वल्पं स्वल्पे तथा भवेत् ।। तथा पर्षदा ज्ञात्वैव व्रतमुपदेष्टव्यम् - 'अज्ञात्वा धर्मशास्त्राणि प्रायश्चित्तं ददाति यः। प्रायश्चित्ती भवेत्पूतः किल्बिषं पर्षदं व्रजेत् ।।

## बोधप्रश्नाः -

१. कः पर्षदुपदिष्टं व्रतं कुर्यात् ?

उत्तरं..........................................................

२. नरः कथं सर्वं पापं विख्यापयेत् ?

उत्तरं..........................................................

३. विख्यातदोषेण प्रख्यापनं कदा कार्यम् ?

उत्तरं..........................................................

४. पर्षद: लक्षणं किम् ?

उत्तरं..........................................................

५. परमो धर्म: क: ?

उत्तरं..........................................................

## १०.८. सकलरहस्यव्रतसाधारणधर्म: -

यथोक्तं याज्ञवल्क्येन - अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेत् ।। ३.३००

कर्तृव्यतिरिक्तैरनभिख्यातो दोषो यस्यासौ रहस्यमप्रकाशं प्रायश्चित्तमनुतिष्ठेत् । अत: स्त्रीसंभोगादौ तस्या अपि कारकत्वात् तदितरै: अविज्ञातदोषस्य रहस्यव्रतमिति मन्तव्यम् । तत्र यदि कर्ता स्वयं धर्मशास्त्रकुशल: तदा परस्मिन्नविभाव्य स्वनिमित्तोचितं प्रायश्चित्तमनुतिष्टेत् । यस्तु स्वयमनभिज्ञोऽसौ केनचिद्रहो ब्रह्महत्यादिकं कृतं तत्र किं रहस्यप्रायश्चित्तमित्यन्यव्याजेनावगम्य रहोव्रतमनुतिष्ठेत् । अत एव स्त्रीशूद्रयोरप्यमुनैव मार्गेण रहस्यव्रतज्ञानसिद्धेरधिकारसिद्धि: । न च वाक्यं रहस्यव्रतानां जपादिप्रधानत्वादविद्ययोश्च स्त्रीशूद्रयो: तदनुपपत्तेरनधिकार इति । देवतादिपरिज्ञानमवश्यमपेक्षणीयम्; 'अविदित्वा ऋषिं छन्दो दैवतं यागमेव च । योऽध्यापयेज्जपेद्वापि पापीयाञ्जायते तु स: ।। इति व्यासस्मरणात्। अत्रापि आहारविशेषानुक्तौ पय: प्रभृतय:, कालविशेषानुक्तौ संवत्सरादय: अन्येषणीया:।

### बोधप्रश्ना: -

१. क: रहस्यं व्रतमाचरेत् ?

उत्तरं..........................................................

२. कर्त्ता धर्मशास्त्रकुशलश्चेत्कीदृशं व्रतमाचरेत् ?

उत्तरं..........................................................

३. रहस्यव्रतेषु स्त्रीशूद्रयोरनधिकार: कथम् ?

उत्तरं..........................................................

## १०.९. ब्रह्महत्यादिक्रमेण रहस्यप्रायश्चित्तानि -

### १०.९.१. ब्रह्महत्याप्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

त्रिरात्रोपोषितो जप्त्वा ब्रह्महा त्वघमर्षणम् ।
अन्तर्जले विशुध्येत दत्त्वा गां च पयस्विनीम् ।। ३.३०१

त्रिरात्रमुपोषितोऽन्तर्जलेऽघमर्षणेन महर्षिणा दृष्टं सूक्तं अघमर्षणं 'ऋतं च सत्यं च' इति ऋचमानुष्टुभं भाववृत्तदेवताकं जप्त्वा त्रिरात्रान्ते पयस्विनीं गां दत्वा ब्रह्महा विशुध्यति । जपश्चान्तर्जले निमग्नेन त्रिरावर्त्तनीयः। यथाह सुमन्तुः - 'देवद्विजगुरुहन्ताप्सु निमग्नोऽघमर्षणं सूक्तं त्रिरावर्त्तयेत् । मातरं भगिनीं गत्वा मातृस्वसारं स्नुषां सखीं वाऽन्यद्वाऽगम्यागमनं कृत्वाऽघमर्षणमेवान्तर्जले त्रिरावर्त्य तदेतस्मात्पूतो भवति' इति । एतच्चाकामकारविषयम् । यत्तु मनुनोक्तं - 'सव्याहृतिप्रणवकाः प्राणायमास्तु षोडश । अपि भ्रूणहणं मासात्पुनन्त्यहरहः कृताः ।। यत्तु गौतमेन षड्त्रिंशद्रात्रव्रतमुक्त्वोक्तम् - 'तदव्रत एव ब्रह्महत्यासुरापानसुवर्णस्तेयगुरूतल्पेषु प्राणायामैः स्नातोऽघमर्षणं जपेत् ' इति - तदकामतः सकृद्वधविषयम्। यत्तु मनुनोक्तम् - 'अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहिताम् । मुच्यते पातकैः सर्वैः पराकैः शोधितस्त्रिभिः।। तत्कामतः श्रोत्रियादिवधविषयम् । बृहद्विष्णुनोक्तम् - ब्रह्महत्यां कृत्वा ग्रामात्प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य प्रभृतेन्धनेनाग्निं प्रज्वाल्य अघमर्षणेन अष्टसहस्राज्याहुतीर्जुहुयात्तत एतस्मात्पूतो भवति । यत्तु यमेन उक्तम् - त्र्यहं तूपवसेद्युक्तस्त्रिरह्नोऽभ्युपयन्नपः । मुच्यते पातकैः सर्वैर्जपित्वाघमर्षणम् ।।

प्रायश्चित्तान्तरम् -

लोमभ्यः स्वाहेत्यथवा दिवसं मारुताशनः ।
जले स्थित्वाऽभिजुहुयाच्चत्वारिंशद्घृताहुतीः ।। ३.३०२

अथवा अहोरात्रमुपोषितो रात्रावुदके वासं कृत्वा प्रातः जलादुत्तीर्य 'लोभभ्यः स्वाहा' इत्याद्यैरष्टभिः मन्त्रैरेकैकेन पञ्चपञ्चाहुतय इत्येवं चत्वारिंशद्घृताहुतीः जुहुयात् ।

## बोधप्रश्नाः -

१. ब्रह्महा कीदृशीं गां दत्वा विशुध्यति ?

उत्तरं.............................................................

२. ब्रह्महत्याकारी कतिरात्रमुपोष्य किं जप्त्वा विशुध्यति ?

उत्तरं.............................................................

३. ब्रह्महा कुत्र जप्त्वा विशुद्ध्यति ?

उत्तरं.............................................................

४. ब्रह्महा जले स्थित्वा कतिघृताहुतीः जुहुयात् ?

उत्तरं.............................................................

## १०.९.२. सुरापानप्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

'त्रिरात्रोपोषितो हुत्वा कुष्माण्डीभिर्घृतं शुचि: ।'

सुराप: चत्वारिंशद्धताहुतीरित्यनुवर्त्तते । त्रिरात्रमुपोषित: कूष्माण्डीभि: 'यद्देवा देवहेलनम्' इत्यादिभि: कूष्माण्डदृष्टाभिरनुष्टुब्भिर्मन्त्रलिङ्गदेवताभि: ऋग्भि: चत्वारिंशद्धताहुतीर्हुत्वा शुचिर्भवेत् । तथा वौधायनेनाप्युक्तम् - 'अथ कूष्माण्डीभिर्जुहुयाद्योऽपूत एवात्मानं मन्येत यावदर्वाचीनमेनो भ्रूणहत्याया: तस्मान्मुच्यते । यत्तु मनुना - 'कौत्सं जप्त्वाप इत्येत् वासिष्ठं च प्रतीत्यृचम् । माहित्रं शुद्धवत्यश्च सुरापोऽपि विशुद्धयति ।। एतच्चाकामत: पैष्ट्या: सकृत्पाने । गौडीमाध्योस्तु पानावृत्तौ च वेदितव्यम् । यत्तु महापातकसंयुक्तोऽनुगच्छेद्गा: समाहित: । अभ्यस्याब्दं पावमानीभैक्षाहारो विशुद्ध्यति ।

**बोधप्रश्ना: -**

१. सुराप: कति आहुती: हुत्वा विशुध्यति ?

उत्तरं..........................................................................

२. सुराप: कतिरात्रमुपोष्य काभि: हुत्वा विशुध्यति ?

उत्तरं..........................................................................

३. योऽपूत एवात्मानं मन्यते स काभि: जुहुयात् ?

उत्तरं..........................................................................

## १०.९.३. सुवर्णस्तेयप्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

'ब्राह्मणस्वर्णहारी तु रुद्रजापी जलेस्थित: ।।' ३.३०३

ब्राह्मण: स्वर्णहारी पुनस्त्रिरात्रोपोषित: जलमध्यस्थ: 'नमस्ते रुद्रमन्यव' इति शतरुद्रियजपयुक्त: शुध्यतीति । शातातपेनात्र विशेष उक्त: - मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा। भस्माच्छन्नो भस्मशय्यां शयान: रुद्राध्यायी मुच्यते सर्वपापै: ।। इति । जपश्चैकादशकृत्व: कार्य: । एकादशगुणान्वापि रुद्रानावर्त्य धर्मवित् । महापापैरपि स्पृष्टो मुच्यते नात्र शंसय: ।। इत्यत्रिस्मरणात् । यत्तु मनुना - 'सकृज्जप्त्वाऽस्य वामीयं शिवसंकल्पमेव च । सुवर्णमपहृत्यापि क्षणाद्भवति निर्मल: ।। तथा 'यंज्जागृतो दूरमुदैति दैवम्' इति शिवसंकल्पदृष्टस्य षडऋचस्य वा सकृज्जप उक्त: सोऽत्यन्तनिर्गुणस्वामिकस्वर्णहरणे गुणवतोऽपहर्तुर्द्रष्टव्य:। सुवर्णन्यूनपरिमाणविषय: अनुग्राहकप्रयोजकविषयो वा ।

**बोधप्रश्ना: -**

१.   सुवर्णहारी कतिदिनान्युपोष्य कूष्मणमन्त्रजपपूर्वकं शुध्यति ?

उत्तरं.........................................................................

२.   ब्राह्मणास्वर्णहारी कुत्र स्थित: रुद्रजापी मुच्यते ?

उत्तरं.........................................................................

३.   क: सर्वपापै: मुच्यते ?

उत्तरं.........................................................................

## १०.९.४. गुरुतल्पगप्रायश्चित्तम् -

यथोक्तं याज्ञवल्क्येन -

सहस्रशीर्षाजापी तु मुच्यते गुरुतल्पग: ।
गौर्देया कर्मणोऽस्यान्ते पृथगेभि: पयस्विनी ।। ३.३०४

गुरुतल्पगस्तु 'सहस्रशीर्षा इति षोडशर्चसूक्तं नारायणदृष्टं पुरुषदैवत्यमानुष्टुभं त्रिष्टुबन्तं जपंस्तस्मात्पापान्मुच्यते । सहस्रशीर्षाजापीति ताच्छील्यप्रत्ययादावृत्तिर्गम्यते । अत एव मनुनोक्तम् - 'पुरुषं सूक्तमावर्त्य मुच्यते सर्वकिल्विषात्' इति । आवृतौ च संख्यापेक्षायामधस्तनश्लोकगता चत्वारिंशत्संख्याऽनुमीयते। अत एव बृहद्विष्णु: - 'त्रिरात्रोपोषित: पुरुषसूक्तजपहोमाभ्यां गुरुतल्पग: शुद्धयेत्' इति । एभिश्च सुरापसुवर्णस्तेनगुरुतल्पगैस्त्रिभि: पृथक्पृथगस्य त्रिरात्रव्रतस्यान्ते बहुक्षीरा गौर्देया। इदमकामविषयम्। यत्तु मनुना - 'हविष्पान्तीयमभ्यस्य मतमंह इतीति च । जप्त्वा तु पौरुषं सूक्तं मुच्यते गुरुतल्पग: ।। सोऽपि अकामविषय एव । कामतस्तु 'मन्त्रै: शाकलहौमीयै:' इति मनूक्तं द्रष्टव्यम् । षडत्रिंशन्मतेऽभिहितम् - महाव्याहृतिभिर्होमस्तिलै: कार्यो द्विजन्मनो । उपपातकशुद्ध्यर्थं सहस्रपरिसंख्यया ।। महापातकसंयुक्तो लक्षहोमेन शुद्ध्यति । यानि पुन: गुरुतल्पातिदेशविषयाणि तत्समानि वाऽतिपातकोपपातकपदाभिधेयानि, तेषु तुरीयांशन्यूनमर्धोनं च क्रमेण वेदितव्यम् । पातकातिपातकोपपातकमहापातकानामेकतमे संनिपाते वा अघमर्षणमेव त्रिर्जपेदिति हारीतोक्तं वा द्रष्टव्यम् ।

## बोधप्रश्ना: -

१.   कीदृश: गुरुतल्पग: मुच्यते ?

उत्तरं.........................................................................

२.   गुरुतल्पप्रायश्चित्तान्ते का देया ?

उत्तरं.........................................................................

३. किं सूक्तमावृत्य मुच्यते सर्वकिल्बिषात् ?

उत्तरं...........................................................

## १०.१०. गोवधादिषट्पञ्चाशदुपपातकप्रायश्चित्तम् -

यथोक्तं याज्ञवलक्येन -

प्राणायामशतं कार्यं सर्वपापापनुत्तये ।
उपपातकजातानामनादिष्टस्य चैव हि ।। ३.३०५

गोवधादिषट्पञ्चाशदुपपातकजातानामनादिष्टरहस्यव्रतानां च जातिभ्रंशकरादीनां सर्वेषामपनुत्तये प्राणायामानां शतं कार्यम् । तथा सर्वेषां महापाताकादीनां प्रकीर्णकान्तानामप्यपनुत्तये प्राणायामाः कार्याः । तत्र महापातकेषु चतुःशतम्, अतिपातकेषु त्रिशतम्, अनुपातकेषु द्विशतमिति संख्याविवृद्धिः कल्पनीया। प्रकाशप्रायश्चित्तेषु महापातकप्रायश्चित्ततुरीयांशस्योपपातकेषु विधानदर्शनात् प्रकीर्णकेषु च ह्रासः कल्प्यः । अत एवोक्तं यमेन - 'दशप्रणवसंयुक्तैः प्राणायामैः चतुःशतैः । मुच्यते ब्रह्महत्यायाः किं पुनः शेषपातकैः ।। बौधायनेनाप्यत्र विशेष उक्तः - 'अपि वाक्चक्षुः श्रोत्रत्वग्घ्राणमनोव्यतिक्रमेषु त्रिभिः प्राणायामैः शुद्ध्यति। शूद्रस्त्रीगमनान्नभोजनेषु पृथक्पृथक् सप्ताहं सप्तप्राणायामान् धारयेत् । अभक्षाभोज्यामेध्यप्राशनेषु तथा चापण्यविक्रयेषु मधुमांसघृततैललाक्षालवणरसान्नवर्जितेषु यच्चान्यदपि एवं युक्तं स्याद् द्वादशाहं द्वादश प्राणायामान्धारयेत् । अथ पातकेषु संवत्सरं द्वादश द्वादश प्राणायामान् धारयेदिति । 'अभक्ष्याभोज्ये' चतुःचत्वारिंशदधिकशतप्राणायमा विशेषाभिप्रायाः । उपपातकानुपातकाभिप्रायः षष्ट्यधिकद्विशतसहितद्विसहस्रसंख्यकाः । यत्तु मनुः - 'एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनम् । अवेत्यृचं जपेदब्दं यत्किंचेदमितीति वा ।।

## बोधप्रश्नाः -

१. सर्वपापापनुत्तये प्राणायामानां कति कार्यम् ?

उत्तरं...........................................................

२. केषामपनुत्तये प्राणायामाः कार्याः ?

उत्तरं...........................................................

३. अनुपातकेषु प्राणायामानां कतिसंख्या विवृद्धिः कल्पनीया ?

उत्तरं...........................................................

## १०.१०.१. उपपातकसामान्यप्राप्तस्य प्राणायमशतस्यापवादः

-

यथोक्तं याज्ञवल्क्येन -

ओङ्काराभिष्टुतं सोमसलिलं पावनं पिबेत् ।

कृत्वा हि रेतोविण्मूत्रप्राशनं तु द्विजोत्तमः ।। ३.३०६

द्विजो रेतोविण्मूत्रप्राशनं कृत्वा सोमलतारसमोङ्काराभिमन्त्रितं शुद्धिसाधनं पिबेत् ।

**बोधप्रश्नः -**

१. द्विजः रतोविणमूत्रप्राशनं कृत्वा कीदृशं शुद्धिसाधनं पिबेत् ?

उत्तरं.............................................................

## १०.११. अज्ञानकृते प्रकीर्णके मानसे चोपपातके प्रायश्चित्तम्

-

रजन्यां वासरे वा यत्प्रमादादिकृतं प्रकीर्णकं मानसं वाचिकं चोपपातकं तत्सर्वं प्रातर्मध्याह्नादिकालत्रयविहितनित्यसंध्योपासनया प्रणस्यति । तथा च यमः यदह्नात्कुरुते पापं कर्मणा मनसा गिरा । आसीनः पश्चिमां संध्यां प्राणायमैर्निहन्ति तत् ।। शातापतेनाप्युक्तम् - 'अनृतं मद्यगन्धं च दिवा मैथुनमेव च । पुनाति वृषलान्नं च संध्या बहिरुपासिता ।। याज्ञवल्क्यः -

निशायां वा दिवा वापि यदज्ञानं कृतं भवेत् ।

त्रैकाल्यसंध्याकरणात्तत्सर्वं विप्रणस्यति ।। ३.३०७

**बोधप्रश्नः -**

१. रजन्यां वासरे वा प्रमादकृतं पापं कया प्रणस्यति ?

उत्तरं.............................................................

## १०.१२. सकलमहापातकादिसाधारणपवित्रमन्त्राः -

यथोक्तं याज्ञवल्क्येन -

शुक्रियारण्यकजपो गायत्र्याश्च विशेषतः ।

सर्वपापहरा ह्येते रुद्रैकादशिनी तथा ।। ३.३०८

शुक्रियं नाम आरण्यकविशेषः 'विश्वानि देव सवितः' इत्यादिवाजसनेयके पठ्यते, आरण्यकं च यजुः ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये' इत्यादि तत्रैव पठ्यते, तयोर्जपः सकलमहापातकादिहरः । तथा गायत्र्याश्च महापातकेषु

लक्षमतिपातकोपपातकयोर्दशसहस्रमुपपातकेषु सहस्रं प्रकीर्णकेषु शतमित्येवं जपः सर्वपापहरः । तथा च गायत्रीमधिकृत्य श्लोकः शङ्खेनोक्तः - 'शतं जप्ता तु सावित्री महापातकनाशिनी। सहस्रजप्ता तु तथा पातकेभ्यः प्रमोचिनी ।। दशसाहस्रजाप्येन सर्वकिल्बिषनाशिनी । लक्षं जप्ता तु सा देवी महापातकनाशिती ।। सुवर्णस्तेयकृद्विप्रो ब्रह्महा गुरुतल्पगः । सुरापश्च विशुद्ध्यान्ति लक्षं जप्त्वा न संशयः ।।

किञ्च, यत्र यत्र च ब्रह्मवधादौ तज्जनितकल्मषजातेन आत्मानं संकीर्णमभिभूतं द्विजो मन्यते तत्र गायत्र्याः तिलैः होमः कार्यः । तत्र महापातकेषु लक्षसंख्याया होमः कार्यः । अतिपातकेषु पादपादह्लासः कल्पनीयः । यथोक्तं याज्ञवल्क्येन -

यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः ।<br>
तत्र तत्र तिलैर्होमः गायत्र्या वाचनं तथा ।। ३.३०९

किञ्च, वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः । तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ।। इत्युपक्रमेण वेदाभ्यासनिरतं तितिक्षायुक्तं पञ्चमहायज्ञानुष्ठाननिरतं महापातकजान्यपि पापानि न स्पृशन्ति। किमुत प्रकीर्णकजानि वाङ्मनसजन्योपपातकानि । यथोक्तं याज्ञवल्क्येन -

वेदाभ्यासरतं क्षान्तं पञ्चयज्ञक्रियापरम् ।<br>
न स्पृशन्तीह पापानि पहापातकजान्यपि ।। ३.३१०

पुनश्च - वायुभक्षो दिवा तिष्ठन् रात्रिं नीत्वाऽप्सु सूर्यदृक् ।<br>
जप्त्वा सहस्रं गायत्र्याः शुद्ध्येद् ब्रह्मवधादृते ।। ३.३११

## बोधप्रश्नाः -

१. शुक्रियं नाम किम् ?

उत्तरं.........................................................

२. सर्वपापहराः के ?

उत्तरं.........................................................

३. वेदाभ्यासः कतिधा ?

उत्तरं.........................................................

४. कं महापातकजान्यपि पापानि न स्पृशन्ति ?

उत्तरं.........................................................

५. द्विजेन कदा तिलैर्होमः विधेयः ?

उत्तरं.........................................................

६. कस्याः सहस्रं जप्त्वा ब्रह्मवधादृते शुद्ध्यति ?

उत्तरं..............................................................

## १०.१३. सकलप्रकाशरहस्यव्रताङ्गभूतधर्माः -

यथोक्तं याज्ञवल्क्येन -

ब्रह्मचर्यं दया क्षन्तिर्दानं सत्यमकल्पता ।
अहिंसा स्तेयमाधुर्ये दमश्चेति यमाः स्मृताः ।। ३.३१२
स्नानं मौनोपवासेज्यास्वाध्यायोपस्थानिग्रहाः ।
नियमा गुरुशुश्रूषा शौचाक्रोधप्रमादता ।। ३.३१३

दयाक्षान्त्यादीनां पुरुषार्थतया प्राप्तानामपि पुनर्विधानं प्रायश्चित्तत्वार्थम् । क्वचिद्विशेषोऽप्यस्ति। यथा विवाहादिष्वभ्यन्वज्ञातस्याप्यनृतवचनस्य निवृत्त्यर्थं सत्यत्वविधानात् । पुत्रशिष्यादिकमपि न ताडनीयमित्येवमर्थमहिंसाविधानमित्येवमादि ।

## बोधप्रश्नाः -

१. सकलप्रकाशरहस्यव्रताङ्गभूतधर्माः के ?

उत्तरं..............................................................

२. के यमाः स्मृताः ?

उत्तरं..............................................................

३. नियमाः के ?

उत्तरं..............................................................

## १०.१४. सान्तपनाख्यं व्रतम् -

यथोक्तं याज्ञवल्क्येन -

गोमूत्रं गोमयं क्षीरं दधि सर्पिःकुशेदकम् ।
जग्ध्वा परेऽहन्युपवसेत्कृच्छ्रं सान्तपनं चरन् ।। ३.३१४

पूर्वेद्युः आहारान्तरपरित्यागेन गोमूत्रादीनि पञ्चगव्यानि (पञ्चद्रव्याणि) कुशोदकसहितानि संयुज्य पीत्वा अपरेद्युरुपवसेदिति द्वैरात्रिकः सान्तपनः कृच्छ्रः । यदा पुनः पूर्वेद्युः उपोष्यापरेद्युः समन्त्रकं संयोज्य समन्त्रकमेव पञ्चगव्यं पीयते तदा ब्रह्मकूर्च इत्याख्यायते । जाबालेन सप्ताहसाध्यं सान्तपनमुक्तम् - गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । एकैकं प्रत्यहं पीत्वा त्वहोरात्रमभोजनम् । कृच्छ्रं सान्तपनं नाम सर्वपापप्रणाशनम् ।। एषां च गुरुलघुकृच्छ्राणां शक्यपेक्षया व्यवस्था विज्ञेया ।

## बोधप्रश्नौ: -

१. सान्तपनकृच्छ्रलक्षणं किम् ?

उत्तरं............................................................

२. सर्वपापप्रणाशक: कृच्छ्र: क: ?

उत्तरं............................................................

## १०.१५. महासान्तपनाख्यं कृच्छ्र: -

यथोक्तं यज्ञवल्क्येन -

पृथक्सान्तपनद्रव्यै: षडह: सोपवासक: ।
सप्ताहेन तु कृच्छ्रोऽयं महासान्तपन: स्मृत: ।। ३.३१५

सप्ताहेनापवर्जितो महासान्तपनाख्य: कृच्छ्रो विज्ञेय: । कथमित्यपेक्षायामुक्तं पृथग्भूतै: षड्भिर्गोमूत्रादिभि: एकैकेन एकैकमह: अतिवाहयेत् सप्तमं चोपवासेनेति । यमेन पञ्चदशाहसंपाद्य: महासान्तपनीऽभिहित: -'त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत् । त्र्यहं दधि त्र्यहं क्षीरं त्र्यहं सर्पिस्तत: शुचि: । महासान्तपनं ह्येतत्सर्वपापप्रणाशनम् ।। जाबालेन त्वेकविंशतिरात्रिनिर्वर्त्यो महासान्तपन उक्त: - षणामेकैकमेतेषां त्रिरात्रमुपयोजयेत् । त्र्यहं चापवसेदन्त्यं महासान्तपनं विदु: ।

## बोधप्रश्नौ -

१. महासान्तपनकृच्छ्रलक्षणं किम् ?

उत्तरं............................................................

२. सान्तपनकृच्छ्र: याज्ञवल्क्यदिशा कतिदिनात्मक: ?

उत्तरं............................................................

## १०.१६. पर्णकृच्छ्राख्यं व्रतम् -

यथोक्तं याज्ञवल्क्येन -

पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकै: ।
प्रत्येकं प्रत्यहं पीतै: पर्णकृच्छ्र उदाहृत: ।। ३.३१६

पलाशोदुम्बरारविन्दश्रीवृक्षपर्णानामेकैकेन कथितमुदकं प्रत्यहं पिबेत् । कुशोदकं चैकस्मिन्नहनीति पञ्चाहसाध्य: पर्णकृच्छ्र: । यदातु पर्णादीनामेकीकृतानां क्वाथास्त्रिरात्रान्ते पीयते तदा पर्णकूर्च: ।

## बोधप्रश्नौ -

१. पर्णकृच्छ्रः कत्यहसाध्यः ?

उत्तरं.............................................................

२. पर्णकृच्छ्रलक्षणं किम् ?

उत्तरं.............................................................

## १०.१७. तप्तकृच्छ्रः -

यथोक्तं याज्ञवल्क्येन -

तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत् ।
एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः ।। ३.३१७

दुग्धसर्पिरुदकानां तप्तानामेकैकं प्रतिदिवसं प्राश्यापरेद्युरुपवसेत् । एष दिवसचतुष्टयसंपाद्यः महातप्तकृच्छ्रः । एभिरेव समस्तैः सोपवासैः द्विरात्रसंपाद्यः सान्तपनवृत्तप्तकृच्छ्रः । मनुना तु द्वादशरात्रनिर्वर्त्योऽभिहितः तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान् । प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः।

## बोधप्रश्नः -

१. तप्तकृच्छ्रलक्षणं किम् ?

उत्तरं.............................................................

## १०.१८. पादकृच्छ्रः -

यथोक्तं याज्ञवलक्येन -

एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैवायं पादकृच्छ्रः प्रकीर्तितः ।। ३.३१८

एकभक्तेन सकृद्भोजनेन दिवैव, नक्तेनेति पृथगुपादानात् । अतश्च दिवैकवारमेव भोजनेनैवैकमहोरात्रमतिवाहयेत् । एतच्च कृच्छ्रादीनां व्रतरूपत्वात् पुरुषार्थभोजनपर्युदासेन कृच्छ्राङ्गभूतभोजनं विधीयते । तथा चापस्तम्बः - 'त्र्यहमनक्ताश्यदिवाशी ततस्त्र्यहम् । त्र्यहमयाचितव्रतस्त्र्यहं नाश्नाति किंचन' इति । गौतमेनापीदमेव स्पष्टीकृतम् - हविष्यान्प्रातराशान्भुक्त्वा तिस्रो रात्रिर्नाश्नीयात्' इति । अयाचितमिति न केवलं परकीयान्नयाचनप्रतिषेधोऽपितु स्वकीयमपि परिचारकभार्यादिभ्यो न याचितव्यम् । आपस्तम्बेनान्यथा उक्तम् - सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिस्मृताः । चतुर्विंशतिरायाच्याः परं निरशनास्त्रयः ।। तथा चापस्तम्बेनोक्तम् - 'सायं प्रातस्तथैकैकं दिनद्वयमयाचितम् दिनद्वयं च नाश्नीयात्कृच्छ्रार्धं तद्विधीयते ।।

## बोधप्रश्न: -

१. पादकृच्छ्रलक्षणं किम् ?

उत्तरं.............................................................

## १०.१९. प्राजापत्यकृच्छ्रम् -

अयमेव पादकृच्छ्र: यथाकथंचिद्दण्डकलितवदावृत्त्या स्वस्थानविवृद्धया वा, तत्राप्यानुलोम्येन प्रातिलोम्येन वा तथा वक्ष्यमाणजपादित्युक्तं तद्रहितं वा त्रिरभ्यस्त: प्राजापत्योऽभिधीयते । यथोक्तं मनुना - त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् । परं त्र्यहं च नाश्नीयात्प्राजापत्यं चरन्द्विज: ।। इत्यानुलोम्येन स्वस्थानविवृद्धिपक्षस्तु मनुना दर्शित: । प्रातिलोम्यावृत्तिस्तु वसिष्ठेन दर्शिता - 'प्रातिलोम्यं चरेद्विप्र: कृच्छ्रं चान्द्रायणोत्तरम्' । अत्रादित्योपस्थापनपूर्वकं रुद्रादिभ्यो देवताभ्यो जुहुयात् । अन्ते ब्राह्मणभोजनम् ।

## बोधप्रश्न: -

१. प्राजापत्यकृच्छ्रलक्षणं किम् ?

उत्तरं.............................................................

## १०.२०. अतिकृच्छ्र: -

याज्ञवल्क्य आह -

अयमेवातिकृच्छ्रस्यात्पाणिपूरान्नभोजन: ।। ३.३१९

अतिकृच्छ्र एकभक्तप्राजापत्यधर्मयुक्त: स्यात् । इयांस्तु विशेष: - आद्ये त्र्यहत्रये पाणिपूरणमात्रमन्नं भुञ्जीत न पुनर्द्वाविंशत्यादिग्रासान् । अत्रापि पादश: व्यवस्था पूर्ववदेव द्रष्टव्या । यत्तु मनुनोक्तम् - 'एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत् । त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन् द्विज: ।।

## बोधप्रश्न: -

१. अतिकृच्छ्रे कस्तावद्विशेष: ?

उत्तरं.............................................................

## १०.२१. कृच्छ्रातिकृच्छ्र: -

याज्ञवल्क्येनोक्तम् -

'कृच्छ्रातिकृच्छ्र: पयसा दिवसानेकविंशतिम्' ।

एकविंशतिरात्रं पयसा वर्तनं कृच्छ्रातिकृच्छ्राख्यं व्रतं विज्ञेयम् । गौतमेन तु द्वादशरात्रमुदकेन वर्तनं कृच्छ्रातिकृच्छ्र उक्त: 'अब्भक्षस्तृतीय: स कृच्छ्रातिकृच्छ्र:' । अतश्च शक्त्यपेक्षया

अनयोर्व्यवस्था।

## बोधप्रश्नौ -

१. एकविंशतिदिवसान् किं पीत्वा कृच्छ्रातिकृच्छ्रं पालयेत् ?

उत्तरं..............................................................

२. कृच्छ्रातिकृच्छ्रः कतिदिनात्मकः ?

उत्तरं..............................................................

## १०.२२. सौम्यकृच्छ्रः -

पिण्याकोदनमिस्रावोदश्विदुदकसक्तूनां पञ्चानामेकैकं प्रति - दिवसमुपभुज्य षष्ठेऽहिन उपवसेदेष सौम्याख्यः कृच्छ्रोऽभिधीयते । द्रव्यपरिमाणं तु प्राणयात्रानिबन्धनमधिगन्तव्यम् । जाबालेन - 'पिण्याकं सक्तवस्तक्रं चतुर्थेऽहन्यभोजनम् । वासो वै दक्षिणां दद्यात्सौम्योऽयं कृच्छ्र उच्यते ।। यथोक्तं याज्ञवल्क्येन-

पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम् ।
एकारात्रोपवासश्च कृच्छ्रः सौम्योऽयमुच्यते ।। ३.३२१

## बोधप्रश्नौः -

१. सौम्यकृच्छ्रलक्षणं किम् ?

उत्तरं..............................................................

२. सौम्यकृच्छ्रः कतिदिवसात्मकः ?

उत्तरं..............................................................

## १०.२३. तुलापुरुषाख्यकृच्छ्रः -

एषां पिण्याकादीनां पञ्चानां क्रमेणैकैकस्य त्रिरात्रभ्यासेन पञ्चदशाहव्यापी तुलापुरुषाख्यः कृच्छ्रः वेदितव्यः । अत्र पञ्चदशाहिकस्य विधानादुपवासस्य निवृत्तिः । यमानुसारं एकविंशतिरात्रस्तु तुलापुरुष उच्यते ।

यथोक्तं याज्ञवल्क्येन -

एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम् ।
तुलापुरुष इत्येष ज्ञेयः पञ्चदशाहिकः ।। ३.३२२

## बोधप्रश्नौ -

१. तुलापुरुषकृच्छ्रलक्षणं किम् ?

उत्तरं..........................................................

२. तुलापुरुषाख्य: कृच्छ्र: कतिदिनात्मक: ?

उत्तरं..........................................................

## १०.२४. चान्द्रायणम् -

यथोक्तं याज्ञवल्क्येन -

तिथिवृद्ध्या चरेत्पिण्डान् शुक्ले शिख्यण्डसंमितान् ।
एकैकं ह्रासयेत्कृष्णे पिण्डं चान्द्रायणं चरन् ।। ३.३.२३

चान्द्रायणाख्यं व्रतं कुर्वन् मयूराण्डपरिमितान् पिण्डान् शुक्ले आपूर्यमाणपक्षे तिथिवृद्ध्या चरेत्। तथा प्रतिपत्प्रभृतिषु चन्द्रकलानामेकैकशो वृद्धेरर्धमासे तद्वत्पिण्डानपि प्रतिपद्येको द्वितीयायां द्वावित्येवमेकैकश: वर्धयन् भक्षयेत्यावत्पौर्णमासी । तत: पञ्चदश्यां पञ्चदशग्रासान् भुक्त्वा तत: कृष्णपक्षे चतुर्दश प्रतिपदि द्वितीयायां त्रियोदशमित्येकैकश: ग्रासान् ह्रासयन्नश्नीयात् यावच्चतुर्दशी । तत: चतुर्दश्यामेकग्रासं ग्रसित्वा इन्दुक्षयेऽर्थादुपवसेत् । तथा च वसिष्ठ: - 'एकेकं वर्धयेत्पिण्डं शुक्ले कृष्णे च ह्रासयेत् । इन्दुक्षये न भुञ्जीत एष चान्द्रायणो विधि: ।। एतदेव व्रतं यदा कृष्णपक्षप्रतिपदि प्रक्रम्य पूर्वोक्तक्रमेणानुष्ठीयते तदा पिपीलिकावन्मध्ये ह्रसिष्ठं भवतीति पिपीलिकमध्य इति कथ्यते ।

## बोधप्रश्ना: -

१. चान्द्रायणवतलक्षणं किम् ?

उत्तरं..........................................................

२. चान्द्रायणे कथं पिण्डान् चरेत् ?

उत्तरं..........................................................

३. चान्द्रायणे कीदृशान् पिण्डान् चरेत् ?

उत्तरं..........................................................

## १०.२४.१. कृच्छ्रचान्द्रायणम् -

यथोक्तं याज्ञवल्क्येन -

कुर्यात्त्रिषवणस्नायी कृच्छ्रं चान्द्रायणं तथा ।
पवित्राणि जपेत्पिण्डान्गायत्र्या चाभिमन्त्रयेत् ।। ३.३२५

कृच्छ्रं प्राजापत्यादिकं चान्द्रायणं वा त्रिषवणस्नानयुक्त: कुर्यात् । एतच्च तप्तकृच्छ्रव्यतिरेकेण। स्नानानन्तरं च पवित्राणि अघमर्षणादीनि अन्तर्जले जपेत्सावित्रीं वा ।

'सावित्रीं च जपेन्नित्यं पवित्राणि च शक्तितः इति मनुस्मरणात् । किञ्च, आदिश्यत इत्यादिष्टं प्रायश्चित्तं न विद्यते येषु पापेषु तेषु चान्द्रयणेन शुद्धिः । तथा च षड्त्रिंशन्मतेऽभिहितम् - यानि कानि च पापानि गुरोर्गुरुतराणि च । कृच्छ्रातिकृच्छ्रचान्द्रेयैः शुध्यन्ते मनुरब्रवीत् ।। याज्ञवल्क्येनाप्युक्तम् -

अनादिष्टेषु पापेषु शुद्धिश्चान्द्रायणेन च ।
धर्मार्थं यश्चरेदेतच्चन्द्रस्यैति सलोकताम् ।। ३.३२६

## बोधप्रश्नाः -

१. कः चान्द्रायणं कृच्छ्रं वा कुर्यात् ?

उत्तरं..........................................................

२. चान्द्रायणे वते कानि जपेत् ?

उत्तरं..........................................................

३. चान्द्रायणे कया अभिमन्त्रयेत् ?

उत्तरं..........................................................

४. अनादिष्टेषु पापेषु केन शुद्धिः स्यात् ?

उत्तरं..........................................................

५. कः चन्द्रस्य सलोकतामेति ?

उत्तरं..........................................................

६. गुरोर्गुरुतराणि पापानि कैः शुध्यन्ते ?

उत्तरं..........................................................

## १०.२५. सारांशः -

अस्मिन् खण्डे दशमभागे सामान्यतयोपदिष्टानुपदिष्टविषये प्रायश्चित्तं निरूपितम् । पतितपरित्यागादिविधेरतिदेशः विचारितः । पतितापरित्यागविधिरालोचितः । चरितव्रतविधिः निरूपितः। सकलव्रतसाधारणधर्मः प्रतिपादितः । सकलरहस्यवत्रसाधारणधर्मो विवेचितः । ब्रह्महत्यादिक्रमेण रहस्यप्रायश्चित्तान्यालोचितानि । गोवधादिषट्पञ्चाशदुपपातकप्रायश्चित्तं निरूपितम् । अज्ञानवृत्ते प्रकीर्णके मानसे चोपपातके प्रायश्चित्तमुल्लिखितम् । सकलमहापातकादिसाधारणपवित्रमन्त्रा उदाहृताः । सकलप्रकाशरहस्यव्रताङ्गभूतधर्मा विचारिताः । सान्तपनाख्यं व्रतं निरूपितम् । महासान्तपनाख्यः कृच्छ्र आलेचितः । पर्णकृच्छ्रः विचारितः । तप्तकृच्छ्रः प्रतिपादितः । पादकृच्छ्रः निगदितः । प्राजापत्यकृच्छ्रोऽऽलोचितः । अतिकृच्छ्रः

विवेचितः । कृच्छ्रातिकृच्छ्रः निरूपितः । पराकृच्छ्रः विवेचितः। सौम्यकृच्छ्र उदाहृतः । तुलापुरुषकृच्छ्रः प्रतिपादितः । चान्द्रायणं चान्ते समुल्लिखितम् ।

## १०.२६. पारिभाषिकशब्दाः -

| | | |
|---|---|---|
| दासः | - | कर्मकरः |
| हेतुकः | - | मीमांसार्थादितत्त्वज्ञः |
| तर्की | - | न्यायशास्त्रकुशलः |
| शुक्रियम् | - | आरण्यकविशेषः |
| ब्रह्मचर्यम् | - | सकलेन्द्रियसंयमः |
| अकल्कता | - | अकुटिलता |
| शुक्लः | - | आपूर्यमाणपक्षः |

## १०.२७. आदर्शप्रश्नाः -

### निबन्धात्मकप्रश्नाः - (प्रत्येकं २०/१५ अङ्काः)

१. सकलव्रतसाधारणधर्मं ग्रन्थोक्तदिशा विमृशत ।

२. ब्रह्महत्यादिक्रमेण रहस्यप्रायश्चित्तानां नामान्युल्लिख्य सुरापानप्रायश्चित्तमुलिखत ।

३. गोवधादिषट्पञ्चाशदुपपातकानां नामान्युल्लिख्य कस्याप्येकस्य प्रायश्चित्तं लिखत ।

### विश्लेषणात्मकप्रश्नाः - (प्रत्येकं १२/१० अङ्काः)

१. पतितपरित्यागविधिमालोचयत ।

२. अज्ञानकृते प्रकीर्णके मानसे चोपपातकप्रायश्चित्तं निरूपयत ।

३. सकलमहापातकसाधारणमन्त्रान् लिखत ।

### लघुप्रश्नाः - (प्रत्येकं ५ अङ्काः)

१. सान्तपनकृच्छ्रलक्षणं किम् ?

२. पर्णकृच्छ्रलक्षणं किम् ?

३. प्राजापत्यकृच्छ्रलक्षणं किम् ?

४. अतिकृच्छ्रलक्षणं किम् ?

५. सौम्यकृच्छ्रलक्षणं किम् ?

६. तुलापुरुषकृच्छ्रलक्षणं किम् ?

७. चान्द्रायणलक्षणं किम् ?

**एकाङ्कप्रश्नाः - (प्रत्येकं १ अङ्कः)**

१. कस्य कार्यं बान्धवा बहिः कुर्युः ?

२. कासां वासः गृहान्तिके देयम् ?

३. कः पर्षदोऽनुमतं व्रतं कुर्वीत ?

४. रहस्यव्रतं कः आचरेत् ?

५. ब्रह्महा अघमर्षणं कतिरात्रमुपोषितः जपेत् ?

६. ब्रह्महा कीदृशीं गां दत्वा विशुध्येत ?

७. कीदृशः गुरुतल्पगः मुच्यते ?

८. सर्वपापापनुत्तये कतिप्राणायामाः जप्याः ?

९. निशायां दिवा वा कृतं पापं कस्माद् विप्रणश्यति ?

१०. कं महापातकजान्यपि पापानि न स्पृशन्ति ?

## १०.२८. एकाङ्कप्रश्नानामुत्तराणि -

१. पतितस्य, २. पतितास्त्रीणाम्, ३. विख्यातदोषः, ४. अनभिख्यातदोषः, ५. त्रिरात्रम्, ६. पयस्विनीम्, ७. सहस्रशीर्षाजपी, ८. शतम्, ९. त्रैकाल्यसंध्याकरणात्, १०. वेदाभ्यासरतम् ।